Gaekwad's Oriental Series

Published under the Authority of the Maharaja Sayajirao University of Baroda.

General Editor:
**B. J. Sandesara,**
M.A., Ph.D.

No. 136

चन्द्रानन्दविरचितया प्राचीनया वृत्त्या समलङ्कृतं

कणादप्रणीतं

# वैशेषिकसूत्रम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# VAIŚEṢIKASŪTRA
OF
# KAṆĀDA

with the Commentary of Candrānanda

*Critically Edited by*

MUNI ŚRĪ JAMBUVIJAYAJI
Disciple of the Late
HIS HOLINESS MUNIRĀJA ŚRĪ BHUVANAVIJAYAJI MAHĀRĀJA

**ORIENTAL INSTITUTE**
**BARODA**
**1961**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Printed Preliminary Pages and Plates by Ramanlal J. Patel, Manager, The Maharaja Sayajirao University of Baroda Press (Sadhana Press), Near Palace Gate, Palace Road, Baroda and Pages 1 to 237 by Shri Himatlal D. Patel, at Mahodaya Press, Bhavanagar, and published on behalf of the Maharaja Sayajirao University of Baroda by Dr. Bhogilal J. Sandesara, Director, Oriental Institute, Baroda, 1961.

---

**Price Rs. 25/-**

*Can be had of :*

**UNIVERSITY PUBLICATIONS SALES UNIT,**

**Near Palace Gate, Palace Road, Baroda 1.**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# समर्पणम् ।

अनन्तोपकारि-पूज्यपाद-गुरुदेव-मुनिराजश्री १००८

## भुवनविजयजी महाराज !

बहुपुण्याश्रितं दत्त्वा दुर्लभं नरजन्म मे ।
लालनां पालनां पुष्टिं कृत्वा वात्सल्यतस्तथा ॥ १ ॥
वितीर्य धर्मसंस्कारानुत्तमाँश्च गृहस्थितौ ।
भवद्भिः सुपितृत्वेन सुबहूपकृतोऽस्म्यहम् ॥ २ ॥
ततो भवद्भिः प्रव्रज्य भगवत्त्यागवर्त्मनि ।
अहमप्युद्धृतो मार्गं तमेवारोह्य पावनम् ॥ ३ ॥
ततः शास्त्रोक्तपद्धत्या नानादेशविहारतः ।
अचीकरन् भवन्तो मां तीर्थयात्राः शुभावहाः ॥ ४ ॥
अनेकशास्त्राध्ययनं भवद्भिः कारितोऽन्वहम् ।
ज्ञानचारित्रसंस्कारैरुत्तमैर्वासितोऽस्मि च ॥ ५ ॥
ममात्मश्रेयसे नित्यं भवद्भिश्चिन्तनं कृतम् ।
व्यापृताश्च ममोन्नत्यै सदा स्वाखिलशक्तयः ॥ ६ ॥
ममाविनयदोषाश्च सदा क्षान्ता दयालुभिः ।
भवद्भिरित्यनन्तोपकारैरुपकृतोऽस्म्यहम् ॥ ७ ॥
मोक्षाध्वसत्पान्थ ! मुनीन्द्र ! हे गुरो !
वचोऽतिगा वः खलु मय्युपक्रियाः ।
असम्भवप्रत्युपकारसाधनाः
स्मृत्वाहमद्यापि भवामि गद्गदः ॥ ८ ॥
एवं सत्यपि विश्रुतं सुममिदं काणादशास्त्रात्मकं
युष्मत्प्रेरणमार्गदर्शनबलात्सम्पादितं किञ्चन ।
युष्मत्पाणियुगे प्रणम्य बहुशो भक्त्यार्पयाम्युज्ज्वले
प्राप्नोमि प्रवरां मुदं च हृदये मोक्षाध्वदेशिन् प्रभो ! ॥ ९ ॥

तत्रभवदन्तेवासी शिशुः जम्बूविजयः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# FOREWORD

This edition of the Vaiśeṣika Sūtra with the hitherto unpublished commentary of Candrānanda will, I am confident, be welcomed by all students of Indian Philosophy. The first edition of Vaiśeṣika Sūtra with the commentary Upaskāra of Śaṅkara Miśra was published for the first time in 1860-61 in the Bibliotheca Indica, No. 34, at Calcutta and was edited by Shri Jayanārāyaṇa Tarkapañcānana. From that time onwards it is the Upaskāra commentary which has been generally in use. A Second Edition of it was published in 1923 from Banaras as Kashi Sanskrit Series, number 3. Now, after a lapse of a century since its first publication a new edition of the Vaiśeṣika Sūtra with the commentary of Candrānanda is being placed in the hands of scholars. Vaiśeṣika Darśana is one of the principal Darśanas of Indian Philosophy. Kaṇāda is regarded as its founder; he is said to be the author of the Vaiśeṣika Sūtras. But the treatment of different subjects in the Sūtras not being in good order, Praśastapāda composed his Padārthadharmasaṅgraha which is referred to as Padārthapraveśaka in the Tattvasaṅgraha Pañjikā etc., and which came to be known as Praśastapāda Bhāṣya. This Bhāṣya became very popular because of its systematic treatment and methodical exposition of the subject and various commentaries like the Vyomavatī, Kandalī, Kiraṇāvali etc. were written on it. Due to wide prevalence of this Bhāṣya and its commentaries, the study of the original Vaiśeṣika Sūtras became less and less popular. However, though the work is called Praśastapāda Bhāṣya it is not really a regular commentary on the Vaiśeṣika Sūtras; gradually all the old commentaries on the Vaiśeṣika Sūtras were lost, and it was possibly because of this that the order of the Sūtras became confused and there were interpolations and omissions in certain cases. The original text of certain Sūtras was largely changed and hence it became difficult to obtain a correct interpretation of several of them.

In the 15th century, Śaṅkara Miśra obtained one of these confused texts of the Sūtras on which he wrote his commentary Upaskāra* in the style of the Navya Nyāya. It is the Sūtrapāṭha given by Śaṅkara Miśra that has been current in our days, but the Sūtrapāṭha obtained in references and also found in old texts often does not agree with the text of Śaṅkara Miśra. Hence Prof. Anantlal Thakur in his Introduction to his edition of Vaiśeṣika Darśana, published by the Mithila Research Institute, Darabhanga, in 1957, observes:—
" As a result, the Sūtrapāṭha must have been vitiated in course of time.

*सूत्रमात्रावलम्बेन निरालम्बेऽपि गच्छतः ।
खे खेलवद् ममाप्यत्र साहसं सिद्धिमेष्यति ॥
—Upaskāra of Śaṅkara Miśra, p. 1.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Interpolations and omissions have been detected in the current Vaiśeṣika Sūtra tradition. Mahāmahopādhyāya Dr. Gopinath Kaviraja and Pandit Vira Raghavacharya Siromani have shown many irregularities in the available texts of these Sūtras. The former has suggested the means of determination of a more correct Sūtra text by a careful study of all the commentaries and glosses on the Sūtras". This being the state of affairs Muni Shri Jambuvijayaji, a profound scholar of Hindu, Buddhist and Jaina logic and philosophy, while editing the Nayacakra of Mallavādī Kṣamāśramaṇa found that at many places the citations of the Vaiśeṣika Sūtras were either not available in the extant text or were available with different readings. But when Muni Shri Punyavijayaji sent to him a manuscript of Candrānanda Vṛtti from the Jaisalmer Bhandar, almost all the citations could be traced and the MS was found to be extremely useful. Now when most of all the old commentaries and glosses on the Vaiśeṣika Sūtras are lost, this commentary of Candrānanda fortunately takes us very near to the original Sūtrapāṭha.

As already noted above, in 1957, the Mithila Research Institute, Darbhanga, published Vaiśeṣika Darśana along with a 13th-14th century commentary. But that Vṛtti is incomplete and since the Sūtrapāṭha is mixed up with the text of the Vṛtti, it is very difficult to separate the Sūtrapāṭha from the Vṛtti. Again, it is highly probable that because of the influence of the Navya Nyāya style, the Vṛtti has deviated considerably from the authentic Sūtrapāṭha and its original interpretations.

Of the two manuscripts utilized in this edition the manuscript supplied by Muni Shri Punyavijayaji gives the Sūtrapāṭha separately which makes it easier to determine the Sūtrapāṭha. The meaning of the Sūtras given in the commentary of Candrānanda is in a somewhat abridged form. However, since the Vṛtti of Candrānanda is an old commentary composed on the basis of earlier ones, we are fortunate in having in it a comparatively early interpretation of the Sūtras. This commentary must have been written sometime after the sixth century, very probably during the 7th century. The Vṛtti of Candrānanda published in this volume is the oldest commentary on the Vaiśeṣika Sūtras available at present.

The editor picked up the Śāradā script of the Manuscript for the purpose of this edition and became proficient in it. He has also compared in the first two Appendices the older Sūtrapāṭha and the current Sūtrapāṭha. Appendix V gives some new information about the Vaiśeṣika Darśana drawn from an old unpublished text, *viz.* Sarvasiddhāntapraveśaka, a MS of which has been discovered at Jaisalmer.

In Appendices No. 6th and 7th the learned editor has thrown considerable light on the history of the Vaiśeṣika Darśana, with the help of references from

Jain Education International For Private & Personal Use Only www.jainelibrary.org

the Nayacakra of Ācārya Mallavādī Kṣmāśramaṇa, which he is presently editing for the Jaina Atmananda Sabha, Bhavnagar, and also with those from the Pramāṇasamuccaya of Diṅnāga.

Besides, with the help of his Gurudeva, he has collected several references from old Tibetan works which have been utilized in Appendix 7. Appendix 7 is useful not only to the student of Vaiśeṣika Darśana but also to all the students of Indian Philosophy, and of Jaina and Buddhist logic in particular. The Appendix also provides an excellent sample of a Sanskrit rendering of Tibetan texts. One rarely comes across Tibetan texts rendered into Sanskrit on such an extensive scale. Muni Shri Jambuvijayaji has been able to render into Sanskrit some parts of the Pramāṇasamuccaya of Diṅnāga, the father of Buddhist logic, from the Tibetan original. We are highly obliged to Muniji for his fruitful labour in utilizing these Tibetan works which could not be obtained in the original and of which he had to acquire photo-copies from Japan and other countries. It is indeed a very creditable feat on the part of this great Jaina monk and scholar to have learnt Tibetan in a short period without the aid of any tutor. For the purposes of the present research work he collected Tibetan texts from Japan, Europe and U.S.A. and with great patience selected all useful passages referring to the Vaiśeṣika Darśana ; he has also cited the passages pertaining to Naiyāyika Pratyakṣa and Naiyāyika Anumāna from the Tibetan Pramāṇasamuccaya. At great personal inconvenience he has prepared the beautiful hand-written script of the original Tibetan passages which are published in this volume from photo-plates of his hand-written press copy. His comparison of Sūtrapāṭha with the Sūtras cited in old texts, given in the Vṛddhipatraka, bears ample testimony to his wide reading and critical acumen.

Our thanks are due to Professor Anantlal Thakur who, inspite of his indifferent health, has contributed a learned Introduction in English to this edition.

In the preparation of this edition Muni Shri Jambuvijayaji obtained help and guidance in various ways from his late lamented father and Gurudeva His Holiness Muni Shri Bhuvanavijayaji whose inspiration was largely responsible for this valuable edition. It was at the instance of Muni Shri Bhuvanavijayaji that the editor had agreed to undertake this edition, and he provided him with all facilities for work. But he is no more before it could be completed.

It is indeed a great pleasure for us to be able to place in the hands of scholars this excellent edition of the Vaiśeṣika Sūtra with an unpublished old commentary prepared by a very competent scholar.

The book was printed at Bhavnagar, while the editor was constantly travelling on foot from place to place, as is enjoined on a Jaina monk. Hence

Jain Education International For Private & Personal Use Only www.jainelibrary.org

a number of misprints have crept in. We crave the indulgence of the readers on this account and request them to correct the misprints as per errata before using the book.

Lastly, I take this opportunity to thank the University Grants Commission and the Government of Gujarat for jointly giving full financial aid towards the publication of this Volume.

Oriental Institute,
Baroda
12-9-'61

B. J. SANDESARA
Director

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# विषयानुक्रमः

| विषयः | पृष्ठम् |
| --- | --- |
| सम्पादनोपयुक्तग्रन्थसूचिः सङ्केतविवरणं च | १५–१७ |
| Bibliography and Abbreviations | xix–xxi |
| प्रस्तावना | १–१६ |
| Introduction | 1–23 |
| **वैशेषिकसूत्रम्** | **१–७६** |
| **प्रथमोऽध्यायः**—समवेताशेषपदार्थप्रतिपादनम्[1] | **१–१०** |
| १ **प्रथममाह्निकम्**—जातिमन्निरूपणम् | १– ७ |
| २ **द्वितीयमाह्निकम्**—जाति-विशेषयोर्निरूपणम् | ८–१० |
| **द्वितीयोऽध्यायः**—द्रव्यनिरूपणम | **११–२४** |
| १ **प्रथममाह्निकम्**—भूतविशेषलक्षणम् | ११–१५ |
| २ **द्वितीयमाह्निकम्**—दिक्कालप्रतिपादनम् | १६–२४ |
| **तृतीयोऽध्यायः**—आत्मान्तःकरणलक्षणम् | **२५–३१** |
| १ **प्रथममाह्निकम्**—आत्मलक्षणम् | २५–२७ |
| २ **द्वितीयमाह्निकम्**—अन्तःकरणलक्षणम् | २८–३१ |
| **चतुर्थोऽध्यायः**—शरीरतदुपयोगिविवेचनम् | **३२–३६** |
| १ **प्रथममाह्निकम्**—शरीरोपयोगिविवेचनम् | ३२–३४ |
| २ **द्वितीयमाह्निकम्**—शरीरविवेचनम् | ३५–३६ |
| **पञ्चमोऽध्यायः**—कर्मप्रतिपादनम् | **३७–४४** |
| १ **प्रथममाह्निकम्**—शरीरसम्बन्धिकर्मचिन्तनम् | ३७–३९ |
| २ **द्वितीयमाह्निकम्**—मानसकर्मचिन्तनम् | ४०–४४ |

१ एतद् विषयनिरूपणमस्माभिः सायणमाधवाचार्यरचितसर्वदर्शनसंग्रहानुसारेणाकारीति ध्येयम्। दृश्यतामत्र पृ. १३९ पं. १५–२६ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| विषयः | पृष्ठम् |
|---|---|
| **षष्ठोऽध्यायः**—श्रौतधर्मनिरूपणम् | ४५–५१ |
| १ **प्रथममाह्निकम्**—दानप्रतिग्रहधर्मविवेकः | ४५–४७ |
| २ **द्वितीयमाह्निकम्**—चातुराश्रम्योचितधर्मनिरूपणम् | ४८–५१ |
| **सप्तमोऽध्यायः**—गुणसमवायप्रतिपादनम् | ५२–६१ |
| १ **प्रथममाह्निकम्**—बुद्धिनिरपेक्षगुणप्रतिपादनम् | ५२–५६ |
| २ **द्वितीयमाह्निकम्**—बुद्धिसापेक्षगुण-समवायप्रतिपादनम् | ५७–६१ |
| **अष्टमोऽध्यायः**—निर्विकल्पसविकल्पप्रत्यक्षप्रमाणचिन्तनम् | ६२–६५ |
| **नवमोऽध्यायः**—बुद्धिविशेषप्रतिपादनम् | ६६–७१ |
| **दशमोऽध्यायः**—अनुमानभेदप्रतिपादनम् | ७२–७६ |
| **नव परिशिष्टानि** | **७७–२२४** |
| **प्रथमं परिशिष्टम्** | ७७–१०० |
| (i) अत्र मुद्रितस्य सूत्रपाठस्य उपस्कारकृदभिमतसूत्रपाठेन सह तुलना | ७७– ९८ |
| (ii) उपस्कारकृदभिमतसूत्रपाठस्य पाठान्तराणि | ९९–१०० |
| **द्वितीयं परिशिष्टम्**—मि. वृत्तिकृदभिमतसूत्रपाठेन सह तुलना | १०१–१२२ |
| **तृतीयं परिशिष्टम्**—अकारादिक्रमेण वैशेषिकसूत्रपाठः | १२३–१३८ |
| **चतुर्थं परिशिष्टम्** | १३८–१४० |
| (i) प्राचीन आह्निकविभागः | १३८–१३९ |
| (ii) वैशेषिकसूत्रसंख्यातारतम्यम् | १४० |
| **पञ्चमं परिशिष्टम्**—सर्वसिद्धान्तप्रवेशके वैशेषिकदर्शनम् | १४१–१४५ |
| **षष्ठं परिशिष्टम्** | १४६–१५२ |
| (i) द्वादशारस्य नयचक्रस्य तद्वृत्तेस्तद्रचयितॄणां च संक्षिप्तः परिचयः | १४६–१४७ |
| (ii) सवृत्तिके नयचक्रे विद्यमानाः प्राचीनवैशेषिकग्रन्थ-ग्रन्थकृता-मुल्लेखाः | १४७–१५२ |
| **सप्तमं परिशिष्टम्** | १५३–२१९ |
| (i) वैशेषिकमतविचारप्रसङ्गे दिङ्नागरचितानां केषाञ्चिद् ग्रन्थानां निर्देशः | १५३–१५४ |


Jain Education International For Private & Personal Use Only www.jainelibrary.org

| विषयः | | पृष्ठम् |
|---|---|---|
| ( ii ) | प्रमाणसमुच्चयस्य तद्वृत्तेष्टीकायाश्च भोटभाषानुवादानां परिचयः | १५५ |
| (iii) | भोटभाषानुवादानां संस्करणेषु Choni edition इत्यस्य परिचयः | १५६–१५७ |
| (iv) | „ Derge edition „ „ | १५७–१५८ |
| ( v ) | „ Snar-than edition „ „ | १५८ |
| (vi) | „ Peking edition „ „ | १५८–१६६ |
| (vii) | प्रमाणसमुच्चयस्य वृत्तेष्टीकायाश्च भोटभाषानुवादानां स्वरूपम् | १६६–१६८ |
| (viii) | सप्तमे परिशिष्टे विशिष्टानां सङ्केतानां विवरणम् | १६८ |
| **भोटभाषान्तरतः संस्कृतेऽनुवादः** | | **१६९–२१९** |
| ( i ) | दिङ्नागविरचिते सवृत्तिके प्रमाणसमुच्चये वैशेषिकप्रत्यक्षपरीक्षा | १६९–१७३ |
| ( ii ) | अस्या जिनेन्द्रबुद्धिरचिता विशालामलवती टीका | १७३–१८३ |
| (iii) | सवृत्तिके प्रमाणसमुच्चये वैशेषिकानुमानपरीक्षा | १८४–१८८ |
| (iv) | अस्या विशालामलवती टीका | १८८–१९६ |
| ( v ) | सवृत्तिके प्रमाणसमुच्चये वैशेषिकाभिमतहेतुलक्षणपरीक्षा | १९७–१९८ |
| (vi) | „ „ „ हेत्वाभासलक्षणपरीक्षा | १९९–२०१ |
| (vii) | अस्या विशालामलवती टीका | २०१–२०६ |
| (viii) | सवृत्तिके प्रमाणसमुच्चये वैशेषिकाभिमतदृष्टान्तलक्षणपरीक्षा | २०७ |
| (ix) | अस्या विशालामलवती टीका | २०७–२०८ |
| **पूर्तिः** | | **२०९–२१९** |
| ( i ) | सवृत्तिके प्रमाणसमुच्चये नैयायिकप्रत्यक्षपरीक्षा | २०९–२१२ |
| ( ii ) | अस्या विशालामलवती टीका [ प्रतीकसङ्ग्रहात्मिका ] | २१३–२१४ |
| (iii) | सवृत्तिके प्रमाणसमुच्चये नैयायिकानुमानपरीक्षा | २१५–२१७ |
| (iv) | अस्या विशालामलवती टीका [ प्रतीकसङ्ग्रहात्मिका ] | २१७–२१९ |
| **अष्टमं परिशिष्टम्** | | **२२०–२२४** |
| ( i ) | राजशेखररचितषड्दर्शनसमुच्चयानुसारेण वैशेषिकाणां लिङ्ग-देवतादिस्वरूपम् | २२०–२२४ |
| ( ii ) | राजशेखररचिताया न्यायकन्दलीपञ्जिकाया आद्यान्त्यभागौ [ टिप्पणे ] | २२०–२२१ |


Jain Education International For Private & Personal Use Only www.jainelibrary.org

| विषयः | पृष्ठम् |
| --- | --- |
| (iii) हरिभद्रसूरिरचितषड्दर्शनसमुच्चयस्य बृहद्वृत्तौ वैशेषिकलिङ्ग-देवतादिस्वरूपम् [ टिप्पणे ] | २२४–२२५ |
| **नवमं परिशिष्टम्**—चन्द्रानन्दरचितवृत्तौ विद्यमानानामवतरणानां सूचिः | २२५–२२६ |
| **वृद्धिपत्रकम्** | २२७–२३४ |
| ( i ) विशिष्टा अवशिष्टाः संशोधनीयाश्च O.P.PS. सूत्रपाठभेदाः | २२७–२३१ |
| ( ii ) कतिपयानां वैशेषिकसूत्राणां ग्रन्थान्तरेषूद्धृतेन सूत्रपाठेन सह तुलना | २३१–२३४ |
| Errata ( Introduction ) | |
| **शुद्धिपत्रकम्** | २३५ |
| **प्रमाणसमुच्चयस्य वृत्तेष्टीकायाश्चापेक्षितांशानां भोटभाषानुवादाः** | I-LI |

# सम्पादनोपयुक्तग्रन्थसूचिः सङ्केतविवरणं च

**अभिधर्मकोशस्फुटार्था**—Calcutta Oriental Series No, 31, 1949.

[ उ= ] **उपस्कारः** [ वैशेषिकसूत्रव्याख्या ]—काशीसंस्कृतसीरीज No, 3.

**ऋजुविमला**—Madras University Sanskrit Series, A.D. 1940

**तत्त्वसंग्रहपञ्जिका**—( i ) Gaekwad's Oriental Series, Baroda 1926.
( ii ) जेसलमेरस्था हस्तलिखिता

**तत्त्वार्थभाष्यम्**—देवचंद लालभाइ जैन पुस्तकोद्धारफंड सीरीज, सुरत, 1926
—सिद्धसेनगणिकृता वृत्तिः ,, ,, ,, ,,

**तत्त्वार्थराजवार्तिकम्**—भारतीयज्ञानपीठ काशी, 1957

**नन्दीसूत्रमलयगिरीयवृत्तिः**—आगमोदयसमिति, सुरत

**नयचक्रम्** [ द्वादशारं नयचक्रम् ]—जैन आत्मानंद सभा, भावनगर.

**नयचक्रवृत्तिः** ,, ,,

**न्यायकुमुदचन्द्रः**—माणिक्यचन्द्र जैनग्रन्थमाला, Nos. 38–39 मुंबई.

*[ **न्यायसू०=** ] **न्यायसूत्रम्**
—**न्यायभाष्यम्**
—**न्यायवार्तिकम्**—( i ) जेसलमेरस्थं हस्तलिखितम्
( ii ) चौखम्बा संस्कृत सीरीज, काशी, 1916
—**न्यायवार्तिकतात्पर्यटीका**—Calcutta Sanskrit Series.
—**न्यायमञ्जरी**—काशी संस्कृत सीरीज. No. 106.

**न्यायावतारवृत्तिः**—जैन श्वेताम्बर कॉन्फरन्स, मुंबई

**प्रकरणपञ्चिका** [ शालिकनाथकृता ]—चौखम्बा संस्कृत सीरीज, No. 17 काशी.

**प्रभावकचरित्रम्**—सिंघी जैन ग्रन्थमाला, मुंबई

[ प्र. मी.= ]**प्रमाणमीमांसा** ,, ,,

**प्रमाणवार्तिकालङ्कारः** [ =प्रमाणवार्तिकभाष्यम् ]—KPJ Institute, Patna, 1953

**प्रमाणसमुच्चयवृत्तिः** T1 [ वसुधररक्षितविरचितो भोट( Tibetan )भाषानुवादः ]
,, T2 [ कनकवर्मविरचितो भोट( Tibetan )भाषानुवादः ]
—विशालामलवती टीका [ भोटभाषानुवादः ]

---

* तत्तद्ग्रन्थस्य व्याख्यानान्युपव्याख्यानानि च तत्तद्ग्रन्थस्याधस्तादेव दर्शितानीति तन्नामानि तत्रैव विलोकनीयानि ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[प्र० भा०=] प्रशस्तपादभाष्यम् —काशी संस्कृत सीरीज. No. 3

—[व्यो०=] व्योमवती टीका—चौखम्बा संस्कृत सीरीज, काशी, 1930

—न्यायकन्दली „ —(i) Vizianagram Sanskrit Series No. 6,

(ii) जेसलमेरस्था हस्तलिखिता

—किरणावली „ —(i) Benares Sanskrit Series No. 15

(ii) जेसलमेरस्था हस्तलिखिता

—सेतुः „ — चौखम्बा संस्कृत सीरीज, काशी, 1930

—सूक्तिः „ „ „ „ „ „

ब्रह्मसूत्रशाङ्करभाष्यम् —निर्णयसागर प्रेस, मुंबई

—प्रकटार्थविवरणम्—Madras University Sanskrit Series, No. 9

—रत्नप्रभा

महाप्रज्ञापारमितोपदेशः

मि. = मि. वृत्तिः = मिथिलाविद्यापीठेन प्रकाशिता वैशेषिकसूत्रवृत्तिः 1957

मीमांसाश्लोकवार्तिककाशिका —Trivendrum Sanskrit Series

मीमांसाश्लोकवार्तिकन्यायरत्नाकरः —चौखम्बा संस्कृत सीरीज, काशी,

योगशास्त्रस्वोपज्ञवृत्तिः — जैनधर्मप्रसारक सभा, भावनगर.

वादन्यायटीका [ विपञ्चितार्था ]—महाबोधि सोसायटी, सारनाथ, काशी.

विशेषावश्यकभाष्यम् —यशोविजय जैन ग्रन्थमाला, काशी

—कोट्टार्यगणिकृता टीका [ हस्तलिखिता ]

वै० सू० = वैशेषिकसूत्रम्

शतशास्त्रटीका [ वसुकृता ]

षड्दर्शनसमुच्चयः [ राजशेखरकृतः ]—यशोविजयजैनग्रन्थमाला, काशी

षड्दर्शनसमुच्चयस्य [ हरिभद्रसूरिकृतस्य ] बृहद्वृत्तिः —जैन आत्मानन्द सभा, भावनगर

सर्वदर्शनसंग्रहः—Bhandarkar Oriental Research Institute, Poona.

सर्वसिद्धान्तप्रवेशकः —अत्र पञ्चमे परिशिष्टे मुद्रितः

हेतुबिन्दुटीका —Gaekwad's Oriental Series, Baroda.

पृ० = पृष्ठम् । पं० = पङ्क्तिः । टि० = टिप्पणम् ।

C. ed. = Choni edition

CCTBC. A Complete Catalogue of the Tibetan Buddhist Canons. Tohoku Imperial University, Sendai, Japan, 1934.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

D. ed. = Derge-edition

K. = कनकवर्मविरचितो भोटभाषानुवादः ।

Melanges chinois et bouddhiques = The Name of a Journal, Brussels, Belgium.

MS. = Manuscript. [ हस्तलिखित आदर्शः ]

N. ed. = Narthang edition

O. = चन्द्रानन्दरचितवैशेषिकसूत्रवृत्तेरादर्शः Oriental Institute, Baroda.

P. ed. = Peking edition

P. = चन्द्रानन्दरचितवैशेषिकसूत्रवृत्तेरादर्शः [ मुनिराजश्रीपुण्यविजयानाम् ]

PS. = वैशेषिकसूत्रपाठस्यादर्शः [ मुनिराजश्रीपुण्यविजयानाम् ]

[ PS.* = प्रमाणसमुच्चयकारिकाणां भोटभाषानुवादः ]

PS¹ = प्रमाणसमुच्चयकारिकाणां वसुधररक्षितविरचितो भोटभाषानुवादः ।

PS² = प्रमाणसमुच्चयकारिकाणां कनकवर्मविरचितो भोटभाषानुवादः ।

PSV = प्रमाणसमुच्चयवृत्तेर्भोटभाषानुवादः ।

PSV¹ = प्रमाणसमुच्चयवृत्तेर्वसुधररक्षितविरचितो भोटभाषानुवादः ।

PSV² = प्रमाणसमुच्चयवृत्तेः कनकवर्मविरचितो भोटभाषानुवादः ।

T. = Chinese Tripitaka

V. = वसुधररक्षितविरचितो भोटभाषानुवादः ।

VT = 'विशालामलवती' टीकाया भोटभाषानुवादः ।

---

* अस्य सङ्केतस्योपयोगः सप्तमे परिशिष्ट एव वेदितव्यः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# BIBLIOGRAPHY AND ABBREVIATIONS


An Alphabetical List of Manuscripts, Oriental Institute, Baroda. Vols. 1-2., G.O.S. Nos. 97, 114. ; 1942, 1950.

Anargharāghava of Murāri Miśra, Nirṇayasāgara Press, 1937.

A Primer of Indian Logic—MM. S. Kuppuswami Sastri, Madras, 1951.

Āptaparīkṣā of Vidyānanda. Ed. Darbarilal Jain, Saharanpur, 1949.

A Record of the Buddhist Religion as practiced in India and the Malaya Archipelago by I-tsing, Tr. J. Takakusu, 1896.

Āvaśyakasūtravṛtti of Haribhadra—Āgamodaya Samiti, Surat.

Bhāradvājavṛttibhāṣya of Gaṅgādhar Vaidya, Berhampur, Śak. 1700.

Bhaṭṭa Vādīndra—The Vaiśeṣika—Journal, Oriental Institute: ( JOI ) Baroda, Vol. X. No. 1, Sept. 1960.

Brahmasūtraśāṅkarabhāṣya with Bhāmatī etc., Nirṇayaṣāgara, 1917.

Catuḥśataka of Āryadeva—V. Bhattacharya.

Chāndogyopaniṣat with Śāṅkarbhāṣya and Comm. by Ānandagiri, Edited by Kāśīnāth Śāstrī, Agashe 1890.

Citsukhī ( Tattvapradīpikā ) of Citsukhamuni, Kaṣi, 1956.

Dharmottarapradīpa of Durvekamiśra, K. P. Jayaswal Research Institute, Patna, 1955.

Diṅnāga, Sein Werk and Sein Entwiklung-Wiener Ziteschrift fur die Kunde Sud-und Ostasiens BD III, Wien, Austria, 1959.

Dvādaśāranayacakra ( DANC ) with Nyāyāgamānusāriṇī ( NAA, नयचक्रवृत्ति )—Jaina Ātmānanda Sabhā, Bhavnagar.

Harvard Journal of Asiatic Studies, Vol. XII, 1949.

Hetubindutīkāloka of Durvekamiśra, Gaekwad Oriental Sesries No. 113, ( GOS ), Baroda, 1949.

Hinayāna and Mahāyāna—Kimura.

Jainas in the History of Indian Literature—M. Winternitz,

Journal and Proceedings, Asiatic Society of Bengal ( New Series ), Vol. XXIII, 1937.

Journal of the Royal Asiatic Society of Great Britain and Ireland, 1947.

Kaṇadarahasya of Śaṅkaramiśra—Chawkhamba, 1917.

Kaṇādasūtranibandha of Bhaṭṭa Vādīndra—Transcript, Mithila Institute, Darbhaṇga.

Kiraṇāvalī of Udayanācārya ( a ) Chawkhamba, ( b ) Bibliothica Indica.

Kiraṇāvalībhāskara of Padmaṇābhamiśra—Sarasvatībhavana Series, Baranasi, 1920.

Laṅkāvatārasūtra, Kyoto Edn., 1956.


Jain Education International For Private & Personal Use Only www.jainelibrary.org

Mādhyamakavṛtti-Ed. Pussin.
Mahābhārata—Gita Press, Gorakhpur.
Nyāyabhāṣya of Vātsyāyana with Nyāyavārtika of Uddyotakāra, Tātparyaṭīkā of Vācaspatimiśra and Vṛtti of Visvanātha—Calcutta Sanskrit Series.
Nyāyakandalī of Śrīdharācārya, Bārāṇasi, Samvat 1951.
Nyāyakusumāñjali ( Kusumāñjali ) of Udayanācārya, Chawkhamba, 1912.
Nyāyalīlāvatī of Śrīvallabhācārya—Nirnayasāgara, 1915.
Nyāyāvatāraṭippana of Devabhadra—Ed. Dr. P. L. Vaidya.
Nyāyaviniścayavivaraṇa of Vādirāja, Vols. I & II Bhāratīya Jñāna Pīṭha, Kāśī, 1949, 1954.
Padārthadharmasaṁgraha ( = Praśastapādabhāṣya ).
Pramāṇamīmāṁsā (प्र. मी.) of Hemacandra ; ed. and comm. by Pt. Sukhlal Sanghvi, 1939.
Pramāṇasamuccaya of Diṅnāga with the Viśālāmalavatī of Jinendrabuddhi as reconstructed in Sanskrit by Muni Śrī Jambūvijayaji. ( See appendix 7 ).
Praśastapādabhāṣya ( प्र. भा. ) ( = Padārthadharmasaṁgraha ( PDS ) with Vyomavatī ( व्यो ) of Vyomaśiva, Prasastapādabhāṣyasūkti ( प्र. भा. सूक्ति ) of Jagadīśa Tarkālaṁkāra and Praśastapādabhāṣyasetu ( प्र. भा. सेतु ) of Padmanābhamiśra —Chawkhamba, Samvat, 1986.
Rāvaṇabhāṣya—MM. Kuppuswami Śāstrī—Journal of Oriental Research, Madras, Vol. III.
Śabara and the Nyāya-Vaiśeṣikadarśanas—Journal of Oriental Research, Madras, Vol. XVIII.
Ṣaddarśanasamuccaya vṛtti ( = Tarkarahasyadīpikā ) of Guṇaratna, Bibliothica Indica.
Sanmatitarka with Ṭīkā—Ahmedabad.
Saptapadārthī of Śivādityamiśra.
Sarasvatibhavana Studies, Vol. VII, Baranasi, 1929.
Sarvadarśanasaṁgraha attributed to Mādhavācārya—Bhandarkar Oriental Research Institute, Poona, 1951.
Sarvasiddhāntapraveśaka—Ms in Jaisalmir Jaina Jñāna-Bhandara.
Siddhahemaśabdānuśāsana of Hemacandra, ed. by Vijayalāvaṇyasūri 1957.
Sūtrālaṃkāra of Aśvaghoṣa, French Translation.
Śvetāśvataropaniṣat—Gita Press, Samvat 2009.
Syādvādamañjarī of Malliṣena—J. C. Jain, 1935.
Syādvādaratnākara of Vādideva—Ārhatamataprabhākara, Poona.
Tattvasaṃgraha ( TS ) of Śāntarakṣita with Pañjikā ( TSP ) of Kamalaśīla—GOS, Nos. 30-31. Vol. I ( 1926 ) & II ( 1926 ).
Ṭattvopaplavasiṁha of Jayarāśi, GOS., No. 87, 1940.
Uddyotakara as a Vaiśeṣika—Proceedings and Transactions, All India Oriental Conference, Bombay Session, 1949.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Uttarādhyayanasūtrabṛhadvṛtti of Śāntisūri, D. L. Ed., Surat.

Vādanyāya of Dharmakīrti with the comm. of Śāntarakṣita, edited by Rāhula Saṅkṛtyāyana—Appendix 20. Bihar Research Society, Vols. XXI & XXII, 1935-6.

Vaiśeṣikadarśana with Vyākhyā (मि ; मि. वृ) of Bhaṭṭa Vādīndra Mithila Institute, 1957.

Vaiśeṣikadarśana (वै. सू.) with Upaskāra (उ) of Śaṅkaramiśra, Vivṛti of Jayanārāyaṇa Tarkapañcānana and Bhāṣya of Candrakānta Tarkālaṁkāra, Gujrati Printing Press, 1913.

Vaiśeṣikadarśana with Rasāyana of Vīrarāghavācārya, Madras, 1958.

Vaiśeṣika Philosophy—H. Wi, London, 1917.

Vaiśeṣikasūtravṛtti—anonymous—Ch. IX-X (C. 1158-78 A.D.) Ms. in the Asiatic Society, Bengal.

Vaiśeṣikasūtropaskārapariṣkāra of MM. Pañcānana Tarkaratna, Calcutta,

Vākyapadīyaṭīkā of Puṇyarāja, Chawkhamba, 1887.

Viśeṣāvaśyakabhāṣya (with Vṛtti of Hemacandra) of Jinabhadragaṇi—Yaśovijaya Jaina Granthamālā, Kāśi.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥ श्रीशङ्खेश्वरपार्श्वनाथाय नमः ॥

॥ सद्‌गुरुदेवमुनिराजश्रीभुवनविजयपादपद्मेभ्यो नमः ॥

# प्रस्तावना

**भगवतो गुरुदेवस्य** कृपया प्रसादात् साहाय्येन चास्माभिस्तार्किकप्रवरजैनाचार्य-श्री**मल्लवादि**क्षमाश्रमणप्रणीतं[1] **द्वादशारं नयचक्रा**ख्यं महाशास्त्रं **सिंहसूरि**गणिवादि-क्षमाश्रमणसन्दृब्धया **न्यायागमानुसारिण्या** अष्टादशसहस्रश्लोकमितया वृत्त्या सह २००२ विक्रमाब्दे सम्पादयितुमारब्धम्। तत्र षष्ठेऽरे विस्तरेण **वैशेषिक**मतोपन्यासः सप्तमे चारे तत्परीक्षा वर्तते। अतिविस्तृतायां **वैशेषिक**मतविचारणायां ये ग्रन्था **मल्लवादि**-सूरिणा **सिंह**सूरिणा चोल्लिखितास्तेषु सूत्रं विहाय सर्वेऽपि सम्प्रति नामशेषतामुपगताः। **किञ्च,** यानि सूत्राणि तत्र निर्दिष्टानि तान्यपि **शङ्कर**मिश्ररचितोपस्कारयुते वैशेषिकसूत्र-पाठेऽस्माभिर्यथावद् नोपलब्धानि। ईसवीये पञ्चदशे शतके विद्यमानस्य **शङ्कर**मिश्रस्य समये हि वैशेषिकसूत्रपाठो बहुधा परिभ्रष्ट आसीदिति स्फुटमेवावगम्यते। अतो नयचक्रा-न्तर्गतवैशेषिकांशसम्पादने भृशमायासमनुभवद्भिरस्माभिः प्राचीनवैशेषिकग्रन्थान्वेषणं पुरातन-ग्रन्थसङ्ग्रहेष्वारब्धम्। यतः सन्ति खलु जैनानां सविधे जेसलमेरादिनगरेषु पुरातनग्रन्थसङ्ग्रहा यत्र विद्यमाना विभिन्नविषयका अनेके ग्रन्था नाद्यावधि प्रकाशमायाताः। अस्यैवान्वेषणस्य फलरूपत्वेन प्राचीनग्रन्थान्वेषणे प्राचीनग्रन्थसङ्ग्रहव्यवस्थापने च सिद्धहस्तानां मुनिराजश्री-**पुण्यविजय**महोदयानां सकाशादस्माभिश्चन्द्रानन्दविरचितवृत्तियुक्तोऽयं प्राचीनो वैशेषिक-सूत्रपाठ उपलब्धो योऽद्य वैशेषिकशास्त्ररसिकेभ्यो विद्वन्महोदयेभ्यः समुपह्रियते।

**चन्द्रानन्द**विरचितवृत्तियुक्तेऽस्मिन् **वैशेषिक**सूत्रपाठेऽनेकानि सन्ति तादृशानि स्थलानि यत्र **शङ्कर**मिश्रादिस्वीकृताद् **वाराणसीका**लिकातादिनगरमुद्रितात् सूत्रपाठाद् **मिथिला**विद्यापीठप्रकाशिताद् **भट्ट**वादीन्द्राद्यादृतात् सूत्रपाठाच्च भूयान् पाठभेदो वरीवर्ति। प्राचीनग्रन्थेषूद्धृतानि यान्यनेकानि सूत्राणि वाराणस्यादिमुद्रिते सूत्रपाठे न विद्यन्तेऽन्यथा वोपलभ्यन्ते तानि प्रायः सर्वाण्यपि सूत्राण्यत्र मुद्रिते सूत्रपाठे यथावत् स्वल्पीयसा वा पाठभेदेनोपलभ्यन्ते। किञ्च, वैशेषिकसूत्राणां सम्प्रति यावन्त्यो व्याख्याः समुपलभ्यन्ते तासु चन्द्रानन्दविरचिता वृत्तिः प्राचीनतमा। अत एतन्मुद्रणस्यात्युपयोगितां विभाव्य

---

१ जैन आत्मानन्दसभा, भावनगर—इत्यतोऽचिरादेव प्रकाशयिष्यतेऽयं ग्रन्थः॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्राच्यविद्यामन्दिरस्य तदानीं नियामकानां श्रीमतां **गो**विन्दभाईभट्टमहोदयानामनुरोधाद् वैक्रमे २०१३ संवत्सरेऽस्य सम्पादनमादर्शद्वयमवलम्ब्यास्माभिः प्रारब्धम् ।

**आदर्शपरिचयः**

(१) PS P. मुनिराजश्रीपुण्यविजयमहोदयानामन्तिकाद् देवनागर्यां लिप्यां लिखितो य आदर्शो लब्धस्तत्र ३४ पत्राणि । तेष्वर्धषष्ठेषु प्रारम्भिकपत्रेषु केवलो वैशेषिकसूत्रपाठः, अयं चास्माभिरत्र PS. इति सङ्केतितः । ततः परं सार्धेष्वष्टाविंशति-पत्रेषु 'आदौ सूत्रं ततस्तद्व्याख्या, ततः सूत्रं ततस्तद्व्याख्या' इत्येवंक्रमेण सूत्रपाठमिश्रिता चन्द्रानन्दरचिता वृत्तिरुपलभ्यते, इयमत्र P. इति संज्ञिता । एवं चात्र द्वौ सूत्रपाठौ एकः केवलः सूत्रपाठोऽपरस्तु वृत्त्यन्तर्गतः । उभयत्रापि प्रायः साम्यमेव, यत्तु क्वचित् किञ्चिद् वैषम्यं दृश्यते तत् तत्र तत्र यथायोगं टिप्पण्यां प्रदर्शितमस्माभिः[1] ।

आदर्शेऽस्मिन् प्रतिपत्रं पृष्ठद्वयम्, प्रतिपृष्ठं १२ पङ्क्तयः, प्रतिपङ्क्ति च प्रायः ४२ अक्षराणि । पत्राणां दैर्घ्यं चतुर्दशाङ्गुलप्रमितम् । आयामस्तु पञ्चाङ्गुलप्रमितः । वैक्रमे चतुर्दशे शतकेऽयमादर्शो लिखित इति लिपि-पत्रादिस्वरूपविदामभिप्रायः ।

(२) O. Oriental Institute, Baroda इत्यतोऽधिगतस्य **शारदा**-लिप्यां लिखितस्यादर्शस्यात्र O इति सङ्केतः । अयं च Oriental Institute collection No. 1831 'तर्कभाषादिद्वादशपुस्तकानि' इत्यत्र विद्यते । अत्र 'आदौ सूत्रं ततस्तद्व्याख्या' इत्येवंक्रमेण सूत्रपाठमिश्रिता चन्द्रानन्दविरचिता वृत्तिः Pवदेवोपलभ्यते । O-P इत्यनयोः P शुद्धतरस्तथापि कतिपयस्थानेषु Oपाठ एव समीचीनः । O-P इत्यनयोर्ये उपयोगिनः पाठभेदास्ते यथायोगं टिप्पण्यां तत्र तत्रोपदर्शिताः ।

O-P इत्यत्र यद्यपि वृत्तावन्तर्गत एव सूत्रपाठस्तथापि वृत्तितः पृथक्कृत्य तदुद्धारस्य दुष्करत्वादत्र वैशेषिकसूत्रपाठनिर्णयविधौ PS एव प्राधान्येनोपकरोति ।

**कणादर्षेः परिचयः**

महर्षि**कणाद**प्रणीतानि वैशेषिकसूत्राणि वैशेषिकदर्शनस्य मूलभूतः प्रधानश्च ग्रन्थ इति सुप्रसिद्धं तावत् । अस्य महर्षेर्जीवनवृत्तादिकं भृशमन्वेषयद्भिरप्यस्माभिस्तथाविधसामग्र्य-भावाद् विस्तरेणानुपलभमानैर्ये केचनोल्लेखा उपलब्धास्तेऽत्रोपन्यस्यन्ते —

१ यत्त्वस्मदनवधानादवशिष्टमशुद्धं वा तदत्र वृद्धिपत्रके दर्शितमस्माभिरिति वृद्धिपत्रकमपि विलोकनीयम् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

“ ब्रह्मोवाच—

भगवन् देवदेवेश विश्वरूपो महेश्वरः ।
इमास्तव महादेव तनवो लोकवन्दिताः ॥ ९० ॥
विश्वरूप महासत्त्व कस्मिन् काले महाभुज ।
कस्यां वा युगसम्भूत्या द्रक्ष्यन्ति त्वां द्विजातयः ॥ ९१ ॥
केन वा तत्त्वयोगेन ध्यानयोगेन केन वा ।
तनवस्ते महादेव शक्या द्रष्टुं द्विजातिभिः ॥ ९२ ॥

भगवानुवाच—

तपसा नैव योगेन दानधर्मफलेन वा ।
न तीर्थफलयोगेन क्रतुभिर्वा सदक्षिणैः ॥ ९३ ॥
न वेदाध्यापनैर्वापि न वित्तेन निवेदनैः ।
शक्योऽहं मानुषैर्द्रष्टुम् ऋते ध्यानात् परं न हि ॥ ९४ ॥
कृतं त्रेता द्वापरं च कलिश्चैव चतुर्युगम् ।
एतस्य पादाश्चत्वारः अङ्गानि कृतवस्तथा ॥ ९७ ॥........
षड्विंशे परिवर्ते तु यदा व्यासः पराशरः ।
तदाप्यहं भविष्यामि सहिष्णुर्नाम नामतः ।
पुण्यं रुद्रवटं प्राप्य कलौ तस्मिन् युगान्तके ॥ १९९ ॥
तत्रापि मम ते पुत्रा भविष्यन्ति सुधार्मिकाः ।
**उलूको** वैद्युतश्चैव सर्वको ह्याश्वलायनः ।
प्राप्य माहेश्वरं योगं गन्तारस्ते तथैव हि ॥ २०० ॥
सप्तविंशतिमे प्राप्ते परिवर्ते क्रमागते ।
जातूकर्ण्यो यदा व्यासो भविष्यति तपोधनः ॥ २०१ ॥
तदाप्यहं भविष्यामि सोमशर्मा द्विजोत्तमः ।
**प्रभास**तीर्थमासाद्य योगात्मा लोकविश्रुतः ॥ २०२ ॥
तत्रापि मम ते पुत्रा भविष्यन्ति तपोधनाः ।
**अक्षपादः कणादश्च उलूको वत्स एव च** ॥ २०३ ॥
योगात्मानो महात्मानो विमलाः शुद्धबुद्धयः ।
प्राप्य माहेश्वरं योगं रुद्रलोकं ततो गताः ॥ २०४ ॥”

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति **वा**युपुराणे पूर्वखण्डे त्रयोविंशतितमेऽध्याये सप्तविंशतितमे चतुर्युगपरिवर्ते **प्र**भासक्षेत्रे [1]**कणादस्य** **अ**क्षपादेन **उ**लूकेन **व**त्सेन च सह स्थितिर्वर्णिता ।

" प्रथमं हि मयैवोक्तं शैवं पाशुपतादिकम् ।
मच्छक्त्यावेशितैर्विप्रैः सम्प्रोक्तानि ततः परम् ॥
**कणादेन** तु सम्प्रोक्तं शास्त्रं **वै**शेषिकं महत् ।
**गो**तमेन तथा **न्यायं सांख्यं** तु **क**पिलेन वै ॥ "

इति **प**द्मपुराण उत्तरखण्डे २०७ अध्याये **पा**र्वतीं प्रति **शिवे**नाभिहितम् ।

" प्रणम्य हेतुमीश्वरं मुनिं **कणा**दमन्वतः
पदार्थधर्मसंग्रहः प्रवक्ष्यते महोदयः ॥ [ **प्र**शस्तपादभाष्यम्, पृ. १ ]

........कणादमिति तस्य कापोतीं वृत्तिमनुतिष्ठतो रथ्यानिपतितांस्तण्डुलकणानादाय प्रत्यहं कृताहारनिमित्ता संज्ञा । "—**न्याय**कन्दली पृ. २ । " स्मर्यते हि यत् कणादो मुनिर्महेश्वरनियोगप्रसादावधिगम्य शास्त्रं प्रणीतवान् । "—**किर**णावली पृ. ४ ।

" योगाचारविभूत्या यस्तोषयित्वा महेश्वरम् ।
चक्रे वैशेषिकं शास्त्रं तस्मै **क**णभुजे नमः ॥ " इति **प्र**शस्तपादभाष्यान्ते ।

**का**श्यप इत्यपि [2]कणादस्यैव नामान्तरमतः कणादस्य दर्शनं काश्यपीयं दर्शनमप्यभिधीयते । विशे[3]षाभ्युपगन्तृत्वादेतदेव वैशेषिकमप्युच्यते ।

---

१ कणादस्यैव उलूक इति नामान्तरमिति प्रसिद्धिः । अतोऽस्य संगतिश्चिन्तनीया। दृश्यतामत्रैव पृ. २२०. Introduction. p. 9 ।

२ " यदनुमेयेन सम्बद्धं प्रसिद्धं च तदन्विते ।
तदभावे च नास्त्येव तल्लिङ्गमनुमापकम् ॥
विपरीतमतो यत् स्यादेकेन द्वितयेन वा ।
विरुद्धासिद्धसन्दिग्धमलिङ्गं **काश्यपो**ऽब्रवीत् ॥ [ प्र. भा. पृ० १०० ]

......अलिङ्गं सामान्यतो लिङ्गाभासं **काश्यपा**त्मजः कणादोऽब्रवीत् । "—**किरणावली** पृ. २९१ ॥ **प्रकरणपञ्चिकायां** " तदाह भगवान् **काश्यपः** संख्या परिमाणानि पृथक्त्वं संयोगविभागौ परत्वापरत्वे कर्म च रूपिद्रव्यसमवायाच्चाक्षुषाणि " [ पृ० ७९ ] इति **शाबरभाष्यस्य प्रभाकरेण** कृताया **बृहत्या** व्याख्यानभूतायाम् **ऋजुविमलायां** च " तदाह भगवान् **काश्यपः**—कारणाज्ञानात् कार्याज्ञानम्, कार्याज्ञानात् कारणाज्ञानम् " [ पृ. २११ ] इति वैशेषिकसूत्राणि [ तुलना—४।१।१२।, ३।१।४, ५ ] **शालिकनाथेन काश्यप**नाम्नोद्धृतानि । अत्र Introduction p. 2 इत्यत्रापि **अनन्तलालदेवशर्मभिः** संगृहीताः **काश्यप**स्योल्लेखा द्रष्टव्याः ॥

३ विशेषशब्देन किं ग्राह्यमित्यत्र ये विभिन्ना अभिप्रायास्तेषां संग्रहोऽत्र **अनन्तलालदेवशर्मभिः** Introduction pp. 2, 3 इत्यत्र कृत इति जिज्ञासुभिस्तत्रैव विलोकनीयम् । दृश्यताम् Introduction pp. 6-9 ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**वीर**निर्वाणतः ५४४ वर्षेषु व्यतीतेषु षट्पदार्थप्ररूपकत्वाद् 'उलूक'गोत्रसम्भूतत्वाच्च **षडुलूक**त्वेन प्रसिद्धो **रोह**गुप्तो नाम मुनिर्द्रव्यादीन् षट् पदार्थानुपदिष्टवांस्ततश्च **त्रै**राशिक-दर्शनमुत्पन्नम् । स च **रोह**गुप्तो वैशेषिकं [1]प्रणीतवानिति **वि**शेषावश्यकभाष्यादिषु **जिन**-भद्रगणिक्षमाश्रमणादयः ।

**क**णादेन प्रणीतं टीकाकृद्भिः प्रटीकाकृद्भिरन्यैश्च बहुभिर्निबन्धकृद्भिर्बहुशः पल्लवित-मिदं वैशेषिकदर्शनं **त**त्त्वचिन्तामणिकृतो **ग**ङ्गेशोपाध्यायादुत्तरोत्तरं महान्तं विस्तरं महतीं च प्रसिद्धिमापन्नं सम्प्रति दरीदृश्यते । विभिन्नानां शास्त्राणामभिप्रायाणां च प्रभावेण कालान्तरे वैशेषिकसिद्धान्तेषु भृशं परिवर्तनं प्रस्थानबाहुल्यमपि च सञ्जातम् । एतच्च जिज्ञासुभि[1]-रन्यतोऽवगन्तव्यम् ।

**वैशेषिकदर्शनस्य प्राचीनमितिवृत्तम्**

कणादप्रणीतसूत्राणां **वै**शेषिकदर्शनमूलभूतत्वात् तत्र बहूनि व्याख्यानोप-व्याख्यानानि [2]प्रकरणादीनि चासन् । किन्तु सूत्रेषु वैशद्याभावादन्येषां चातिविस्तरत्वा-देकदेशाभिधायित्वाद्वा इतस्ततोऽभिहितानां वैशेषिकाभिमतपदार्थानामेकत्र कात्स्न्येन सङ्ग्रहार्थं

---

१ "षट्पदार्थबहिष्कृतैः सह सम्भाषणमस्माकं गुरुभिः प्रतिषिद्धम्" इति वररुचिकृते उभयाभि-सारिकाख्ये नाटके [ चतुर्भाणी पृ० १३१ ] उल्लेख उपलभ्यते । एवं चैकं षट्पदार्थवादिनां प्राचीनवैशे-षिकाणां प्रस्थानमपरं तु सप्तपदार्थवादिनां नव्यानाम् । तत्रापि बहून्यवान्तरप्रस्थानानि । तज्जिज्ञासुभि-र्मिथिलाविद्यापीठप्रकाशितस्य वैशेषिकदर्शनस्य Introduction p. 16 भूमिका [ पृ० २४-२५ ] च विलोकनीये । "अर्थ इति द्रव्यगुणकर्मसु" [ ८।१४ ] इति वैशेषिकसूत्रं विलोक्य प्राचीनतमानां वैशेषिकाणां त्रिपदार्थवादित्वमपि केचिदैतिह्यविदः सम्भावयन्ति । द्रव्य-गुण-पर्यायवादिभिर्जैनैरपि च तस्य कश्चन सम्बन्धं योजयन्ति । इत्थं च जैनग्रन्थेषु प्रसिद्धाया वैशेषिकशास्त्रप्रणेतुः षडुलूकस्य रोहगुप्तस्य कथाया अपि सङ्गतिं ते कथञ्चिदुपपादयन्ति ।

२ "प्रणम्य हेतुमीश्वरं मुनिं कणादमन्वतः । पदार्थधर्मसंग्रहः प्रवक्ष्यते महोदयः ॥ "इति पदार्थधर्मसङ्ग्रहाद्यश्लोकव्याख्यानावसरे "पदार्थधर्मसङ्ग्रह इति, पदार्था द्रव्यादयः, तेषां धर्माः...... अनेन संगृह्यन्ते शास्त्रे नानास्थानेषु वितता एकत्र संकलय्य कथ्यन्त इति संग्रहः । स प्रकृष्टो वक्ष्यते प्रकरणशुद्धेः संग्रहपदेनैव दर्शितत्वात् । वैशद्यं लघुत्वं कृत्स्नत्वं च प्रकर्षः, सूत्रेषु वैशद्याभावाद् भाष्यस्य च विस्तरत्वात् प्रकरणादीनां चैकदेशत्वात् । ...... महोदय इति महानुदय उद्गम उद्बोधो ज्ञानमिति यावत् । सोऽस्माद् भवतीति महोदयः सङ्ग्रह उक्तः । " इत्युदयनाचार्याः किरणावल्याम् , पृ० ५ । "पदार्थधर्माणां संक्षेपेणाभिधायको ग्रन्थः प्रकृष्टो मया वक्ष्यत इति ग्रन्थकर्तुः प्रतिज्ञा । ग्रन्थस्य चेयं प्रकृष्टता यदन्यत्र ग्रन्थे विस्तरेणेतस्ततोऽभिहितानामिहैकत्र तावतामेव पदार्थधर्माणां ग्रन्थे संक्षेपेण कथनम् । एतदेव चास्यारम्भः सत्स्वप्युपनिबन्धान्तरेषु " इति श्रीधरकृतायां न्यायकन्दल्याम् , पृ० ३ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यदा **प्र**शस्तपादेन **पदार्थधर्मसङ्ग्रहः** प्रणीतस्तत आरभ्य तस्यैवाध्ययनाध्यापनादिषु छात्राणां विदुषां च विशेषत आदराद् वैशेषिकसूत्रव्याख्यानादीनां चोपेक्षणाद् गच्छता कालेन वैशेषिकसूत्राणि विहाय सर्वेषामपि प्राचीनवैशेषिकग्रन्थानां विलोपः सञ्जात इति प्रतिभाति। अतो वैशेषिकदर्शनस्य प्राचीनमितिवृत्तं बाहुल्येनान्धकारेणैवावृतम्। तथापि प्राचीनग्रन्थान्तरसाहाय्येन यत् किमपीतिवृत्तमुपलभ्यते तदत्रोपन्यस्यते।

**जैनग्रन्थानुसारेण प्राचीनं वृत्तम्**

जैनाचार्यैः श्री**मल्लवादि**क्षमाश्रमणैर्विरचिते **सिंहसूरि**गणिवादिक्षमाश्रमण-सन्दृब्धया **न्याया**गमानुसारिण्या वृत्त्यालङ्कृते द्वादशारे **न**यचक्रे षष्ठे सप्तमे चारे विस्तरेण वैशेषिकमतं वर्णितम्। तत्र यावान् विशेषत ऐतिह्यविषयकोंऽशः सोऽत्रैव वैशेषिकसूत्रे [1]षष्ठे परिशिष्टे विस्तरेणास्माभिः संगृहीत इति विस्तरार्थिभिस्तत्रैव विलोकनीयम्। [2]तदनुसारेणेत्थं प्रतीयते—

वैशेषिकसूत्राणि
├── वाक्यम्
│   └── भाष्यम्
│       └── प्रशस्तमतेष्टीका
└── कटन्दी

अन्या अपि बह्व्यष्टीका आसन्नित्यपि [3]तत एव सम्भाव्यते।

अत्रेदं विचार्यते—क एषां **वाक्य-भा**ष्यादीनां प्रणेतारः। वैक्रमेऽष्टमे नवमे वा शतके विद्यमानो **मु**रारिमिश्रः ‘**अ**नर्घराघव’नाटके **रा**वणस्य **क**टन्दीपण्डितत्वमाख्याति। **प**द्मनाभमिश्रः **कि**रणावलीभास्करे, **गो**विन्दप्रभो **ब्र**ह्मसूत्रशाङ्करभाष्यव्याख्यायां [4]रत्न-

१ पृ० १४६-१५२॥

२ पृ० १४७ पं० २२, पृ० १४८ पं० ९, १२; पृ० १४९ पं० ११, पृ० १५० पं० ४, ६, १७, पृ० १५१ पं० ४, पृ० १५२ पं० १, २, ६, ७, ८, ११--१३॥

३ पृ० १५२ पं० १३॥

४ एत उल्लेखा अस्माभिरत्रैव षष्ठे परिशिष्टे पृ० १५० टि० १ इत्यत्र सङ्गृहीता इति तत्र विलोकनीयाः। दृश्यताम् Introduction p. 12.॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रभायाम्, **अनुभूतिस्वरूपाचार्यश्च** [१]**प्रकटार्थविवरणे** [२]**रावणप्रणीतं** भाष्यमुल्लिखन्ति। अतोऽत्रोपरि निर्दिष्टं **वाक्यव्याख्यानभूतं भाष्यं पद्मनाभमिश्रादीनां रावणप्रणीत**त्वेनाभिप्रेतमाहोस्विद् **रावणप्रणीता कटन्दी** टीकैव **भाष्याभिधया** तैर्निरदेशीति सन्देहास्पदम्। आद्यविकल्पे **मुरारिमिश्रस्य** वचो व्याहन्यते, अतो द्वितीयविकल्पो ज्यायानिति वयं सम्भावयामः।

**प्रशस्तपादभाष्यं** तु नैवात्र वाक्यभाष्यत्वेनाभिमतमिति [३]प्रतिपादितमस्माभिः परिशिष्टे।

[४]**आत्रेयप्रणीतमप्येकं** वैशेषिकसूत्राणां **भाष्याभिधानं** व्याख्यानं [५]**मि.वृत्तौ, वादिराजेन** [६]**न्यायविनिश्चयविवरणे, वादिदेवसूरिभिः** [७]**स्याद्वादरत्नाकरे, राजशेखरेण षड्दर्शनसमुच्चये,**[८] **गुणरत्नसूरिभिश्च हरिभद्रसूरिप्रणीतषड्दर्शनसमुच्चयबृहद्वृत्तौ**[९] निरदेशि। तत्तु **नयचक्र**निर्दिष्टाद् **वाक्यव्याख्यानभूताद् भाष्याद्** भिन्नं सम्भाव्यते। **आत्रेय**मतं हि किञ्चिद् विशिष्टमासीत्, अत एव तस्य [९]**आत्रेयतन्त्र**त्वेनोल्लेखो **राजशेखरेण** कृतः प्रतिभाति। शिष्याणां मन्दोद्यमत्वात् तद् व्युच्छिन्नम्, आचारव्यवहारप्रायश्चित्तेषु च ते निपुणा इत्यपि तत्र **राजशेखरेणा**वेदितम्।

---

१ पृ० ४९१॥

२ "पर्वतादागमं लब्ध्वा भाष्यबीजानुसारिभिः।
स नीतो बहुशाखत्वं चन्द्राचार्यादिभिः पुनः॥ [वाक्यपदीयम् २।४८९]

**पर्वतात्** त्रिकूटैकदेशवर्तित्रिलिङ्गैककदेशादिति। तत्र ह्युपलतले **रावणविरचितो** मूलभूतव्याकरणागमस्तिष्ठति। केनचिच्च ब्रह्मरक्षसानीय **चन्द्राचार्य-वसुरातगुरु**प्रभृतीनां दत्त इति। तैः खलु यथावद् व्याकरणस्य स्वरूपं तत उपलभ्य सततं च शिष्याणां व्याख्यायां बहुशाखित्वं नीतो विस्तरं प्रापित इत्यनुश्रूयते।"—इति **वाक्यपदीयस्य पुण्यराजकृतायां** टीकायाम् [पृ० २८५।२८६] एकस्य वैयाकरणस्यापि **रावणस्योल्लेख** आयातीत्यपि ध्येयम्॥

३ पृ० १५० टि० १॥

४ दृश्यतामत्र Introduction p. 13.॥

५ पृ० ३, १५, ६५॥

६ भाग. २ पृ० ४१३, ५०६, ५०७॥ **न्यायविनिश्चयविवरणे** सामान्यतोऽप्येकं वैशेषिकसूत्र**भाष्यं** निर्दिष्टम्। दृश्यतां भाग. १ पृ० १२१ पं० २०, पृ० ५०८ पं० १०, १६, २१॥

७ पृ० ३३२, ४४७, ४४८, ९४५, ९४६॥

८ दृश्यतामत्रैवाष्टमे परिशिष्टे पृ० २२४, २२५॥

९ दृश्यतामत्रैव परिशिष्टे पृ० २२४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वैशेषिकसूत्राणां किञ्चिद् **भाष्यं** मनसि निधाय बौद्धाचार्येण **दिङ्नागेन प्रमाण-समुच्चयवृत्तौ** वैशेषिकाणां सौत्रं प्रत्यक्षलक्षणं निर्दिष्टमनुमानलक्षणं च परीक्षितमिति **प्रमाण-समुच्चयटीकाकृतो जिनेन्द्रबुद्धेर्वचनात्**[१] स्पष्टमेवावसीयते । प्रमाणसमुच्चयप्रणेता **दिङ्नागो नयचक्रप्रणेता मल्लवादी** च निकटकालीनावित्यपि ध्येयम् ।

**नयचक्रे** निर्दिष्टस्य वैशेषिकसूत्राणां **वाक्य-भाष्ययोष्टीकाकारस्य प्रशस्तमतेर्बहव** उल्लेखा अन्यत्र [२]तत्त्वसंग्रहपञ्जिका-[३]सन्मतिटीका-[४]प्रमेयकमलमार्तण्डादिषु **दृश्यन्ते** । अस्यैव प्रशस्तपादः प्रशस्तकरः प्रशस्तदेव इत्यादीनि नामान्तराणि सम्भाव्यन्ते । एका वैशेषिक-सूत्रवाक्यभाष्याणां नयचक्रे निर्दिष्टा **टीका**[५], अपरतु वैशेषिकमतसंग्रहात्मकः **पदार्थधर्मसंग्रहा-भिधानः** सम्प्रति प्रशस्तपादभाष्यनाम्ना[६] प्रसिद्धः स्वतन्त्रो निबन्ध इति ग्रन्थद्वयं तेन प्रणीतमिति मन्यामहे । एतत् सर्वमस्माभिरत्र षष्ठे [७]परिशिष्टे **अनन्तलाल**देवशर्ममिश्र Introduction[८]मध्ये प्रतिपादितमिति तत्र विलोकनीयम् ॥

**बौद्धग्रन्थानुसारेण प्राचीनं वृत्तम्**

बौद्धग्रन्थानुसारेण यत् प्राचीनं वैशेषिकस्वरूपं किञ्चित् प्रतीयते तन्निदर्शनार्थं प्रमाणसमुच्चयादिबौद्धग्रन्थांशानां भोटभाषानुवादतः संस्कृते परिवर्तनं विधाय सप्तमे परिशिष्टे निवेशितम् । तदनुसारेणाथ प्रस्तूयते—

---

१ दृश्यतामत्रैव परिशिष्टे पृ० १५४, पं० ९, पृ० १९५ पं० १६–२० ॥

२ पृ० ४३, ४४, ५७, ७८, २६४ २६९ । दृश्यतामत्र Introduction p. 14–15 ॥

३ पृ० १०१, ७१६, १३२८ ॥

४ पृ० २७० ॥

५ आत्रेय-प्रशस्तपादादयस्तु 'कारणगुणपूर्वकाः पृथिव्याम्' [ वै० सू० ७ । १ । १० ] इति सूत्रं कार्यपृथिवीरूपादीनां कारणगुणपूर्वकत्वप्रतिपादकम्, वह्निसंयोग[ात् 'पाक]जाश्च' इति सूत्रं तु परमाणुपृथिवीरूपादीनां पाकजत्वप्रतिपादकमिति व्याचक्षते" इति मि. **वृत्तौ** [ पृ ६५ ] **प्रशस्तपादेन** एकं सूत्रं [ ७ । १ । १० ] द्विधा विभज्य व्याख्यातमिति निर्देशो दृश्यते। **प्रशस्तपादभाष्ये** तु पाकजो-त्पत्तिविचारे [ पृ० ४६–४७ ] अयमभिप्रायो यद्यपि लक्ष्यते तथापि तत्रास्य सूत्रस्यानिर्देशात् प्रशस्तपादेन सूत्राणां टीकापि व्यरचीति गम्यते ॥

६ अस्य **टीका**प्रटीकादीनामितिहासो **मि. वृत्ते**र्भूमिकायां [ पृ० २५ ] द्रष्टव्यः ॥

७ पृ० १५० टि० १ । दृश्यतां नयचक्रं पृ० ५१२ टि० ७ ॥

८ P. 14–16 ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"वैशेषिकाणां केनचित् सम्बन्धेन" आत्मेन्द्रियमनोर्थसन्निकर्षाद् यन्निष्पद्यते तदन्यत्' [वै. सू. ३-१-१३] इति सौत्रं तावद् द्रव्ये प्रत्यक्षलक्षणम्। **केचित्** प्रमाणात् फलमर्थान्तरमिच्छन्तोऽसाधारणकारणत्वादिन्द्रियार्थसन्निकर्षं प्रमाणं प्रतिपादयन्ति। **अन्ये** तु प्रधानत्वादात्मनःसन्निकर्षः प्रमाणमित्याहुः[१]।" इति **प्रमाणसमुच्चयवृत्ता**वभिदधन् बौद्धाचार्यो **दिङ्नाग**स्तदानीं बहूनां वैशेषिकग्रन्थानां विद्यमानत्वं सूचयति।

अत्र 'केनचित् सम्बन्धेन' इत्यनेनान्येषां वैशेषिकसूत्रवृत्तिकृतामभिमतानामनेकविधानां सम्बन्धानां [२]व्यावृत्तिः '**सौत्रम्**' इत्यनेन च [३]**भाष्यकृद**भिहितस्य प्रत्यक्षलक्षणस्य व्यावृत्ति**र्दिङ्नाग**स्याभिप्रेता, 'केचित्' इत्यनेन [४]**आयस्कादयः**, अन्ये तु' इत्यनेन च [५]**रावणा**दयोऽनेका वैशेषिकग्रन्थकारा **दिङ्नाग**स्याभिप्रेता इति स्फुटमेव **प्रमाणसमुच्चय**-टीकाकृतो **जिनेन्द्रबुद्धे**र्वचनादवगम्यते।

**प्रमाणसमुच्चयवृत्तौ** वैशेषिकाभिमतप्रत्यक्षानुमानयोः परीक्षावसरे यथानेकधा वैशेषिकमतं **दिङ्नागेन** पूर्वपक्षितं तथा सम्प्रति विद्यमानेषु ग्रन्थेष्वनवलोकनात् प्राचीनान् कांश्चिद् वैशेषिकग्रन्थान् मनसि निधाय तेनतद् निबद्धमित्यवसीयते। वैशेषिकसूत्राणां किञ्चिद् [६]**भाष्य**मप्यनुमानलक्षणविचारप्रसङ्गे **दिङ्नागेन** परीक्षितमिति व्यक्तमेव **जिनेन्द्रबुद्धि**-वचनादवसीयते।

"वैशेषिकाणामपि 'तद्वद्धर्मस्य हेतुः' [ ] अभिधानमिति वर्तते[७]" इति वैशेषिकाभिमतं हेतुलक्षणं **दिङ्नागेनो**पन्यस्तम्, 'साध्याभिधानं प्रतिज्ञा' इति प्रतिज्ञा-लक्षणं [८]वैशेषिकाभिमतमिति च तत्र सूचितम्। "**वैशेषिकाणाम्** 'उभयप्रसिद्धो दृष्टान्तः'

---

१ दृश्यतामत्र पृ० १७० ॥

२ पृ० १७३ पं० १९

३ पृ० १७४ पं० ९।

४ पृ० १७४ पं० १८ ॥

५ पृ० १७४ पं० २२ ॥

६ पृ० १९५ पं० १६ ॥

७ दृश्यतां पृ० १९७ पं० ६ ॥

८ "यद्यपि **वादविधौ** 'साध्याभिधानं प्रतिज्ञा' इति प्रतिज्ञालक्षणमुक्तम्।" इति **न्याय-वार्तिके** [Vārāṇasī edition पृ. ११७] उद्द्योतकरेणाभिधानाद् बौद्धाचार्यवसुबन्धोरप्येतल्लक्षण-मभिप्रेतमिति ज्ञायते ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[ ] इति[1]।" इति **वैशेषिका**भिमतं दृष्टान्तलक्षणमपि **दि**ङ्नागेनोपदर्शितम्। वैशेषिकाभिमतान्येतानि प्रतिज्ञा-हेतु-दृष्टान्तलक्षणानि सम्प्रति प्रसिद्धेषु केषुचिदपि ग्रन्थेषु नोपलभ्यन्ते। दिङ्नागेन वैशेषिकाभिमतहेत्वाभासनिरूपणे[2]यदप्रसिद्धस्यासतश्च स्वरूपं वर्णितं तदपि क्वचिदन्यत्र न दृश्यते। अत एतत्प्रतिपादकः कश्चित् प्राचीनो वैशेषिकग्रन्थ आसीदिति स्फुटमेवावगम्यते।

**जि**नेन्द्रबुद्धिना **प्र**माणसमुच्चयटीकायां **वि**शालामलवत्यामनेकेषु स्थानेषु[3] वैशेषिकग्रन्थतो ये सन्दर्भा उद्धृतास्ते सम्प्रति प्रसिद्धेषु केषुचिदपि वैशेषिकग्रन्थेषु नोपलभ्यन्ते।

किञ्चान्यत्, उद्धृतवैशेषिकसूत्रव्याख्यानावसरे वैशेषिकसूत्राणामेव काचिद् विस्तृता **वृत्ति**र्जिनेन्द्रबुद्धिनाऽनुसृता। "तयोर्निष्पत्तिः प्रत्यक्षलैङ्गिकाभ्यां ज्ञानाभ्यां व्याख्याता" [१०।४] इति वैशेषिकसूत्रस्य यादृशी व्याख्या **जि**नेन्द्रबुद्धिनोपन्यस्ता[4] तादृश्येव [5]**चन्द्रानन्द**रचितवृत्तौ संक्षेपेण दरीदृश्यते। अत उभयोरप्यवलम्बनभूता काचिदेकैव **वृत्ति**स्तत्र प्रतीयते। यच्च पृ० १९४ पं० १८ इत्यत्र **जि**नेन्द्रबुद्धिना प्रोक्तं तदपि '३।१।९' सूत्रस्य **चन्द्रानन्द**रचितवृत्त्यार्थतः समानमिति ध्येयम्।

अपि च, "अस्येदं कार्यं कारणं सम्बन्ध्येकार्थसमवायि विरोधि चेति लैङ्गिकम्" [९।१८] इति वैशेषिकसूत्रं यथा [6]**दि**ङ्नागेन [7]**जि**नेन्द्रबुद्धिना च व्याख्यातं प्रायस्तथैव चन्द्रानन्देनापि ३।१।८ सूत्रस्य ९।१८ सूत्रस्य च [8]वृत्तौ व्याख्यातम्। [9]**स**र्वसिद्धान्तप्रवेशकेऽपि तथैव व्याख्यातम्। यच्च चन्द्रानन्देन '९।१८' [10]सूत्रवृत्तौ **वृत्तिकार**स्य वचन-

---

१ दृश्यतां पृ. २०५ पं. ६ ॥

२ दृश्यतां पृ. १९९ ॥

३ दृश्यतामत्र सप्तमे परिशिष्टे पृ. १७५ पं. २७ [तुलना पृ. १८८ पं. १७], पृ. १७६ पं. २, पृ. १९१ पं. २६-२७, पृ. १९४ पं. २८, पृ. १९५ पं. १६-२० ॥

४ पृ० १७४ पं० २४— पृ० १७५ पं० २ ॥

५ पृ० ७३ पं० १--४ ।

६ अत्र पृ० १८४ पं० २०, पृ० १८६ पं० २०, पृ० १८७ पं० ८ ॥

७ पृ० १८९ पं० ३—११ ॥

८ पृ० २६, ६९ ॥

९ अत्र पञ्चमे परिशिष्टे पृ० १४५ पं० १—९ ॥

१० "एवंविधप्रसिद्धसम्बन्धस्यार्थैकदेशमसन्दिग्धं पश्यतः शेषानुव्यवसायो यः स लिङ्गदर्शनात् सञ्जायमानो लैङ्गिकमिति वृत्तिकारः।"—चन्द्रानन्दरचिता वृत्तिः पृ० ६९ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मुद्धृतं तत् कथञ्चित् [1]प्रशस्तपादभाष्येन कथञ्चिच पृ० १९१ पं० २६ इत्यत्र जिनेन्द्रबुद्धिनोद्धृतेन वचनेनार्थतस्तुल्यम्। अतः सर्वेऽप्येते वैशेषिकसूत्राणां कञ्चन प्राचीनं **वृत्तिकार**मनुसृत्यात्र प्रवृत्ता इति प्रतिभाति। प्रशस्तमतिरिति प्रशस्तपादस्य नामान्तरं सम्भाव्यते, प्रशस्तमतिना च वैशेषिकसूत्रवाक्यभाष्यटीका प्रणीतेति [2]प्रागावेदितमेव। अतोऽयं वृत्तिकारः प्रशस्तमतिरपि भवेदिति सुधीभिर्विभावनीयम्।

एवं च प्रशस्तपादो दिङ्नागात् प्राचीनः सम्भाव्यते। न च **प्र**शस्तपादः **प्र**शस्तपादभाष्ये क्वापि **दि**ङ्नागमतं निराकरोति। **दि**ङ्नागोऽपि **प्र**माणसमुच्चयवृत्तौ **प्र**शस्तपादमतं न क्वापि साक्षात् परामृशति, केवलं [3]द्वित्रेषु स्थानेषु दिङ्नागेन निर्दिष्टस्य पूर्वपक्षस्य काचिच्छाया **प्र**शस्तपादभाष्ये दृश्यत इत्यपि सुधीभिर्विभावनीयम्।

पृ० १९६ पं० ११-१३ इत्यत्र **जि**नेन्द्रबुद्धिना निर्दिष्टमन्येषां मतं **प्र**शस्तपादमतेन कथञ्चित् तुल्यमित्यपि ध्येयम्।

विस्तरार्थिभिस्तु विलुप्तप्रायं प्राचीनं वैशेषिकमतमुद्धर्तुमस्माभिः सङ्कलितं सप्तमं परिशिष्टमेव विलोकनीयम्।

**जैनग्रन्थसंग्रहात् प्राचीनसूत्रपाठस्य वृत्तेश्च प्राप्तिः**

**प्रशा**स्तपादविरचितपदार्थधर्मसंग्रहप्रभावाद् न केवलं वैशेषिकसूत्रस्य प्राचीनव्याख्यानां विलोप एव समजनि, अपि तु प्राचीनव्याख्यानामभावाद् वैशेषिकसूत्रपाठोऽपि वैरूप्यमापन्नः। एतच्चास्माभिर्द्वितीये तृतीये च परिशिष्टे विस्तरेणोपदर्शितम्। अत एव सूत्रार्थनिर्णयोऽपि दुष्करस्तत्र तत्र सञ्जातः।

अतो वैशेषिकशास्त्ररसिकानां विदुषां सौभाग्यात् प्राचीनजैनग्रन्थभाण्डागारतः प्राचीनवैशेषिकसूत्रपाठेन सह समुपलब्धेयं **चन्द्रानन्द**रचिता वैशेषिकसूत्राणां प्राचीना वृत्तिर्वैशेषिकशास्त्ररसिकेभ्योऽमन्दानन्ददायिनी भविष्यतीति बाढमाशास्महे।

---

१ "लिङ्गदर्शनात् सञ्जायमानं लैङ्गिकम्॥"— प्रशस्तपादभाष्यं पृ० ९९। तुलना— "यच्चोक्तम्—अभूतादिप्रतीतिर्लिङ्गम्"— पृ० १८७ [अत्र सप्तमे परिशिष्टे]॥

२ प्रस्तावना पृ० ८॥

३ तुलना—दृश्यतां पृ० १९९ टि० ९, १०। "एवं सर्वत्र देशकालाविनाभूतमितरस्य लिङ्गम्" —प्रशस्तपादभाष्यं पृ० १०३। "अपेक्ष्य देशं कालं च तदेवाविनाभावित्वम्" इति दिङ्नागः, पृ० १८६ पं० १३॥

1. आत्रेय-प्रशस्तपादादयस्तु कारणगुणपूर्वकाः पृथिव्याम् इति सूत्रं कार्यपृथिवीरूपादीनां कारणगुणपूर्वकत्वप्रतिपादकम्। वह्निसंयोग[ात् पाक]जाश्चेति सूत्रं तु परमाणुपृथिवीरूपादीनां पाकजत्वप्रतिपादकमिति व्याचक्षते। *Vais'eṣikadars'ana*, Mithila Institute, p. 65.

2. Cf. *Vyomavatī*, pp. 20 Ca, 462; *Nyāyalīlāvatī* NSP, pp. 23 & 31 & *Citsukhī*, Kāsī Ed., 1956 p. 515. etc. etc.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

sometimes we find it referred to as a Sūtra-work also.[1]

The *Sūtras* of Kaṇāda possibly remained negleted for long. We hear of a *Bhāradvājavṛtti* on them. It may be identical with the *Vṛtti* quoted by Candrānanda[2] or by S'aṅkaramis'ra[3]. But we have no evidence to establish this identity. S'aṅkaramis'ra does not attach much importance to the *Vṛtti* before him as he is found to regret not to have any important commentary to depend upon[4]. It is also quite probable that the *Vṛtti* quoted by S'aṅkar is different from that utilised by Candrānanda. The last two chapters of an anonymous *Vais'eṣikasūtravṛtti* written under the patronage of king Vallālasena (c. 1158-1178A D.) are extant in manuscripts. It seems to have been influenced by the Nyāya theories and no influence of ancient Vais'eṣika tradition is visible in it. Ṣaṅkaramis'ra's *Upaskāra* is available in print for the last one hundred years. His *Sūtrapāṭha* and interpretation were generally taken as authoritative. MM. Dr. Gopinātha Kaviraja and Pt. Vīrarāghavācārya felt the necessity of a critical edition of the *Vais'eṣikasūtras*[5]. The materials available from various sources now point out that S'aṅkara does not always preserve the ancient Vais'eṣika tradition and that his *Sūtrapāṭha* is also defective The work under consideration wonderfully agrees with the ancient *Sūtrapāṭha* as preserved in the *Kaṇādasūtranibandha* of Bhaṭṭavādīndra or to its Summary as published by the Mithilā Institute.[6]

---

1. Cf. नित्यद्रव्यवृत्तयोऽन्त्या विशेषाः ( *PDS*, Viz. Series p. 13. ) इति सूत्रम् and तत एवायुतसिद्धानाम् ( *PDS*, Viz. Series p. 14. ) इति सूत्रे । The second is called a sūtra by Devabhadra also. Cf. *Nyāyāvatāraṭippaṇaka*, Ed. Dr. P. L. Vaidya, p. 1.

2. *Candrānandavṛtti*, IX. 18 ( p. 69 ) & IX. 21 ( p. 70 ).

3. *Vais'eṣikasūtropaskāra* I.i. 2; I.ii. 3; I.ii. 6; III.i. 17; IV.i. 7; VI i. 5; IV.i. 12; VII.i. 3.

4. Cf. सूत्रमात्रावलम्बेन निरालम्बेऽपि गच्छतः । खे खेलवन्ममाप्यत्र साहसं सिद्धिमेष्यति । *Ibid*, p. 1.

5. (*a*) Sarasvatībhavana Studies, Vol. VII, p. 71. (*b*) Intro: *Vais'eṣikadars'ana*. p. 10.

6. *Vais'eṣikadars'ana* with *Vyākhyā*, 1957, Cf. Bhaṭṭavādīndra as a Vais'eṣika, JOI, Baroda, Vol. X.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Candrānanda's *Sūtrapāṭha* further agrees with the ancient *sūtra* readings available in the works of Uddyotakara, Mallavādin etc.

We propose to give below a few prominent instances showing (a) the agreement of Candrānanda and Bhaṭṭavādīndra and (b) their difference from S'aṅkaramis'ra's text.

(1) Candrānanda is one with the author of the *Vyākhyā* in not accepting धर्मविशेषप्रसूतात्......l. i. 4 (S'aṅkara's version) as a sūtra. It has not been accepted as such by any other authority prior to S'aṅkaramis'ra. Probably this has come to S'aṅkara from the *Padārthadharmasaṃgraha.*[1]

(2) Candrānanda and Bhaṭṭavādindra (कारणवतो॰ II. ii. 28) have कारणतो विकारात् in II. ii. 34 and they are supported by Uddyotakara (Cf. *Nyāyavārtika,* Cal. Sans. Series, p. 228) It is now clear that अनित्यश्चायं and न चासिद्धं in II. ii. 28 & 29 have been introduced from some earlier commentary in S'aṅkara's sūtra-text.

(3) अभूतमभूतस्य is a part of III. i, 8 in the present text while it is an independent *sūtra* in the *Vyākhyā* (III. i. 16). The *Ṣyādvāda-ratnākara* (p. 532) accepts it as such though it is absent in the Upaskāra-version.

(4) Another part of III. i, 8 i. e., कारणं कारणान्तरस्य is a separate *sūtra* (III. 1. 12) in the *Vyākhya.* S'aṅkara does not recognise it.

(5) अद्रव्यवत्त्वात् परमाणावनुपलब्धिः (Candrananda's text, IV. i. 7) is absent in S'aṅkara's text. It is there in the *Vyākhyā* (IV. i. 6). Uddyotakara (*Nyāyavārtika,* Cal. Sans. Series, p. 490) and Kamalas'īla (*Tattvasaṃgrahapañjikā,* GOS, p. 41) also accept it as a *Vais'eṣikasūtra.*

(6) न चास्मद्बुद्धिभ्यो लिङ्गमृषेः is a separate sūtra (VI. i. 2) in the present text but it is absent in the *Upaskāra* version. It has its counterpart in the *Vyākhyā* (VI. i. 2) and has also been mentioned as a *sūtra* in the *Kiraṇāvalī* (Bāraṇasī Edn. p. 315) and the *Nyāyakandalī* (Viz. Series, p. 216) with some variation in readings.

---

1. Cf. द्रव्यगुणकर्मसामान्यविशेषसमवायानां षण्णां पदार्थानां साधर्म्यवैधर्म्यतत्त्वज्ञानं निःश्रेयसहेतुः। तच्चेश्वरचोदनाभिव्यक्ताद् धर्मादेव। *PDS,* Viz. Series, pp. 6 f.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(7) The *Padārthdharmasamgraha* ( p. 139, Viz. Series ) and its Commentaries ( Cf. *Kandalī,* Viz. Series p. 142; *Kiraṇāvalī,* Bārāṇasī Ed. p. 221; & *Vyomavatī,* CSS, p. 486 ) agree with the present text to hold तथा भवतीति सापेक्षेभ्यो निरपेक्षेभ्यश्च ( X. 7 ) as a *Vais'eṣikasūtra.* S'aṅkara omits it. The *Vyākhyā,* available upto IX. i. only offers no help here. The anonymous *Vṛtti,* mentioned before accepts it as a *sūtra.*

(8) But in one case ( सामान्यविशेषेषु सामान्यविशेषाभावात् तत एव ज्ञानम् VIII. 5 ) we find Candrānanda agreeing with the *Upaskāra* version ( VIII. i. 5 ). Uddyotakara ( *Nyāyavārtika,* Cal. Sans. Series, p. 668 ) and Jayarās'i ( *Tattvopaplavasiṃha,* GOS, p. 7 ) accept it. The *Vyākhyā* does not recognise it.

In a few cases, where Canrānanda's sūtra-text differs from that of S'aṅkara, the sūtras are found actually present in the *Vyākhyā,* though they could not be distinguished in the Mithila Institute Edition[1].

In five cases the anouymons Bengal *Vṛtti* is found to support Candrānanda's *Sūtrapāṭha*[2], though other authorities are of no help.

The above, when considered along with the agreement of the present sūtra-text with that utilised by Mallavādin ( See foot-notes. ), will suffice to show that Candrānanda's sūtra-tradition is closer to the ancient *Vais'eṣikasūtrapāṭha.*

But Candrānanda's sūtra-text also presents a difficult problem. He gives a number of *sūtras*[3] the authenticity of which is not

1. (*a*) गुणलक्षणं चोक्तम् VII. i. 2. Cf. *Vyākhyā*, p. 63.
   (*b*) इदमेवंगुणमिदमेवंगुणमिति चोक्तम् VII. i. 3. Cf. *Ibid.*, p. 63.
   (*c*) पृथिव्यां रूपरसगन्धस्पर्शा अनित्या एव VII. i. 4. Cf. *Ibid.*, p. 63.
   (*d*) अग्निसंयोगाच्च VII. i. 5. Cf. *Ibid.*, p. 63.
   (*e*) कारणकारणं च VIII. 4. Cf. *Ibid.*, p. 75.
   (*f*) तथा द्रव्यगुणकर्मसु कारणाविशेषात् VIII. 11. Cf. *Ibid.*, p. 77.
2. Cf. Candrānanda's text IX. 15; X. 1; X. 5; X. 6 and X. 19.
3. (*a*) तस्मिन् द्रव्यं कर्म गुण इति संशयः II. ii. 25.
   (*b*) अभावात् II. ii. 33.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

attested by any other source known to us. Minor disagreements in the readings have been shown in the foot-notes. In some cases more than one sūtras of other sūtra-texts form single units in Candrānanda's version. Thus, I. i. 20 consists of two sūtras, II. i. 24 of two and III. i. 8 of seven sūtras.

The following comparative table will give a general idea with regard to the difference in the number of the sūtras in the three main versions as found in the *Upaskāra*, the *Vyākhyā* and the *Vṛtti* of Candrananda:

| Chapter | Upaskāra | Vyākhyā[1] | Vṛtti |
|---|---|---|---|
| I | 31+17=48 | 31+16=47 | 29+18=47 |
| II | 31+37=68 | 32+37=69 | 28+43=71 |
| III | 19+21=40 | 21+14=35 | 14+17=31 |
| IV | 13+11=24 | 12+10=22 | 14+19=23 |
| V | 18+26=44 | 16+24=40 | 18+28=46 |
| VI | 16+16=32 | 14+18=32 | 18+19=37 |
| VII | 25+28=53 | 27+28=55 | 32+31=63 |
| VIII | 11+ 6=17 | 12+ 5=17 | 17 |
| IX | 15+13=28 | 7+ 0= 7 | 28 |
| X | 9+ 7=16 | 0 | 21 |

One thing more should be noted in connection with the Sūtra-text of Candrānanda. In all other editions and commentaries, the *Vais'eṣikasūtras* have been divided into ten chapters.

(*c*) संख्याभावात् II. ii. 39.
(*d*) तद्विशेषेणादृष्टकारितम् V. ii. 4.
(*e*) गुणान्तरप्रादुर्भावात् VII. i. 6.
(*f*) अगुणवतो द्रव्यस्य गुणारम्भात् कर्मगुणा अगुणाः VII. i. 12.
(*g*) तयोर्नित्यानित्यत्वे तेजसो रूपस्पर्शाभ्यां व्याख्याते VII. ii. 2.
(*h*) निष्पत्तिश्च VII. ii. 3.
(*i*) दृष्टत्वादहेतुप्रत्ययः VII. ii. 21.
(*j*) तथा प्रत्ययाभावः VII. ii. 22.
(*k*) संबन्धसंबन्धादिति चेत् सन्देहः VII. ii. 23.
(*l*) नास्त्यन्यश्चन्द्रमा इति चन्द्रमसि प्रतिषेधः IX. 11.
(*m*) सदसतोर्वैधर्म्यात् कार्ये सदसत्ता न IX. 12.

1. The table gives the numbers according to the printed text.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Each chapter again is split up into two daily lessons ( *Āhnikas* ). But Candrānanda presents a unique departure. In his text, Chapters I-VII have two *Āhnikas* each while Chapters VIII-X show no such division. This cannot be a mere scribal error. The *Sarvadarśanasaṃgraha* attributed to Mādhavācārya also seems to give a similar indication. Its table of contents of the *Aulūkyadarśana* gives the subject-matter of the first seven Chapters with specific mention of two *Āhnikas* in each case. In the last three Chapters, it is silent about mentioning the *Āhnikas*[1]. The last two Chapters of the anonymous *Vṛtti* consulted by us also do not refer to *Āhnikas* and support Candrānanda in this respect. It may now be concluded that Candrānanda followed a tradition which did not divide the last three Chapters into *Āhnikas*.

C. *The Exegetical Problem*

We have just shown that the concise and systematic *Padārthadharmasaṃgraha* of Praśastapāda attracted the scholars and the older works based on the Sūtras were neglected. It preserved the traditional Vaiśeṣika tenets, but exerted a very bad influence upon the *Sūtras* which were not studied with the attention they deserved. The only feeble link between the old sūtra–tradition and the modern commentators seems to be supplied by the *Vṛtti* or *Vṛttis* utilised by Candrānanda and S'aṅkara. But S'aṅkara attaches little importance to the *Vṛtti* before him as he says that 'he had the *sūtras* alone in his hand' (Sūtramātravalambena) when he wrote the *Upaskāra*. As the modern commentators had no regular commentary on these *Sūtras* before them, they had to depend mostly upon their knowledge of other systems of Indian philosophy in order to give some interpretation to the *Vaiśeṣikasūtras*.

Thus S'aṅkaramiśra in the *Upaskāra* and his followers,

1. आह्निकद्वयात्मके प्रथमाध्याये...आह्निकद्वययुक्ते द्वितीयाध्याये...आह्निकद्वययुक्ते तृतीयाध्याये... आह्निकद्वययुक्ते चतुर्थाध्याये...आह्निद्वयवति पञ्चमे...आह्निकद्वयशालिनि षष्ठे...तथाविधे सप्तमे...प्रथमे ...द्वितीये... । अष्टमे निर्विकल्पकसविकल्पकप्रत्यक्षप्रमाणचिन्तनम् । नवमे बुद्धिविशेषप्रतिपादनम् । दशमेऽनुमानभेदप्रतिपादनम् । *Sarvadarśanasaṃgraha*, BORI, p. 211–2.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jayanārāyaṇa Tarkapañcānana and Pañcānana Tarkaratna in the *Vivṛti* and the *Upaskāraparişkāra* respectively show marked influence of the Neo-logical system. Candrakānta Tarkālaṅkāra gives it an advaitic interpretation in his '*Bhāṣya.*' The *Bhāradvājavṛttibhāṣya* of Gaṅgādhara Vaidya shows the influence of *Sāmkhya*, *Vaidyaka* etc. The traditional interpretation of the *Vais'eşikadars'ana* is, therefore, partly vitiated. Here also the *Vyākhyā* and the *Vṛtti* of Candrānanda are of immense help. Their interpretations are often supported by ancient sources including the Jaina and Buddhist texts. Candrānanda shows close acquaintance with the *Padārthadharmasamgraha* of Pras'astapāda and is singularly free from non-Vais'eṣika bias.

*The Commentator*

As regards the author of the commentary we know very little. The concluding verse shows that his name was Candrānanda and that he was a source of delight to the learned. A study of the commentary substanciates his claim. He was well-versed in various s'āstras including the Vedic texts and the *Purāṇas* from which he is found to quote. Among the philosophical works, our author once quotes a passage from the *Nyāyavārtika* of Uddyotakara (p. 29). It may incidentally be remarked here that the *Nyāyavārtika* preserves some ancient views of the Vais'eṣikas including fragmentary explanations of a few *Vais'eṣikasūtras*[1]. We have already noted that one *Vais'eṣikasūtravṛtti* also was known to Candrānanda. One *Vais'eṣikasūtravṛtti* has been utilised by S'aṅkaramis'ra also. Candrānanda must have been different from the author of this *Vṛtti* as none of the fragments preserved by S'aṅkaramis'ra occurs in the work presented here.

Candrānanda does not show any knowledge of neo-logical speculations. This may either be due to his ancient date prior to the flourish of the neo-logical school of Mithila or to his belonging to a part of the country which remained uninfluenced by neo-logic even after its growth. The former alternative seems to be probable.

---

1. Vide Uddyotakara as a Vais'eṣika–Proceedings and Transactions, A I O C, Bombay Session, 1949, pp. 326–334.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Bhaṭṭavādīndra was a southerner but as a commentator of the *Kiraṇāvalī* he belongs to the Maithila school and Udayana's influence is visible in the *Vyākhyā* also. But Candrānanda gives no such clue to fix up his affiliation, date or birth-place.

The Commentary is lucid. It explains all the sūtras and does not enter into intricacies introduced by other commentators of the Sūtras. Thus he passes over the minute discussions on *dvitva, pākajotpatti, vibhāgajavibhāga* etc., a knowledge of which is essential for a Vais'eṣika scholar even to-day.

Candrānanda's *Vṛtti* did not receive the circulation, it deserves and we find no mention of him in later Vais'eṣika literature.

*Conclusion*

The present volume will be a valuable addition to the too few works on the Vais'eṣika system available in print. The learned editor spared no pains to make it useful by adding learned foot-notes and a number of important appendices including portions of ancient texts restored from Tibetan, while he was under a serious handicap like the bereavement at the sad demise of his revered father and Gurudeva (in the worldly and spiritual lives respectively), His Holiness Munirāja S'RĪ BHUVANAVIJAYAJI MAHĀRĀJA at the famous Jaina Tīrtha (holy place) of S'rī S'aṅkhes'vara PĀRS'VANĀTHA (Gujrat) on 16th February, 1959. The learned editor derived constant and earnest help in all his actvities from his Gurudeva. It was at the instance of the late Munirāja that the learned editor took up this onerous task (in 1957), the accomplishment where of has also been possible through his profouud grace and active help. May His blessings from heaven give the editor more strength in his endeavour to propagate the lost treasures of the S'āstras.

Mithila Institute
**Darbhanga**
(Bihar)

**Anantalal Thakur**
Buddhapūrṇimā, 1961

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥ ॐ अर्ह ॥

चन्द्रानन्दविरचितया प्राचीनया वृत्त्या समलङ्कृतं

## कणादप्रणीतं

# वैशेषिकसूत्रम् ।

## प्रथमस्याध्यायस्य प्रथममाह्निकम् ।

**अथातो धर्मं व्याख्यास्यामः ।१।१।१।**

कस्यचिद् ब्राह्मणस्य वेदाभ्यासवशेन व्यपगतकल्मषस्येदं वेदवाक्यं प्रतिबभौ "अशरीरं वाव सन्तं प्रियाप्रिये न स्पृशतः" [ छान्दोग्योप० ८ । १२ । १ ] इति । तत इदं वाक्यमालोच्य कणभक्षमाजगाम । ततोऽभ्युवाच—भगवन्! अनेन वाक्येन [1]अपहतशरीरस्य क्षेमसाधनता कथ्यते, तदुच्यताम्—क उपाय इति । ततो मुनिरभ्युवाच — धर्म इति । ततो जगाद ब्राह्मणः—को धर्मः, कथं लक्षणः कान्यस्य साधनानि, किम्प्रयोज[2]नः, कांश्च प्रत्युपकरोतीति । अत एभ्यः प्रश्नेभ्योऽनन्तरं धर्मव्याख्यानप्रतिज्ञायाम् 'अथ'शब्द आनन्त[3]र्यमभिधत्ते । 'अतः'शब्दोऽपि वैराग्यप्रज्ञाकथापरिपाकादिकां शिष्यगुणसम्पदं हेतुत्वे[4]नापदिशति, यस्मादयं शिष्यो गुणसम्पदा युक्तस्ततोऽस्मै प्रश्नेभ्योऽनन्तरं धर्मं व्याख्यास्यामः ।

को धर्म इत्याह—

**यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः ।१।१।२।**

---

१ °व्यपहत° O. । २ °जनं P. । ३ °न्तर्य(या?)र्थमभि° O. । ४ °नोपदि° P. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यागदेवतापूजादिक्रियाणामाज्यपुष्पादिनिर्वर्त्यानां तदैव विनष्टत्वादुत्तरकालं फलदानाशक्तेर्यस्माद्धेतोरभ्युदयनिःश्रेयसे भवतः स धर्म इति बोद्धव्यः। अभ्युदयो ब्रह्मादिलोकेष्विष्टशरीरप्राप्तिरनर्थोपरमश्च। निःश्रेयसमध्यात्मनो वैशेषिकगुणाभावरूपो मोक्षः।

कुत एवंलक्षणो धर्मो ज्ञायत इति चेत्, आम्नायात्। तस्य प्रामाण्यं कथमित्याह—

**तद्वचनादाम्नायप्रामाण्यम्। १। १। ३।**

तदिति हिरण्यगर्भपरामर्शः, हिरण्यं रेतोऽस्येति कृत्वा भगवान्[2] महेश्वर एवोच्यते। आप्तेनोक्तत्वस्य सत्यताव्याप्तत्वादिहाप्तेन हिरण्यगर्भेणोक्तत्वादाम्नायस्य प्रामाण्यं साध्यते। ईश्वरश्च साधितस्तनुभुवनादीनां कार्यतया घटादिवद् बुद्धिमत्कर्तृकत्वानुमानेन।

उक्तं धर्मस्वरूपं तल्लक्षणं च। साधनान्यस्येदानीं द्रव्य[3]गुणकर्माणि वक्ष्यामः। तत्र

**पृथिव्यापस्तेजो वायुराकाशं कालो दिगात्मा मन इति द्रव्याणि। १। १। ४।**

द्रव्यत्वाभिसम्बन्धाद् द्रव्याणि। *पृ[4]थिवीत्वाभिसम्बन्धात् पृथिवी। ए[5]वमबादिसंज्ञा। 'नवैव द्रव्याणि,* नाधिकानि' इत्येव[6]मर्थम् 'इति'शब्दः।

एवमुद्दिष्टानि द्रव्याणि। के पुनर्गुणा इत्याह—

**रूप-रस-गन्ध-स्पर्शाः सङ्ख्याः[7] परिमाणानि पृथक्त्वं संयोगविभागौ परत्वापरत्वे बुद्धयः सुखदुःखे इच्छाद्वेषौ प्रयत्नश्च[8] गुणाः। १। १। ५।**

एते सप्तदश कण्ठोक्ता रूपादयो गुणाः 'च'शब्दसमुच्चिताश्च गुरुत्व-द्रवत्व-स्नेह-संस्कार-धर्माधर्म-शब्दा गृह्यन्ते। एते यथावसरमुत्तरत्र वक्ष्यन्ते।

कानि पुनः कर्माणीत्याह—

**उत्क्षेपणम[9]वक्षेपणमाकुञ्चनं प्रसारणं गमनमिति कर्माणि। १। १। ६।**

---

१ लोकेषु चेष्ट° O.। २ श्रीभग° O.। ३ द्रव्याणि वक्ष्यामः P.। ४ * * एतच्चिह्नान्तर्गतः पाठः P मध्ये नास्ति। ५ एवं एवमबादिसंज्ञा O.। ६ °मर्थ इतिशब्दः P.। ७ सङ्ख्या O. P. सूक्ति पृ० ४७। ८ प्रयत्नाश्च O. उ. सूक्ति पृ० ४७। ९ °मपक्षे° O.।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एतान्येव पञ्च कर्माणि द्रष्टव्यानि । 'गमन'ग्रहणाद् भ्रमणरेचनादीनां ग्रहणम् । एवमुद्दिष्टानि द्रव्यगुणकर्माणि । तदनुषङ्गात् सामान्य-विशेष-समवाया अपि वक्ष्यन्ते । एवं षण्णां पदार्थानां साधर्म्यवैधर्म्यपरिज्ञानं विषयदोषदर्शनद्वारेण वैराग्योत्पत्तौ सत्यां निःश्रेयसे साध्ये धर्महेतुः । अभ्युदये साध्ये धर्महेतुत्वं पुनरमीषां 'समे यजेत' [ ] इति पृथिव्याः, '[1]अघोऽम्बूनि नयति' [ ] इत्यादि यथास्वमन्येषां द्रव्याणाम् । गुणानां तु 'कृष्णमालभेत' [ ] इत्यादि । कर्मणां तु 'व्रीहीनवहन्ति' [ ] इत्यादि ।

[2]विज्ञातसाधर्म्यवैधर्म्याणां च द्रव्यादीनामभ्युदयनिःश्रेयसहेतुत्वात् साधर्म्यं तावत् कथयति—

**सदनित्यं द्रव्यवत् कार्यं कारणं सामान्यविशेषवदिति द्रव्यगुणकर्मणामविशेषः । १ । १ । ७ ।**

'सद् द्रव्यं सन् गुणः सत् कर्म' इति सत्ता त्रयाणामविशेषः । तथैवानित्यत्वमन्यत्राकाशादिभ्यः । द्रव्यवदिति समवायिकारणवत्त्वमविशेषः परमाण्वाकाशादिवर्जम् । कार्यत्वमभूत्वा भवनं तथैवाविशेषोऽन्यैत्र[3] नित्यद्रव्येभ्यः । कारणत्वं कार्यजनकत्वं त्रयाणामविशेषः, क्षित्यादीनि द्रव्यगुणकर्मणां समवायिकारणम्, आकाशादीनि गुणानाम्, मनोऽन्त्यावयविद्रव्ये गुणकर्मणाम् । गुणास्तु रूप-रस-गन्धानुष्णस्पर्श-सङ्ख्या-परिमाणैकपृथक्त्व-स्नेह-शब्दा असमवायिकारणम्, बुद्धि-सुख-दुःखेच्छा-द्वेष-प्रयत्न-धर्माधर्म-भावना निमित्तकारणम्, संयोग-विभागौष्ण्यगुरुत्व-द्रवत्व-वेगा उभयथा कारणम् । परत्वापरत्व-द्वित्व-द्विपृथक्त्व-पारिमाण्डल्यादयोऽकारणम् । कर्माणि संयोग विभागेषु असमवायिकारणम् । सामान्यानि च तानि द्रव्यत्वादीनि विशेषाश्च त इति सामान्यविशेषाः, तद्वत्ता त्रयाणामविशेषः ।

[4]त्रयाणामेकत्वे प्राप्ते वैधर्म्यमुच्यते । तथाहि—

**द्रव्याणि द्रव्यान्तरमारभन्ते । १ । १ । ८ ।**

द्रव्ये च द्रव्याणि चेति विग्रहादेकमनारम्भकम् । समवायिकारणानि द्रव्याणि

१ अपोंबूनि P. । २ निर्ज्ञातसा° O. । ३ °न्यत्र हि नित्य° O. । ४ त्रयाणामेकत्वप्राप्तेः साधर्म्यमुच्यते तथाहि O. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वात्मव्यतिरिक्तं कार्यद्रव्यमारभन्ते । आकाशाद्यन्त्या[1]वयविद्रव्याणि तु द्रव्यं नारभन्ते, तुल्यजातीयानां मूर्तिक्रियारूपादिमतां द्वयोर्बहूनां वा कारणानां कार्यारम्भकत्वात् । न चैवंविधान्याकाशादीनि । मनसोऽस्पर्शवत्त्वाद् द्रव्याकारणत्वमन्त्यावयविद्रव्याणां चादृष्टत्वात् ।

## गुणाश्च गुणान्तरम् । १ । १ । ९ ।

गुणौ च गुणाश्चेति पूर्ववत् । यथा तन्तुरूपादयः स्वाश्रयसमवेते पटद्रव्ये रूपादिगुणानात्मव्यतिरिक्तानारभन्ते ।

## कर्म कर्मसाध्यं न विद्यते । १ । १ । १० ।

न कर्मणा कर्म जन्यते, कर्मणामुपरमदर्शनात् । कर्मारम्भे हि कर्मणां निष्क्रमणो द्रव्यस्यानु[2]पलम्भः स्यात् । एवं च कानिचिद् द्रव्याण्यारम्भकाणि, कानिचिन्नैव । गुणाः केचित् कारणम्, केचिन्नैव । कर्माणि नैव कर्मकारणमित्येतद् वैधर्म्यम् ।

वैधर्म्यान्तरमाह—

## कार्याविरोधि द्रव्यं कारणाविरोधि च । १ । १ । ११ ।

विनाशो विरोधः प्रतिबन्धः, क्वचिद् द्रव्यादिना[3] कार्येण कारणद्रव्यं समवायिसमवायिकारणा[4]भ्यां च न विरुध्यते । तथाहि—अङ्गुलिद्रव्यं कार्यं द्व्यङ्गुलं जनयिष्यत् तदर्थेन कर्मणा तत्कृतेन संयोगेन ततो जातेन द्व्यङ्गुलेन न विरुध्यते नापि समवायिसमवायिकारणाभ्यां पूर्वं[5] तत्संयोगाभ्यां वा, मनोऽन्त्यावयविद्रव्याणि गुणकर्मभिः कार्यैः, आकाशादीनि गुणैः, नित्यत्वादेषां न कारणविरोधः ।

## उभयथा गुणः । १ । १ । १२ ।

कार्यकारणोभयानुभयैरविरोधी विरोधी च । परमाणुद्व्यणु[6]काद्यन्त्यावयविद्रव्येषु रूपादयः कार्योभयकारणैर[7]विरोधिनो यथासम्भवम् । रूप-रस-गन्ध-स्पर्शा अकार्यकारणभूता अविरोधिनः परस्परेण । विरोधिन आद्यमध्यान्त्यशब्दाः कार्योभयकारणैः, अदृष्टः कार्येण, स्पर्शवद्द्रव्यसंयोगेन वेगप्रयत्नौ, संयोगविभागौ सुखदुःखे इच्छाद्वेषौ परस्परतो-

---

१ आकाशान्त्यावय° O । २ °पलम्भात् । एवं कानिचिद् P. । ३ द्रव्यादिकार्येण O । ४ °णभ्यां न विरुध्यते O. । ५ पूर्ववत्संयो° O. । ६ °णुकान्त्यावय° O. । ७ कार्योभयकारणैर्विरोधिनः O. । कारणैरविरोधिनः P. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ऽकार्यकारणभूतौ विरुध्येते, ज्ञानं संस्कारसन्तानप्रतिपक्षैः, संस्कारो ज्ञानमददुःखादिभिरिति यथासम्भवमेतद् द्रष्टव्यम् ।

**कार्यविरोधि कर्म । १ । १ । १३ ।**

संयोग-विभाग-संस्काराणां कार्याणां मध्यात् संयोगेनैव कर्म विरुध्यते, न विभाग-संस्काराभ्यां[1] संयोगानुत्पत्तिप्रसङ्गात् ।

वैधर्म्यान्तरमपि—

**क्रियावद् गुणवत् समवायिकारणमिति द्रव्यलक्षणम् । १ । १ । १४ ।**

उत्क्षेपणादिकं कर्म क्रिया यथासम्भवं यस्मिन् यत्[2]समवायेन वर्तते तत् क्रियावत् अन्यत्राकाशकालदिगात्मभ्यः । गुणा रूपादयो यत्र यथासम्भवं वर्तन्ते तद् गुणवत् । अयुतसिद्धानामाधार्याधारभूतानाम् 'इह' इति यतः [स] समवायः, स यस्यास्ति तत् समवायि, कारणं च तदेव, समवायिनो वा कार्यस्य कारणम् । तत्र क्षित्यादीनि त्रयाणां द्रव्यगुणकर्मणां समवायिकारणम्, आकाशादीनि गुणानाम्, मनोऽन्त्यावयविद्रव्ये गुणकर्मणाम् ।

**द्रव्याश्रयी अगुणवान् संयोगविभागेष्वकारणमनपेक्ष इति गुणलक्षणम् । १ । १ । १५ ।**

द्रव्यमाश्रयतीति द्रव्याश्रयी, अगुणवान् निर्गुणः, संयोगविभागेष्वकारणमनपेक्ष इति सापेक्षः[3] कारणम् । तथाहि—अङ्गुल्योराकाशसंयोगो द्व्यङ्गुलाकाशसंयोगे कर्त्तव्ये द्व्यङ्गुलोत्पत्तिमपेक्षते, अङ्गुल्योः परस्परविभागो द्व्यङ्गुलाकाशविभागं प्रति कार्यविनाशमपेक्षते, एवं संयोगविभागलक्षण एव गुणः संयोगविभागेषु सापेक्षः[4] कारणम् ।

**एकद्रव्यमगुणं संयोगविभागेष्वनपेक्षं कारणमिति कर्मलक्षणम् । १ । १ । १६ ।**

एकमस्य कर्मणो द्रव्यमाश्रयः, न द्वे, एकमेव वा द्रव्ये वर्तत इत्येकद्रव्यम् । नास्य गुणाः सन्तीत्यगुणम् । संयोगविभागेषु कार्येषु स्वस्याश्रयस्यान्यतो विभज्याश्रयान्तरेण संयोजनादुत्पाद्यविनाश्यानपेक्षया संयोगविभागेष्वनपेक्षं कारणमिति ।

वैधर्म्यान्तरमपि—

---

१ °राभ्यामनुत्पत्ति° O.। २ अत्र 'यत्' अनावश्यकं भाति। ३ सापेक्षकारणम् P.। ४ सापेक्षकारणम् O.।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**द्रव्यगुणकर्मणां द्रव्यं कारणं सामान्यम् । १ । १ । १७ ।**

'सामान्य'शब्दः समानपर्यायः । क्षित्यादीनि त्रयाणां कारणं समानम् । आकाशादीनां केवलगुणकारणत्वेऽपि एकैकस्यानेकगुणत्वादाकाशादीनि समानं गुणेषु कारणम्, मनोऽन्त्यावयविद्रव्ये गुणकर्मणाम् ।

**तथा गुणः । १ । १ । १८ ।**

'संयोगानां द्रव्यम्'[१ । १ । २५] इति 'अग्निसंयोगाद् गुणान्तरप्रादुर्भावात्' [७ । १ । ५, ६] इति 'आत्मसंयोगप्रयत्नाभ्यां हस्ते कर्म' [५ । १ । १] इति वाक्येभ्यः संयोग एव द्रव्यगुणकर्मणां समानं कारणं नान्यो गुणः । तथाहि—तूलपिण्डस्य वेगवता तूलेन संयोगात् कर्म, द्वितूलकद्रव्यम्, तत्र च परिमाणं महदुत्पद्यतेऽन्ये गुणा यथायोगम् ।

**संयोगविभागानां कर्म । १ । १ । १९ ।**

स्वाश्रयमन्यतो विभज्य आश्रयान्तरेण संयोजयति अतः संयोगविभागानां समानं कारणं कर्म ।

**न द्रव्याणां व्यतिरेकात् । १ । १ । २० ।**

यदि खलु द्रव्यस्य कारणं कर्म भवेत् तथा सति कृत्वापि संयोगं न निवर्तेत, निवृत्ते[1] तु कर्मणि केवलस्य संयोगस्योपलम्भात् मन्यामहे 'न द्रव्यकारणं कर्म' ।

**गुणवैधर्म्यान्न कर्मणाम् । १ । १ । २१ ।**

गुरुत्वद्रवत्वनोदनाभिघातसंयुक्तसंयोगाः स्वाश्रये पराश्रये च कर्मकारणम्, प्रयत्नादृष्टौ तु पराश्रय एव । तत्र तावत् कर्म [न] स्वाश्रये कर्मकारणम्, निष्क्रियद्रव्यानुपलब्धिप्रसङ्गात् । नापि पराश्रये, तत्संयोगेनैव निवर्तितत्वात् । तस्मादेतैः कर्मकारणैर्गुणैर्वैधर्म्यान्न कर्म कर्मकारणम् ।

अपरं वैधर्म्यम्—

**द्रव्याणां द्रव्यं कार्यं सामान्यम् । १ । १ । २२ ।**

सजातीयानां द्वयोर्बहूनां वा द्रव्याणां द्रव्यं तन्तूनामिव पटः समानं कार्यम् ।

**द्वित्वप्रभृतयश्च सङ्ख्याः पृथक्त्वं संयोगविभागाश्च । १ । १ । २३ ।**

---

१ निवृत्ते कर्मणि O. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्वयोर्द्रव्ययोर्द्वित्वं सामान्यं कार्यम्, त्रयाणां त्रित्वमित्यादि। तथैव द्विपृथक्त्वादि। द्वयोर्द्रव्ययोः संयुज्यमानयोः संयोगो विभज्यमानयोर्विभागः। एषामनेकाश्रितत्वात् समानत्वम्।

**असमवायात् सामान्यं कर्म कार्यं न विद्यते। १। १। २४।**

अनेकस्मिन् द्रव्ये एकस्य कर्मणः समवायनिषेधाद् न द्रव्याणां द्विबहूनां कर्म समानं कार्यमस्ति।

**संयोगानां द्रव्यम्। १। १। २५।**

द्वयोर्बहूनां वा असमवायिकारणानां संयोगानां द्रव्यं समानं कार्यम्, तन्तुसंयोगानामिव पटः।

**रूपाणां रूपम्। १। १। २६।**

द्वयोर्बहूनां वा कारणरूपाणां कार्यद्रव्याश्रितं रूपं समानं कार्यं यथा घटरूपं कपालरूपाणाम्, एवं रसादीनाम्।

**गुरुत्वप्रयत्नसंयोगानामुत्क्षेपणम्। १। १। २७।**

आदित्यरश्मीनामगुरुत्वात् पर्वते तथाभूतप्रयत्नाभावात् लोष्टस्य च हस्तेनासंयुक्तत्वादनुत्क्षेपणमिति[1] गुरुत्वादीनामुत्क्षेपणं समानं कार्यम्।

**संयोगविभागाः कर्मणाम्। १। १। २८।**

उभयकर्मजा ये संयोगा विभागाश्च ते कर्मणां समानं कार्यम्।

**कारणसामान्ये द्रव्यकर्मणां कर्माकारणमुक्तमिति[2]। १। १। २९।**

यस्मिन् प्रकरणे द्रव्यादीनां कारणं समानं वर्णितं तस्मिन् कारणसामान्ये द्रव्यकर्मणां यतः कर्माकारणमुक्तमतस्तान्यप्यस्य कार्यं सामान्यं न भवन्तीति। एवं नाना द्रव्यगुणकर्माणीति सिद्धम्।

॥ प्रथमस्याध्यायस्याद्यमाह्निकम् ॥

---

१ °पणे सति गुरुत्वा° O.। २ °मुक्तम्। प्रथमस्य प्रथममाह्निकम् PS.।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# प्रथमस्याध्यायस्य द्वितीयमाह्निकम् ।

**कारणाभावात् कार्याभावः । १ । २ । १ ।**

कार्यकारणशब्दौ पूर्वमुक्तौ तन्निरूपणार्थमाह । यस्याभावात् तन्त्वादेः समवायिकारणस्य तत्संयोगानां वा असमवायिकारणानां कार्यद्रव्यं न जायते पटादि विनाशे वा विनश्यति तत् कारणम्, अन्यत् कार्यम् ।

**न तु कार्याभावात् कारणाभावः । १ । २ । २ ।**

न पुनः पटादेरनुत्पत्तौ द्रव्यस्य तन्तूनां तत्संयोगानां वाऽनुत्पत्तिः ।

उक्ता[१] आनुषङ्गिकाः सामान्यादयस्त्रयः[२] पदार्थाः, तत्र सामान्यं कथयति—

**सामान्यं विशेष इति बुद्ध्यपेक्षम् । १ । २ । ३ ।**

भिन्नेषु पिण्डेष्वनुवर्तमानां[३] 'गौर्गौः' इति बुद्धिमपेक्ष्य एभ्य एव च परस्परतो व्यावर्तमानाम्[४] 'अयमस्मादन्यः' इति तदनुवृत्तिबुद्ध्यपेक्षं सामान्यं व्यावृत्तिबुद्ध्यपेक्षो विशेष इति ।

**भावः सामान्यमेव । १ । २ । ४ ।**

भावः सत्ता सामान्यमेव, त्रिष्वपि द्रव्यादिष्वनुवर्तमानत्वात्, न विशेषः ।

**द्रव्यत्वं गुणत्वं कर्मत्वं च सामान्यानि विशेषाश्च । १ । २ । ५ ।**

क्षित्यादिषु यतो 'द्रव्यं द्रव्यम्' इत्यनुवृत्तिबुद्धिः[५], रूपादिषु च 'गुणो गुणः' इति उत्क्षेपणादिषु 'कर्म कर्म' इति तानि द्रव्यत्वगुणत्वकर्मत्वानि सामान्यानि, परस्परतश्च व्यावृत्तेर्विशेषाः[६] ।

**अन्यत्रान्त्येभ्यो विशेषेभ्यः । १ । २ । ६ ।**

नित्यद्रव्येषु परमाण्वाकाशादिषु समवायेन वर्तमानास्तुल्याकृतिगुणेषु 'अयमन्योऽयमन्यः' इत्यत्यन्तव्यावृत्तिबुद्धिहेतवस्तद्दर्शिनां विशेषकत्वाद् विशेषाः । एवं विशेषा व्याख्याताः ।

---

१ उक्ता अनुष° P. । दृश्यतां पृ॰ ३ पं॰ २ । २ °दयः पदार्थाः O. । ३ °मानानां O. । ४ °मानाना° P. । °मानना° O. । ५ °वृत्तबुद्धिः P. । ६ व्यावृत्तेश्च विशेषाः O. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सत्ता तु

**सदिति[1] यतो द्रव्यगुणकर्मसु । १ । २ । ७ ।**

भिन्नेषु द्रव्यादिषु त्रिषु यतो जायते 'सत्[2] सत्' इति बुद्धिः सा सत्ता । आश्रयविनाशादस्या विनाश इति चेत्, न, यतः

**द्रव्यगुणकर्मभ्योऽर्थान्तरं सत्ता । १ । २ । ८ ।**

यस्माद् द्रव्यादिभ्यो व्यतिरिक्ता सत्ता तस्मान्न द्रव्यादिविनाशे सत्ता विनश्यतीति । द्रव्यादिव्यतिरेके युक्तिः—

**एक[3]द्रव्यवत्त्वान्न द्रव्यम् । १ । २ । ९ ।**

परमाण्वाकाशादिद्रव्य[4]मद्रव्यं कारणद्रव्याभावात्, अनेकद्रव्यं[5] वा घटादि समवायिकारणद्रव्ययुक्तत्वात्, सत्ता पुनः प्रत्येकं परिसमाप्त्या वर्तमाना एकद्रव्यवत्त्वान्न द्रव्यम् ।

**गुणकर्मसु च भावान्न कर्म न गुणः । १ । २ । १० ।**

गुणानां गुणेष्ववृत्तेः कर्मसु च कर्मणाम्, गुणेषु कर्मसु च सत्ताया वर्तमानत्वान्न गुणकर्मणी सत्ता ।

**सामान्यविशेषाभावाच्च । १ । २ । ११ ।**

यदि सत्ता द्रव्यादीनामन्यतमा स्यात् एवं द्रव्यादिष्विव सत्तायाम[6]पि द्रव्यत्वादयः सामान्यविशेषा वर्तेरन् । न चैवम् । तस्मान्न सत्ता द्रव्यगुणकर्माणि ।

**एकद्रव्यवत्त्वेन द्रव्यत्व[7]मुक्तम् । १ । २ । १२ ।**

यथा प्रतिद्रव्यं साकल्येन वर्तमानत्वान्न द्रव्यं सत्ता तथैकद्रव्यवत्त्वान्न द्रव्यं द्रव्यत्वम् ।

**सामान्यविशेषाभावेन च । १ । २ । १३ ।**

द्रव्यादि[8]ष्विव द्रव्यत्वादीनां मध्यात् कश्चित् सामान्यविशेषो द्रव्यत्वे वर्तेत यदि

---

१ "सदिति यतो द्रव्यगुणकर्मसु द्रव्यगुणकर्मभ्योऽर्थान्तरं सा सत्ता"—**नयचक्रवृत्ति.** पृ० ६ । सदिति यतो ( सन् यतो-**मि.** ) द्रव्यगुणकर्मसु सा सत्ता । द्रव्यगुणकर्मभ्योऽर्थान्तरं सत्ता **मि. उ.** । २ ययात्सदिति बुद्धिः O. । ३ न द्रव्यमेकद्रव्यवत्त्वात् PS । एकद्रव्यवृत्तित्वान्न द्रव्यम् **मि.** । ४ °द्रव्यं सद्द्रव्यमद्रव्यं O. । ५ °द्रव्यं यदि घटादि° O । ६ °मपि द्रव्यादयः O । °मपि सत्यत्वादयः P. । ७ द्रव्यवदुक्तम् O. । ८ द्रव्यादि द्रव्यादिष्विव O. ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

[ द्रव्यत्वं ] द्रव्यं गुणः कर्म वा स्यात् । तस्मान्न द्रव्यादीनि द्रव्यत्वम् ।

**गुणे भावाद् गुणत्वमुक्तम् । १ । २ । १४ ।**

गुणेषु गुणानामवृत्तेः, गुणत्वं च गुणेषु वर्तते, तस्मान्न गुणः ।

**सामान्यविशेषाभावेन च । १ । २ । १५ ।**

यदि गुणत्वं द्रव्यं कर्म वा स्यात् तस्मिन् द्रव्यत्वं कर्मत्वं वा सामान्यविशेषौ स्याताम् । न चैवम् । तस्मान्न द्रव्यं कर्म वा गुणत्वम् ।

**कर्मणि भावात् कर्मत्वमुक्तम् । १ । २ । १६ ।**

कर्मणि कर्मत्वस्य वृत्तेः कर्मणः कर्मणि चावृत्तेर्न कर्म कर्मत्वम् ।

**सामान्यविशेषाभावेन च । १ । २ । १७ ।**

द्रव्यत्वं गुणत्वं वा कर्मत्वे स्यातां यदि द्रव्यं गुणो वा स्यात् । तस्मान्न द्रव्यगुणौ कर्मत्वम् ।

**सल्लिङ्गाविशेषाद् विशेषलिङ्गाभावाच्चैको [1]भाव [2]इति ।१।२।१८।**

'एक'शब्देन अभेदः कथ्यते, न तु सङ्ख्या । लिङ्ग्यतेऽनेनेति लिङ्गं प्रत्ययः, येन लिङ्गेन 'सत् सत्' इति प्रत्ययेन प्रतीयते सत्ता तस्य सर्वत्राविशिष्टत्वाद् विशिष्टस्य च प्रत्ययस्याभावादभिन्ना सत्ता ।

|| प्रथमोऽध्यायः ||

---

१ भावः । प्रथमोऽध्यायः PS. । २ 'इति'शब्दः प्रायः प्रत्यध्यायमध्यायपरिसमाप्तिसूत्रे O. P. मध्ये दृश्यते, PS. उ. मि. मध्ये तु न दृश्यत इति ध्येयम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## द्वितीयस्याध्यायस्य प्रथममाह्निकम् ।

एवं द्रव्यादीनां नानात्वे सिद्धे पृथिव्यादीनां द्रव्यलक्षणाविशेषादेकत्वे प्राप्ते लक्षणभेदेन वैधर्म्यमाह–

**रूपरसगन्धस्पर्शवती पृथिवी । २ । १ । १ ।**

एतेऽस्या रूपरसगन्धस्पर्शा विशेषगुणाः, अन्ये तु सङ्ख्या-परिमाण-पृथक्त्व-संयोग-विभाग-परत्वा-ऽपरत्व-गुरुत्व-नैमित्तिकद्रवत्व-संस्काराः । रूपं शुक्लादि, रसो मधुरादिः, गन्धः सुरभिरसुरभिश्च, स्पर्शोऽस्या अनुष्णाशीतत्वे सति पाकजः, कार्यं बाह्यमाध्यात्मिकं च ।

**रूपरसस्पर्शवत्य आपो द्रवाः स्निग्धाश्च । २ । १ । २ ।**

शुक्ल-मधुर-शीता एव रूप-रस-स्पर्शाः । द्रवा इति सांसिद्धिकं[1] द्रवत्वम् । स्निग्धा इति आसामेव स्नेहः । सङ्ख्या-परिमाण-पृथक्त्व-संयोग-विभाग-परत्वा-ऽपरत्व-गुरुत्व-संस्काराश्च । कार्यं पूर्ववत् ।

**तेजो रूपस्पर्शवत् । २ । १ । ३ ।**

रूपं भास्वरं शुक्लं च, स्पर्श उष्ण एव । सङ्ख्या-परिमाण-पृथक्त्व-संयोग-विभाग-परत्वा-ऽपरत्व-नैमित्तिकद्रवत्व-संस्काराश्च । कार्यं पूर्ववत् ।

**वायुः स्पर्शवान् । २ । १ । ४ ।**

अनुष्णाशीतोऽपाकजः[2] स्पर्शः। सङ्ख्या-परिमाण-पृथक्त्व-संयोग-विभाग-परत्वा-ऽपरत्व-गुरुत्व-संस्काराश्च । कार्यं पूर्ववत् । भौमादिदेहा भूम्यादिलोकेषु ।

**त आकाशे न विद्यन्ते । २ । १ । ५ ।**

ते रूपरसगन्धस्पर्शा न सन्त्याकाशे । तस्य गुणाः शब्द-सङ्ख्या-परिमाण-पृथक्त्व-संयोग-विभागाः ।

**सर्पिर्जतुमधूच्छिष्टानां पार्थिवानामग्निसंयोगाद् द्रवताऽद्भिः सामान्यम् । २ । १ । ६ ।**

---

१ सांसिद्धिकद्रवत्वं O. । २ °शीतोऽस्य पाकजः O. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मधूच्छिष्टं सिक्थकम् । सर्पिषो जतुनो मधूच्छिष्टस्य चाग्निसंयोगाद् द्रवता या सञ्जायते तदद्भिः समानत्वं पृथिव्याः ।

**त्रपुसीसलोहरजतसुवर्णानां[1] तैजसानामग्निसंयोगाद् द्रवताऽद्भिः सामान्यम् । २ । १ । ७ ।**

एषां च तैजसानां यदग्निसंयोगाद् द्रवत्वमुपजायते तदद्भिः सामान्यं तेजसः ।

**[2]विषाणी ककुद्मान् प्रान्तेवालधिः सास्नावानिति गोत्वे दृष्टं लिङ्गम् । २ । १ । ८ ।**

दृष्टान्तार्थं सूत्रम् । 'गोत्वे' इति [3]गोत्वावच्छिन्ना व्यक्तिः । विषाणं ककुदं सास्ना चास्यास्तीति विषाणी ककुद्मान् सास्नावान् । प्रान्तशब्देन कटिभागः, वाला अस्मिन् धीयन्त इति वालधिशब्देन पुच्छम्, प्रान्ते वालधिरस्येति प्रान्तेवालधिः । विषाण्यादिभिः शब्दैस्तद्वत्प्रतिपादकैरपि अर्थ[4]व्यापाराद् धर्मा एव व्यपदिश्यन्ते ।

यथा अप्रत्यक्षायां गोव्यक्तौ कथञ्चिद् गृह्यमाणा विषाणादयो लिङ्गं दृष्टमनुमापकास्तथा

**स्पर्शश्च । २ । १ । ९ ।**

स्पर्श उपलभ्यमानो निराश्रयस्यानुपपत्तेर्वायुमनुमापयति ।

**न च दृष्टानां स्पर्श इत्यदृष्टलिङ्गो वायुः । २ । १ । १० ।**

यदि खल्वयं क्षित्यादिस्पर्शोऽभविष्यद् गन्धरसरूपैः सहोपलम्भेनहि, न चैवम्, तस्मात् पृथिव्यादिव्यतिरिक्तस्य वायोर्लिङ्गम् ।

**[5]अद्रव्यवत्त्वाद् द्रव्यम् । २ । १ । ११ ।**

यः परमाणुस्वभावो वायुः स खल्वद्रव्यवत्त्वात् समवायिकारणरहितत्वाद् द्रव्यम् । द्रव्यं ह्यद्रव्यमनेकद्रव्यं च ।

**क्रियावत्त्वात् गुणवत्त्वाच्च । २ । १ । १२ ।**

---

१ रजतताम्रसुवर्णानां O. । २ विषाणीति ककुद्मान् वृषभः प्रान्तेवालधिः सास्नावान् गलचर्मणालङ्कृत इति गोत्वं दृष्टं लिङ्गम् O. । ३ गोत्वावच्छिन्ना जातिः O. । ४ °व्यापारधर्मा O. । ५ अद्रव्यत्वाद् द्रव्यम् O. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'क्रियावद् गुणवत्' [ १ । १ । १४ ] इति द्रव्यलक्षणाद् यत्र क्रिया गुणाश्च समवेताः सोऽपि महान् वायुर्द्रव्यम् ।

**अद्रव्यवत्त्वेन नित्यत्वमुक्तम् । २ । १ । १३ ।**

परमाणुलक्षणस्य वायोरद्रव्यवत्त्वेन समवायिकारणरहितत्वेन नित्यत्वमुक्तम् ।

**वायोर्वायुसंमूर्च्छनं नानात्वे लिङ्गम् । २ । १ । १४ ।**

तिर्यग्गामिनो वायोर्वायुसंमूर्च्छनेन वाय्वन्तरसंश्लेषेणोर्ध्वगमनं प्रवर्तते[१], तत ऊर्ध्वगमनात् संश्लेषः, संश्लेषाद् वायोरनेकत्वमनुमीयते ।

ननु च

**वायुरिति[२] *सति[३] सन्निकर्षे प्रत्यक्षाभावाद् दृष्टं लिङ्गं न विद्यते । २ । १ । १५ ।**

यथा 'अयं गौः' इति गोश्चक्षुषा* सन्निकर्षे सति प्रत्यक्षेण विषाणादीनि तद्योगि[४] तया दृष्टानि कदाचिल्लिङ्गम्, नैवं त्वचा वायोः सन्निकर्षे सति अयं वायुरिति प्रत्यक्षेण तद्गुणतया स्पर्श उपलब्धो येनानुपलभ्यमानं कदाचिद् वायुमनुमापयेत् ।

क्षित्यादिस्पर्शविधर्मत्वादस्य स्पर्शस्य निराश्रयस्य चाभावाद् वायुराश्रय इति चेत्,

**सामान्यतो दृष्टाचाविशेषः । २ । १ । १६ ।**

आकाशादीनामपि परोक्षत्वात् तत्प्रतिषेधेन वायोरेवायं स्पर्श इत्ययं विशेष एतस्मात् सामान्यतो दृष्टान्नावगम्यते । विभूनां स्पर्शवत्त्वे भावानां[५] प्रतिघात इति चेत्, एवं तर्हि वायोरेवायं भवत्प्रसिद्धस्य स्पर्शो न दशमस्य द्रव्यस्येति कथं ज्ञायते ?

**तस्मादागमिकम् । २ । १ । १७ ।**

तस्माद् वायुरस्तीति वाक्यमागमिकं प्रवादमात्रमित्यर्थः ।

नैतत्,

**संज्ञाकर्म त्वस्मद्विशिष्टानां लिङ्गम् । २ । १ । १८ ।**

अस्मदादीनां सकाशाद् यो भगवान् विज्ञानादिभिर्विशिष्टो महेश्वरस्तदीयं संज्ञाप्रणयनं नवानामेव द्रव्याणां भावे लिङ्गम्, दशमस्य संज्ञानभिधानात् । तस्मान्नैव

१ प्रवर्तेत O. । २ वायुरिति सन्निकर्षे PS । वायुसन्निकर्षे उ. । ३ * * एतच्चिह्नान्तर्गतः पाठः P. मध्ये नास्ति । ४ तद्योग्यतया O. । ५ भावप्रतिघात P. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्रव्याणि । अतो वायोरेव स्पर्शः । 'अस्मद्विशिष्टानाम्' इति पूजायां बहुवचनम् ।

स कथं ज्ञायत इत्युच्यते—

**प्रत्यक्षपूर्वकत्वात् संज्ञाकर्मणः । २ । १ । १९ ।**

प्रत्यक्षेण हि पदार्थमालोचयन्तः संज्ञाः प्रणयन्ति, दृष्टं च दारकस्य नामकरणे, प्रणीताश्चेमाः खलु संज्ञाः, तस्मान्मन्यामहे – अस्ति भगवानस्मद्विशिष्टो योऽस्मदादिपरोक्षाणामपि भावानां प्रत्यक्षदर्शी येनेदं संज्ञादि प्रणीतमिति ।

**निष्क्रमणं प्रवेशनमित्याकाशस्य लिङ्गम् । २ । १ । २० ।**

यदेतद् निष्क्रमणं प्रवेशनं च पुरुषस्य द्वारादिना भवति न भित्त्यादौ तदाकाशकृतम्, अतो निष्क्रमणप्रवेशने आकाशस्य लिङ्गमिति । मूर्ताभावो ह्याकाशम् ।

तन्न,

**तदलिङ्गमेकद्रव्यवत्त्वात् कर्मणः । २ । १ । २१ ।**

निष्क्रमणादि कर्म पुरुषे वर्तमानम् 'एकद्रव्यं कर्म' इत्युक्तत्वान्निष्क्रियत्वाच्चाकाशस्य आकाशावृत्ति कथं तद् गमयेदसम्बन्धात् ।

यथा लोष्टवृत्ति पतनं गुरुत्वस्य लिङ्गमेवं पुरुषवृत्ति निष्क्रमणमाकाशस्य लिङ्गमिति चेत्, न,

**कारणान्तरानुक्लृप्तिवैधर्म्याच्च । २ । १ । २२ ।**

गुरुत्वं कर्मणोऽसमवायिकारणमुक्तम्, तदनुमीयताम्, न त्वाकाशस्यासमवायिकारणत्वं युज्यते नित्यत्वद्रव्यत्वानाश्रितत्वै[2]राकाशस्य गुरुत्वादिना असमवायिकारणेन[3] वैधर्म्यात् ।

यदुक्तं 'निष्क्रमणं चा[4]काशकृतत्वाद् द्वारादिना' इति, एतन्न,

**संयोगादभावः कर्मणः । २ । १ । २३ ।**

भित्त्यादिना स्पर्शवद्द्रव्येण शरीरादेः कर्माधारस्य संयोगाद् निष्क्रमणं निवर्तते, न त्वाकाशाभावात्, तस्य सर्वगतत्वात् तत्रापि भावः, तस्माच्छब्दलिङ्गमेवाकाशम् ।

---

१ °द्रव्यत्वात् कर्मणः O. मि. उ. । २ °तत्त्वेनाकाशस्य O. । ३ वैधर्म्यम् O. । ४ चाकाशकृतत्वाद्द्वारादिना P. । (चाकाशकृतं द्वारादिना ?) ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भेर्यादीनामेव निमित्तानां शब्दो गुण इति चेत्, न,

**कारणगुणपूर्वः कार्ये गुणो दृष्टः, कार्यान्तराप्रादुर्भावाच्च शब्दः स्पर्शवतामगुणः । २ । १ । २४ ।**

इह ये स्पर्शवतां विशेषगुणा एकैकेन्द्रियग्राह्यास्ते कारणगुणैः कार्ये निष्पाद्यन्ते । न च भेर्यवयवेषु रूपादय इव कश्चिच्छब्दभागः समवेत उपलभ्यते । तस्मादकारणगुणपूर्वत्वान्न भेर्यादेः स्पर्शवतो विशेषगुणः शब्दः । यश्च स्पर्शवतो विशेषगुणः स कार्ये यावत्कार्यमुपलभ्यमानो दृष्टः । न चैवं शब्दः, ततो न स्पर्शवद्विशेषगुणः । किञ्च, स्पर्शवद्विशेषगुण आरब्धे कार्ये कारणगुणैरारभ्यते, न च यदा शब्देन शब्द आरभ्यते तदा किञ्चित् कार्यमुत्पन्नं पश्यामः । तस्मात् कार्यान्तराप्रादुर्भावाच्च न शब्दः स्पर्शवतो विशेषगुण इति ।

**परत्र समवायात् प्रत्यक्षत्वाच्च नात्मगुणो न मनोगुणः । २।१।२५ ।**

परत्र बहिरित्यर्थः । ये खल्वात्मगुणास्ते सुखादय इवान्तःशरीरमुपलभ्यन्ते । न चैवं शब्दः, बहिर्बहुभिरुपलभ्यमानत्वात् । न चात्मगुणो बाह्येन्द्रियग्राह्यः, अयं तु श्रोत्रप्रत्यक्षः, तस्मान्नात्मगुणः । अत एव बहिरुपलभ्यमानत्वाद् बाह्येन्द्रियप्रत्यक्षत्वाच्च न मनोगुणः । श्रोत्रप्रत्यक्षत्वाच्च न दिक्कालयोः ।

तस्माद् गुणः सन्

**लिङ्गमाकाशस्य । २ । १ । २६ ।**

तस्मादुपलभ्यमानः शब्द आकाशं गमयति ।

**द्रव्यत्वनित्यत्वे वायुना व्याख्याते । २ । १ । २७ ।**

यथा अद्रव्यवत्त्वात् परमाणुभूतो वायुर्द्रव्यं नित्यश्च एवमाकाशं कारणद्रव्याभावाद् द्रव्यं नित्यं च ।

**तत्त्वं भावेन । २ । १ । २८ ।**

यथा सल्लिङ्गाविशेषाद् विशेषलिङ्गाभावाच्चैको भाव एवं शब्दलिङ्गाविशेषाद् विशेषलिङ्गाभावाच्चैकमाकाशम् ।

॥ इति द्वितीयस्याद्यमाह्निकम् ॥

---

१ कारणे गुणपूर्वः P. । कारणगुणपूर्वकः मि. उ. । २ कार्यो गुणो O. । कार्यगुणो PS. मि. उ. । ३ परत्र प्रत्यक्षत्वाच्च P. । परत्राप्रत्यक्षत्वाच्च O. । ४ द्रव्यनित्यत्वे O. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## द्वितीयस्याध्यायस्य द्वितीयमाह्निकम् ।

यदुक्तं 'स्पर्शवद्विशेषगुणा आरब्धे कार्यद्रव्ये गुणानारभन्ते, शब्दस्त्वनारब्धे द्रव्ये शब्दमारभते' इति, तदयुक्तम्, [1]अनारब्धेऽपि पुष्पवस्त्राभ्यां द्रव्यान्तरे पुष्पगन्धस्य वस्त्रे गन्धारम्भात् तथा अप्सु उष्णतायाः । उच्यते—

**पुष्पवस्त्रयोः सति सन्निकर्षे गन्धान्तराप्रादुर्भावो वस्त्रे गन्धाभावलिङ्गम् । २ । २ । १ ।**

पुष्पेण खलु सं[2]युक्ते वस्त्रे न पुष्पगन्धेन गन्ध आरभ्यते, वस्त्रगन्धस्यापि सम्भवात् पुष्पवस्त्रगन्धाभ्यां द्वाभ्यां विलक्षणं गन्धान्तरमुपजनितमुपलभेमहि, न चैवम्, अपि तु पुष्पगन्धमेवोपलभामहे । तस्मात् 'अनारब्धे कार्ये पुष्पगन्धेन गन्ध आरभ्यते' इत्ययुक्तम्, गन्धान्तरप्रसङ्गात् ।

**एतेनाप्सूष्णता व्याख्याता । २ । २ । २ ।**

अपां तेजसा संयोगे सति विलक्षणस्पर्शानुत्पत्तिरौष्ण्याभावस्य लिङ्गम्, अयावद्द्रव्यभावित्वं च सलिले औष्ण्यस्य । सूक्ष्माणां पुष्पावयवानां वस्त्रे तेजोवयवानां चाप्सु सङ्क्रान्तेः संयुक्तसमवायाद् गन्धस्पर्शोपलब्धिः ।

[3]नन्वयावद्द्रव्यभाविनो रूपादयो वस्त्रोदकयोः, पुष्पगन्धोष्णस्पर्शोपलम्भकाले स्वगन्धशीतस्पर्शानुपलब्धेः । न[4],

**व्यवस्थितः पृथिव्यां गन्धः । २ । २ । ३ ।**

पार्थिवे वाससि व्यवस्थितोऽपि स्वगन्धः पुष्पगन्धा[5]भिभवान्नोपलभ्यते ।

किञ्च,

**तेजस्युष्णता । २ । २ । ४ ।**

तेजस्येवोष्णता व्यवस्थिता, नाप्सु संक्रामति ।

---

१ अनारब्धकृतेऽपि P. । २ संयुक्तेन वस्त्रेण पुष्पगन्धेन O. । ३ ननु यावद्द्र° O । न यावद्द्र° P. । ४ न P मध्ये नास्ति । ५ °न्धाभिभूतो नोप° O. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथा औष्ण्योपलब्धिकाले

**अप्सु शीतता । २ । २ । ५ ।**

तेजोवयवानुप्रवेशात् संयुक्तसमवायादुष्णोपलब्धावपि अनुपलभ्यमानापि सलिले शीतता व्यवस्थितैवाभिभवान्नोपलभ्यते ।

काल इदानीं कथ्यते—

**अपरस्मिन् परं युगपदयुगपच्चिरं क्षिप्रमिति काललिङ्गानि । २ । २ । ६ ।**

एतान्यपरत्वव्यतिकरादीनि काललिङ्गानि । तत्र परेण दिक्प्रदेशेन संयुक्ते यूनि परत्वज्ञाने जाते स्थविरे चापरेण दिक्प्रदेशेन संयुक्तेऽपरत्वज्ञानोत्पत्तौ कृष्णकेशादिवलीपलितादिपर्यालोचनया येन निमित्तेन यूनि अपरत्वज्ञानं स्थविरे च परत्वज्ञानं जायते स कालः । तथा तुल्यकार्येषु कर्तृषु 'युगपत् कुर्वन्ति, अयुगपत् कुर्वन्ति' इति यतः प्रत्ययो जायते स कालः । तथैकं क्रियाफलमुद्दिश्य ओदनाख्यं भूयसीनामधिश्रयणादिक्रियाणां प्रबन्धप्रवृत्तौ तुल्ये कर्तरि 'चिरमद्य कृतम्, क्षिप्रमद्य कृतम्' इति यतः प्रत्ययो भवतः स काल इति । तस्य गुणाः संख्या-परिमाण-पृथक्त्व-संयोग-विभागाः ।

किञ्च,

**द्रव्यत्वनित्यत्वे वायुना व्याख्याते । २ । २ । ७ ।**

अद्रव्यवत्त्वात् परमाणुवायोरिव द्रव्यत्वनित्यत्वे कालस्य ।

**तत्त्वं भावेन । २ । २ । ८ ।**

यथा सल्लिङ्गाविशेषाद् विशेषलिङ्गाभावाच्चैको भावस्तथा काललिङ्गाविशेषाद् विशेषलिङ्गाभावाच्चैकः कालः ।

कालस्यैकत्वे कथमारम्भकालादिव्यपदेश इत्यत्राह[1]—

**कार्यविशेषेण नानात्वम् । २ । २ । ९ ।**

कार्यं[2] क्रिया, क्रियाविशेषेणाविष्टस्य वस्तुन आरम्भ-स्थिति-विनाशक्रिया दृष्ट्वा एकस्यापि कालस्य नानात्वोपचारादारम्भकालादिव्यपदेशः ।

---

१ इत्याह O. ।

२

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ननु क्रियामात्रं कालः । कुतः ? [1]काललिङ्गानाम्

**नित्येष्वभावादनित्येषु भावात् । २ । २ । १० ।**

यदि क्रियाव्यतिरिक्तः स्यान्नित्यः काल एवं नित्येष्वप्याकाशादिषु काललिङ्गानि प्रतिभासेरन् । [2]अनित्येष्वेव तु भवन्ति । तस्मादभिनिर्वर्त्यमानेष्वेवावधिः कालः । तस्मात् क्रियैव काल इति । नैतत्, [3]वस्तुनिर्वृत्त्युत्तरकालभावित्वात् काललिङ्गान्यनित्येषु भवन्ति, न तु क्रियायाः कालत्वात् ।

तेषां तु

**कारणे कालाख्या । २ । २ । ११ ।**

[4]एषां काललिङ्गानां निर्निमित्तानामसम्भवात् क्रियानिमित्तत्वे 'कृतम्' इति स्यात्, न 'युगपत्' इति । तस्मादेषां यत् कारणं तस्मिन् कालाख्या ।

**इत इदमिति यतस्तद्दिशो लिङ्गम् । २ । २ । १२ ।**

मूर्तद्रव्यमवधिं कृत्वा यत एतद् भवति 'इदमस्मात् [5]पूर्वेण' इत्यादिप्रत्ययस्तद् दिशो लिङ्गम् । गुणाः संख्या-परिमाण-पृथक्त्व-संयोग-विभागाः ।

किञ्च,

**द्रव्यत्वनित्यत्वे वायुना व्याख्याते । २ । २ । १३ ।**

अद्रव्यवत्त्वाद् वायुवद् द्रव्यत्वनित्यत्वे दिशः ।

**तत्त्वं भावेन । २ । २ । १४ ।**

दिग्लिङ्गाविशेषाद् विशेषलिङ्गाभावाच्चैका दिगित्यर्थः ।

सत्येकत्वे

**कार्यविशेषेण नानात्वम् । २ । २ । १५ ।**

पूर्वेण देवयजनं दक्षिणेन पितृयजनमित्यादिना क्रियाविशेषेण नानात्वस्य दिशः पूर्वदक्षिणादेरुपचारः ।

इतरेतराश्रयमिति चेत्, एवं तर्हि

**आदित्य[6]संयोगाद् भूतपूर्वाद् भविष्यतो भूताच्च प्राची । २ । २ । १६ ।**

---

१ कार्यलिङ्गानां काललिङ्गानां O. । २ अनित्येष्वेव वस्तुषु भवन्ति । तस्मादनित्यवर्तमानेष्वेवावधिः O. । ३ वस्तुनिवृत्त्युत्तर° O. P. । ४ येषां O. । ५ पूर्वेत्यादिप्रत्यय° O. P. । ६ °त्यसम्प्रयोगाद् O. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सवितुरुदयादौ येन कल्पितदिक्प्रदेशेन संयोगोऽभूद् भवति भविष्यति वा तस्मादादित्यसंयोगात् 'प्राची' इति व्यपदेशः प्राञ्चत्यत आदित्यमिति ।

**तथा दक्षिणा प्रतीच्युदीची च । २ । २ । १७ ।**

अस्मादेवादित्यसम्प्रयोगाद् दक्षिणादिव्यपदेशः ।

**एतेन दिगन्तराणि व्याख्यातानि । २ । २ । १८ ।**

अनेनैव प्रकारेण [1]पूर्वदक्षिणादीनि दिगन्तराणि व्याख्यातानि ।

तत्रेदानीमात्मा करणैरधिगन्तव्यः, करणानि शब्दादिभ्यो गुणेभ्यः । ननु गुणत्वमसिद्धं शब्दादीनां सिद्धं कृत्वोच्यते । ननु गुणत्वे कुतः संशयः ? आह–किं संशयोऽपि हेतुमान् ? एवमेतत् । को हेतुः ? तदाह—

**सामान्यप्रत्यक्षाद् विशेषाप्रत्यक्षाद् विशेषस्मृतेश्च संशयः ।२ । २ । १९ ।**

स्थाणुपुरुषयोरूर्ध्वतां सामान्यं पश्यन् विशेषहेतून् [2]पाण्यादिकोटरादीनपश्यन् स्मरति च विशेषान्, अतः संशयः 'किमयं [3]स्थाणुः स्यात् पुरुषो [4]न वा' इति ।

स द्विविधः–[5]बाह्य आभ्यन्तरश्चेति । बाह्योऽपि द्विविधः–प्रत्यक्षोऽप्रत्यक्षश्च । अप्रत्यक्षे तावत्—

**[6]दृष्टमदृष्टम् । २ । २ । २० ।**

प्राप्तो मनुष्य इत्युक्ते किमिमं दृष्टं पश्येयमदृष्टमिति श्रवणमात्रादेव संशयः ।

प्रत्यक्षे तु—

**[7]दृष्टं च दृष्टवत् । २ । २ । २१ ।**

सम्प्रति दृष्ट्वा पुरुषं तमेव दृष्टमालोचयतः किमयं मया दृष्टपूर्वः कदाचिदुतादृष्ट इति संशयः ।

---

१ पूर्वादीनि P. । २ पादादिकोटरा° O. । ३ स्थाणुः पुरुषो न वा P. । ४ (नु वा ?) । ५ बाह्य अभ्यन्तरश्च P. । ६ दृष्टमदृष्टं च **मि.** । उ.मध्ये तु सूत्रमिदं नास्ति । ७ **मि.**मध्ये नास्तीदं सूत्रम् । तुलना—" ननु च शास्त्रे तत्र तत्रोभयथा दर्शनं संशयकारणमुपदिश्यत इति । तत्र तत्र शास्त्रे तस्मिंस्तस्मिन् सूत्रे **दृष्टं च दृष्टवद् दृष्ट्वा** संशयो भवति । दृष्टं च मनसि क्रियावत्त्वं पुनर्दृष्टेन तुल्यं वर्तत इति दृष्टवदस्पर्शवत्त्वम् । अतो विरुद्धधर्मसाधनाभिसम्बद्धं मनो दृष्ट्वा संशेते—किं मूर्तमुतामूर्तं मन इति । **यथादृष्टमयथादृष्टमुभयथा दृष्टत्वात्** संशय इत्यसाधारणस्य च संशयहेतुत्वमुक्तम् । यथादृष्टं पक्षे, पुनरयथादृष्टं सपक्षे विपक्षे च न दृष्टम्, अत

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**दृष्टं[1] यथादृष्टमयथादृष्टमुभयथा दृष्टत्वात् । २ । २ । २२ ।**

आदौ कुन्तली देवदत्तो दृष्टः, मध्ये मुण्डः, तृतीयस्यामवस्थायां कुन्तली । चतुर्थ्यामालापादिभिरवगते[2] आरूपमात्रेण च सन्ध्यादौ 'किमयं कुन्तली स्याद्[3] उत मुण्डो वा' इति संशयः । पूर्वसूत्रेऽनेकार्थानुस्मृतेः[4] संशयः, अनेन त्वेकार्थे विशेषानुस्मरणात् ।

आभ्यन्तरस्तु—

**विद्याविद्यातश्च संशयः । २ । २ । २३ ।**

विद्या सम्यग्ज्ञानम्, अविद्या मिथ्याज्ञानम् । दैवज्ञेन शुभमादिष्टं सत्यमभूत्, द्वितीयमसत्यम्, तृतीयस्यामवस्थायां संशयः—किमाद्यावस्थावत् सत्यमुत द्वितीयावस्थावदसत्यमिति । एवं कथितः संशयः ।

तत्र शब्द एव तावत् कथ्यताम्—

**श्रोत्रग्रहणो योऽर्थः स शब्दः । २ । २ । २४ ।**

---

उभयथा दृष्टत्वात् संशयः । यदि वा यथादृष्टं क्रियावत्त्वेन, पुनरयथादृष्टमस्पर्शवत्त्वेन, अत उभयथा दृष्टत्वात् संशय इत्युक्ते परेणाह—न युक्तमेतत् ।............ नियतसामान्यवस्तु प्रतिनियतविशेषैः सहचरितमेकदा **दृष्टम्**, पुनस्तत्तुल्यमन्यविशेषाविनाभूतम्, अतः कालान्तरे देशव्यवधानात् तद् दृष्ट्वा संशेते—किमिदमेवमाहोस्विदेवं न भवतीति । तथैकधर्मिविषयत्वेऽपि **यथादृष्टमि**ति किञ्चिद् सामान्यवद्वस्तु केनचिद् विशेषेग सह दृष्टम्, **अयथादृष्टं** तदेव उपलब्धविशेषशून्यं विशेषान्तरसहितं दृष्टम् । अत **उभयथा दृष्टत्वात्** उभाभ्यां सह दृष्टत्वादुभयशून्यस्योपलब्धौ तत्स्मरणे च सति संशयो भवतीति । यथा देवदत्तं सकेशमुपलभ्य पुनर्निष्केशमतः कालान्तरे तमेव वेष्टितशिरसमुपलभमानस्य किमयं सकेशो निष्केशो वेति संशयो भवतीति ।"—**व्यो.** पृ० ६०९ । "ननु चेति तस्मिंस्तस्मिन् सूत्र उभयथा दर्शनमुभयप्रकारवद्धर्मवद्धर्मिदर्शनं संशयकारणमुक्तम् । तथाहि—**दृष्टं च दृष्टवतः दृष्ट्वा** संशयः । मूर्तधर्माविनाभूतधर्मवत्तया दृष्टमन्तःकरणं दृष्टवतोऽमूर्तत्वाविनाभूतास्पर्शवत्त्वेन तुल्यमन्तःकरणं दृष्ट्वा संशय इति भवति विरुद्धाव्यभिचारी संशयहेतुरित्युक्तम् । अपरं च सूत्रमसाधारणो धर्मः संशयहेतुरित्याह—**यथादृष्टमयथादृष्टमुभयथा दृष्टत्वात्** संशयः । यथादृष्टं येन धर्मेण सह दृष्टं पक्षे, अयथादृष्टं तत्तुल्यवति च सपक्षे न दृष्टं, विपक्षे च उभयथा साध्यसाधनप्रकारेग अदर्शनात् संशय इत्यसाधारणधर्मः संशयकारणमुक्तः । समाधत्ते—नेति ।............ तथाहि—**दृष्टं च** विशेषद्वयसहचरितं तथाविधं **दृष्टवतः दृष्ट्वा** संशय इति सूत्रार्थः । **यथादृष्टं** येन विशेषेण सह दृष्टम् **अयथादृष्ट**मपरविशेषेग सह दृष्टमिति **उभयथा दर्शनात्** साधारगधर्मदर्शनादित्यपरसूत्रार्थः ।"—प्रशस्तपादभाष्य**किरणावली** [ अपदेशाभासनिरूपणे ] ।

१ यथादृष्टमयथादृष्टम् । उभयथा दृष्टत्वाच्च ।—**मि.** । यथादृष्टमयथादृष्टत्वाच्च-**उ.** । २ °रवगतो P. । ३ स्याद् मुण्डो वा P. । ४ पूर्वसूत्रेणैकार्थानुस्मृतेः O. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[1]श्रोत्रेण गृह्यते योऽर्थः स शब्दः । सामान्यादीनामर्थशब्दस्यासङ्केतित्वाच्छब्दत्वं शब्दो मा भूदित्यर्थग्रहणम् ।

**तस्मिन् द्रव्यं कर्म गुण इति संशयः । २ । २ । २५ ।**

साधारणरूपत्वाद् द्रव्यादित्वेन शब्दे संशयः ।

तदाह—

**तुल्यजातीयेष्वर्थान्तरभूतेषु च विशेषस्योभयथा दृष्टत्वात् । २ । २ । २६ ।**

पृथिवीत्वं सजातीयात् सलिलादेः पृथिव्या विशेषो दृष्टः, असजातीयाभ्यां च गुणकर्मभ्याम् । ततः शब्देऽपि किमयं श्रोत्रग्राह्यत्वं विशेषो गुणैस्तुल्यस्यार्थान्तरभूतस्य वेति संशयः ।

नैतत्,

**एकद्रव्यवत्त्वान्न द्रव्यम् । २ । २ । २७ ।**

एकस्मिन् द्रव्ये आकाशे वर्तमानत्वान्न द्रव्यमयं शब्दः, द्रव्यं ह्यद्रव्यं परमाण्वादि अनेकद्रव्यं वा घटादि ।

**[2]*अचाक्षुषत्वान्न कर्म* । २ । २ । २८ ।**

द्रव्यं कर्म वा यदिन्द्रियान्तरप्रत्यक्षं तच्चाक्षुषमपि दृष्टम्, अयं तु शब्दः श्रोत्रप्रत्यक्षोऽपि सन्न चाक्षुषः । एवं स्थितो गुणः ।

किन्तु

**गुणस्य सतोऽपवर्गः कर्मभिः [3]साधर्म्यम् । २ । २ । २९ ।**

कर्मभिरस्य पुनर्गुणभूतस्यापि साधर्म्यमपवर्गो विनाशः, उत्पत्त्यनन्तरमग्रहणाद् विनाशोऽनुमीयते ।

---

१ श्रोत्रेण यो गृह्यतेऽर्थः स शब्दः । श्रोत्रेण यो गृह्यते सामान्यादीना० P । २ * * अचाक्षुषत्वान्न PS. । अचाक्षुषत्वाच्च न कर्म P । अचाक्षुषत्वाच्च प्रत्यक्षस्य शब्दो न कर्म—**मि.** । नापि कर्माचाक्षुषत्वात्—**उ.** [ चौखम्बाप्रकाशितः ] । नापि कर्माचाक्षुषत्वात् प्रत्ययस्य-**उ.** [ गुजरातीप्रेसप्रकाशितः ] । **नयचक्रवृत्तौ** [ पृ० ८७ पं० १४, पृ० ५५ पं० ११ इत्यत्र ] तु २८-२९ सूत्रे एकीकृत्य '**अचाक्षुषप्रत्यक्षस्य गुणस्य सतोऽपवर्गः कर्मभिः साधर्म्यम्**' इति पाठ उद्धृत इति ध्येयम् । ३ साधर्म्यात् O. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सतोऽपि निमित्तादग्रहणमिति चेत्, न,

**सतो लिङ्गाभावात् । २ । २ । ३० ।**

यत् सदपि निमित्तान्न गृह्यते तस्य लिङ्गं सद्भावग्राहकं भवति, शब्दस्य तूच्चारणादूर्ध्वं संयोग्यादेर्लिङ्गस्याभावादसत्त्वेव ।

किञ्च,

**नित्यवैधर्म्यात् । २ । २ । ३१ ।**

[1]उच्चरितप्रध्वंसो नित्यैर्वैधर्म्यम्, तस्मादनित्यः ।

किञ्च,

**[2]कार्यत्वात् । २ । २ । ३२ ।**

कार्यश्च शब्दः, संयोगादिभ्य उत्पत्तेः । तस्मादनित्यः ।

किञ्च,

**अभावात् । २ । २ । ३३ ।**

प्रागभावादित्यर्थः । प्रागभाववतो विनाशात् । प्रागभावश्चास्य कारणेभ्य उत्पत्तेः । न च तानि व्यञ्जकानि, कुतः ?

**[2]कारणतो विकारात् । २ । २ । ३४ ।**

यस्माद् भेर्यादिकारणेभ्यः शब्दस्य विकारोऽवगम्यते, महति भेर्यादौ महान् अल्पेऽल्पः । [3]अभिव्यक्तौ तु

**दोषात् । २ । २ । ३५ ।**

नित्यत्वेनाभिव्यक्तौ शब्दोऽन्येन यज्ञे प्रयुक्तो नान्येन प्रयुज्येत दर्भादिवद् यातयामत्वादिदोषात् । तस्मादनित्यः ।

---

१ उच्चरितप्रध्वंसिनो नित्यवैधर्म्यात् O । २ " शास्त्रे 'कार्यत्वात्, कारणतो विकारात्' इति । " —**प्रमाणसमुच्चयवृत्ति** T[1] पृ० ३९ a, T[2] पृ० १२० b । " शास्त्रे 'कार्यत्वात्, कारणतो विकारात्, संयोगाद् विभागाच्छब्दाच्च शब्दनिष्पत्तेः शब्दोऽनित्यः' इति कार्यत्वादयः शब्दानित्यत्वहेतव उक्ताः । "—**विशालामलवती** पृ० ११७ a । " सतो लिङ्गाभावात्, कार्यत्वात्, कारणतो विकारात् "—**नयचक्रवृत्ति** पृ० ५५ पं० ११-१२, पृ० ८७ पं० १५ । ३ '**अभिव्यक्तौ दोषात्**' इति उ. मध्ये सूत्रपाठः । **मि.** मध्ये तु '**दोषात्**' इत्येव सूत्रम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कुतः कार्यत्वम् ? इत्याह—

**संयोगाद् विभागाच्छब्दाच्च शब्दनिष्पत्तेः[1] । २ । २ । ३६ ।**

भेरीदण्डसंयोगाद् वस्त्र[2]दलविभागाच्छब्दाच्च शब्दस्य वीचिसन्तानवन्निष्पत्तेर्मन्यामहे–कार्यः शब्द इति ।

**लिङ्गाच्चानित्यः । २ । २ ३७ ।**

'तेभ्यस्त्रयो वेदा अजायन्त' [ ] इति वचनाद् वैदिकाल्लिङ्गादनित्यः ।

ननु नित्यः शब्दः,

**द्वयोस्तु प्रवृत्त्योरभावात् । २ । २ । ३८ ।**

कार्याणां हि भावानां द्वे प्रवृत्ती–ए[3]का निर्वृत्तिः, अन्या [4]कार्यविनियोगरूपा । शब्दस्य पुनरर्थप्रतिपत्त्यर्थैव प्रवृत्तिरुच्चारणाख्या, नात्मार्था, तस्मान्नित्यः ।

**संख्याभावात् । २ । २ । ३९ ।**

उच्चरितप्रध्वंसित्वे [5]शब्दस्य 'द्विरयमाम्नातः' [ ] इति विनष्टत्वात् [6]संख्याभ्यावृत्तिर्न भवेत्, अस्ति च, तस्मान्नित्यः ।

**प्रथमाशब्दात् । २ । २ । ४० ।**

प्रथमाशब्दादिति 'त्रिः प्रथमामन्वाह' [ ] इति वाक्यम्, उच्चरितविनाशित्वे शब्दस्य प्रथमाया ऋचोऽभ्[7]यावृत्तिगणनं न स्यात्, अस्ति च, तस्मान्नित्यः ।

**[8]सम्प्रतिपत्तिभावाच्च । २ । २ । ४१ ।**

विनाशित्वे शब्दस्य 'स एवायं गोशब्दः' इति सम्प्रतिपत्तिः [9]प्रत्यभिज्ञा न स्यात्, तस्मान्नित्यः ।

---

१ °च्छब्दाच्च निष्पत्तेः PS. । २ वस्त्रदशाविभागा° O. । (वंशदलविभागा° ? ) ३ एका निवृत्तिः O. P. । ४ कार्ये विनि° O. । ५ शब्दस्य स एवायं गोशब्दस्य द्विरयमाम्नातः O. । ६ संख्याभ्यां वृत्ति° O. । मंख्याद्यावृत्ति° P । ७ ( °भ्यावृत्तिर्गणनं ? ) । ८ सम्प्रतिपत्तिभावाच्च । द्वितीयोऽध्यायः PS । ९ प्रत्यभिज्ञानं न O ।

नैतत् सारम्,

**सन्दिग्धाः[1] सति बहुत्वे । २ । २ । ४२ ।**

प्रदीपादावद्विप्रवृत्तत्वं[2] दृष्टम्, द्विर्विद्युन्निःसृतेति संख्याभावः, सम्प्रतिपत्तिर्ज्वालादौ । तस्मादनित्येष्वपि भावाद् बहवोऽप्यमी हेतवः संशयिताः । तस्मादनित्यः ।

**संख्या[3]भावः सामान्यतः । २ । २ । ४३ ।**

प्रथमाशब्दः सम्प्रतिपत्तिभावश्चेति सादृश्यादेते द्रष्टव्याः ।

॥ इति द्वितीयोऽध्यायः ॥

---

१ PS. मध्ये सूत्रमिदं नास्ति । २ ( °द्विप्रवृत्तित्वं ? ) । ३ PS. मध्ये सूत्रमिदं नास्ति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# तृतीयाध्यायस्याद्यमाह्निकम् ।

एवं दिगन्तानां वैधर्म्यमुक्त्वा आत्मानमुपक्रमते—

**प्रसिद्धा इन्द्रियार्थाः । ३ । १ । १ ।**

शब्दादयो यस्माद् गु[1]णादिस्वभावा[2]ः प्रसिद्धाः, तेभ्यश्चेन्द्रियाणि । अत इदानीम्—

**इन्द्रियार्थप्रसिद्धिरिन्द्रियार्थेभ्योऽर्थान्तरत्वे हेतुः । ३ । १ । २ ।**

ग्राह्याणामर्थानां शब्दादीनां येयं प्रसिद्धिः त[3]या च श्रोत्रादीनां करणानाम्, अनया इन्द्रियार्थप्रसिद्ध्या एभ्यो ग्राह्य-ग्रहणे[4]भ्य इन्द्रियार्थेभ्यः परो ग्रहीता आत्मा अनुमीयते ।

**सोऽन[5]पदेशः । ३ । १ । ३ ।**

ग्राह्यग्रहणप्रसिद्ध्याख्यो ग्रहीतृसद्भावे यो हेतुरुक्तः सोऽनपदेशः, अकारणमित्यर्थः । किमात्मकल्पनया ? कथमिन्द्रियाणि ग्रहीतॄण्येव न भवन्ति ? नैतत्,

**[6]कारणाज्ञानात् । ३ । १ । ४ ।**

भूतानामिन्द्रियकारणाना[7]मज्ञत्वात् तत्कार्याणीन्द्रियाण्यपि अज्ञानि ।

भूताज्ञानम्—

**कार्याज्ञानात् । ३ । १ । ५ ।**

अन्यस्य भूतकार्यस्य घटादेरज्ञत्वाद् भूतान्यप्यज्ञानि ।

**अज्ञानाच्च । ३ । १ । ६ ।**

भूतानामज्ञानादिन्द्रियाण्यपि अज्ञानि इत्युपसंहारार्थमिदं सूत्रम् ।

**अन्य एव हेतुरित्यनपदेशः । ३ । १ । ७ ।**

अन्यो [8]हेतुलक्षणबाह्य इत्यर्थः, तथाहि—इन्द्रियार्थप्रसिद्धिरिन्द्रियार्थधर्मत्वादात्मना असम्बन्धान्न तमनुमापयेत्, अतोऽनपदेशः ।

---

१ गुणा द्रिस्व° O. । २ °वाः सिद्धाः P. । ३ तया श्रोत्रादीनां कारणानाम् O. । ४ °णेभि इन्द्रियार्थेभ्यो परो O । ५ °नुपदेशः O. । ६ कारणाकारणाज्ञानात् O. । ७ °मज्ञानत्वात् कार्याणी° O. । ८ हेतुर्लक्षण° O. ।

नैतत्,

**संयोगि, समवायि, एकार्थसमवायि, विरोधि च। कार्यं कार्यान्तरस्य, कारणं कारणान्तरस्य। विरोध्यभूतं भूतस्य, भूतमभूतस्य, अभूमभूतस्य, भूतं भूतस्य ।३।१।८।**

धूमोऽग्नेः संयोगि। विषाणं गोः समवायि। एकार्थसमवायि द्विधा—कार्यं कार्यान्तरस्य, यथा रूपं स्पर्शस्य, कारणं कारणान्तरस्य, यथा पाणिः पादस्य। चतुर्धा विरोधि—अभूतं वर्षकर्म वाय्वभ्रसंयोगस्य भूतस्य* लिङ्गम्, भूतं वर्षकर्म वाय्वभ्रसंयोगस्याभूतस्य लिङ्गम्, अभूता श्यामता*अभूतस्याग्निसंयोगस्य लिङ्गम्, भूतं कार्यं भूतस्य कारणसंयोगस्य लिङ्गम्। तस्मादिह प्रसिद्धानामिन्द्रियार्थानां करणता कर्मता च समवायिनी आत्मलिङ्गम्। न ते आत्मनि समवायिनी इति चेत्, एवमेतत्, अन्यथा तु प्रयोगः—इन्द्रियाणि कर्तृप्रयोज्यानि करणत्वाद् वास्यादिवदिति।

संयोग्यादीन्येव कथं लिङ्गमित्याह—

**[३]प्रसिद्धपूर्वकत्वादपदेशस्य ।३।१।९।**

प्रसिद्धो यः संयोग्यादिर्नासम्बद्धो येन सह ज्ञातः स तस्यार्थान्तरस्यापि लिङ्गं सम्बद्धत्वात्, नासम्बद्धम्।

तथाहि—

**अप्रसिद्धोऽनपदेशः ।३।१।१०।**

अप्रसिद्धो विरुद्धः, यस्य साध्यधर्मेण सह नैवास्ति सम्बन्धः, अपि तु विपर्ययेण, असावनपदेशोऽहेतुः।

---

१ अभूताभूतस्य च भूताभूतस्य O.। २ ** लिङ्गं भूता श्यामता O.। ३ प्रसिद्धिपू° PS. मि. उ.। स्वार्थानुमानपरिच्छेदे [ T[1] पृ० ३८b पं० १, ७, T[2] पृ० १२०a, १२०b ] परार्थानुमानपरिच्छेदे [ T[1] पृ० ६५b, T[2] पृ० १४८ b ] च **प्रमाणसमुच्चयवृत्तौ** दिङ्नागेनोद्धृतमिदं सूत्रम्। तस्य [ T=Tibetan ] **भोट**भाषानुवादे 'प्रसिद्धपूर्वकत्वादपदेशस्य' इति पाठः सम्भाव्यते। 'प्रसिद्धपूर्वकत्वादपदेशस्येति। यस्य धूमोऽग्नेः संयोगीति पूर्वं सम्बन्धग्रहणकाले प्रसिद्धस्तस्यैव धूमदर्शनादग्न्यनुमानं नेतरस्य। तस्माद् धूमादिप्रतीतिरेव लिङ्गम्। तद्विषये तु लिङ्गत्वमुपचर्यते [ पृ० ११५b ]।........प्रसिद्धपूर्वकत्वादपदेशस्य...। कथम्? यस्य धूमादयोऽग्न्यादिभिः सम्बद्धा अप्रसिद्धाः तं प्रति धूमादयोऽनपदेशाः [ पृ० ११६b ११७a ]।"—**विशालामवती**। ४ १०-११ सूत्रयोः उ.मध्ये 'अप्रसिद्धोऽनपदेशोऽसन् सन्दिग्धश्चानपदेशः' इति पाठोऽत्रवदेवास्ति। अन्यत्र तु—'अप्रसिद्धोऽनप-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**असन् सन्दिग्धश्चानपदेशः । ३ । १ । ११ ।**

असन्, यः पक्षे[1] नास्ति, तेनार्थादसन् असिद्ध इत्यर्थः, सन्दिग्धश्चानपदेशः सन्दिग्धोऽनैकान्तिक इत्यर्थः ।

उदाहरणमाह—

**विषाणी तस्मादश्वो विषाणी तस्माद् गौरिति च । ३ । १ । १२ ।**

'अयं पदार्थोऽश्वः' इति साध्ये विषाणित्वं विरुद्धम्, अश्वविपर्ययेण विषाणित्वस्य व्याप्तेः । 'अयं पदार्थो गौः' इति साध्ये विषाणित्वमनैकान्तिकम्, साध्यविपर्ययाभ्यां व्याप्तत्वात् । चशब्दोऽनुक्तसमुच्चयार्थः, 'शशो विषाणी' इति साध्येऽसिद्धं विषाणित्वम्, पक्षेऽवर्तमानत्वात् । प्रसङ्गादेतदुक्तम् ।

किञ्च,

**आत्मेन्द्रियमनोऽर्थसन्निकर्षाद् यन्निष्पद्यते तदन्यत् । ३ । १ । १३ ।**

चतुष्टयसन्निकर्षाद् यदुत्पद्यते ज्ञानाख्यं कार्यं तदन्यद् हेत्वन्तरमात्मज्ञापकमस्तीति । ज्ञानस्य समवायिकारणापेक्षित्वं कार्यत्वाद् घटवत् ।

**प्रवृत्तिनिवृत्ती च प्रत्यगात्मनि दृष्टे परत्र लिङ्गमिति[2] । ३ । १ । १४ ।**

प्रत्यगात्मेति शरीरम् । शरीरे प्रवृत्तिनिवृत्ती दृष्टे आत्मानमनुमापयतः । शरीरं प्रयत्नवता अधिष्ठितं हिताहितप्रवृत्तिनिवृत्तिमत्त्वाद् घटवत् ।

॥ तृतीयस्याद्यमाह्निकम् ॥

---

देशोऽसन् सन्दिग्धश्च' मि. । **प्रमाणसमुच्चयवृत्ति.** T[1] पृ० ६५b, T[2] पृ० १४८a । "एतदेवाह **सूत्रकारः**—'अप्रसिद्धोऽनपदेशोऽसन् **सन्दिग्धश्च**' इति ।"—**प्रशस्तपादभाष्य.** । "एतदेवाह सूत्रकारः—अप्रसिद्धोऽनपदेशोऽसन् **सन्दिग्धश्चे**ति । अप्रसिद्धोऽनपदेश इति विरुद्धावरोधः, तस्य सपक्षेऽप्रसिद्धत्वात् । असन्नित्यसिद्धः, तस्य पक्षधर्मत्वेनासत्त्वात् । **सन्दिग्धश्चानपदेश** इत्यनैकान्तिकसंग्रहः ।"—**व्यो.** पृ० ५६९ ।

१ परो नास्ति O. P. । २ लिङ्गम् । तृतीयस्य प्रथममाह्निकम् PS. । दृश्यतां पृ० १० टि० २ ।

## तृतीयस्याध्यायस्य द्वितीयमाह्निकम् ।

उक्त आत्मेन्द्रियमनोऽर्थसन्निकर्षो ज्ञानहेतुः । तत्सिद्ध्यर्थं मनः कथयति —

**आत्मेन्द्रियार्थसन्निकर्षे ज्ञानस्याभावो भावश्च मनसो लिङ्गम् । ३ । २ । १ ।**

आत्मेन्द्रियार्थानां सन्निकर्षे यदभावाज्ज्ञानं न भवति यद्भावे च भवति तद् मनः । एवं ज्ञानोत्पत्त्यनुत्पत्ती मनसो लिङ्गम् । गुणाः संख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वसंस्काराः ।

**द्रव्यत्वनित्यत्वे वायुना व्याख्याते । ३ । २ । २ ।**

यथा अद्रव्यवत्त्वात् परमाणुवायोर्द्रव्यत्वं नित्यत्वं च एवं मनसः ।

**प्रयत्नायौगपद्याज्ज्ञानायौगपद्याच्चैकं मनः । ३ । २ । ३ ।**

बहुषु कार्येषु ज्ञेयेषु च युगपत् प्रयत्ना ज्ञानानि वा न प्रादुर्भवन्तीत्यतः प्रयत्नज्ञानायौगपद्यादेकं मनः प्रतिशरीरं मूर्तमस्पर्शं निरवयवं नित्यमणु आशुचारीति ।

**प्राणापाननिमेषोन्मेषजीवनमनोगतीन्द्रियान्तरविकाराः सुखदुःखे इच्छाद्वेषौ प्रयत्नश्चेत्यात्मलिङ्गानि । ३ । २ । ४ ।**

प्राणापाननिमेषोन्मेषा मनोगतिश्च प्रयत्नकार्यत्वादात्मनो लिङ्गम्, जीवनमदृष्टकार्यत्वात्, इन्द्रियान्तरविकाराः स्मृतिप्रभवत्वात्, सुखादयो गुणत्वात् । तिर्यक्पवनस्य वायोर्देहस्थितस्य यत् प्राणापानकर्म तत् प्रयत्नकार्यम्, शरीरपरिगृहीतवायुविषयत्वे सति विकृतत्वात्, भस्त्रापरिगृहीतवायुकर्मवत् । निमेषोन्मेषक्रियापि प्रयत्नकार्या, निमेषोन्मेषक्रियाशब्दवाच्यत्वात्, दारुयन्त्रनिमेषोन्मेषक्रियावत् । मनसा संयोग आत्मनोऽदृष्टापेक्षो जीवनम्, शरीरवृद्ध्यादि तत्कार्यमपि जीवनम्, शरीरं प्रयत्नवताधिष्ठितम्, वृद्धिक्षतभग्नसंरोहणनिमित्तत्वात्, जीर्णगृहवत् । इन्द्रियान्तरं प्रति मनसो गमनं मनोगतिः प्रयत्नकार्या, अभिमतप्रदेशसम्बन्धनिमित्तत्वात्, पेलकक्रियावत्, सा हि दारकप्रयत्नकृता । रूपालोचन-संस्कारव्यक्ति-रसस्मरण-प्रयत्न-मनःक्रिया-रसनमनःसम्बन्ध-रसनविकाराणां पूर्वस्य पूर्वस्य कारणत्वादुत्पत्तिः, ज्ञप्तिस्तु वैपरीत्येन, उत्तरोत्तरस्मात् पूर्वस्य पूर्वस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्मरणेन आत्मा अनुमीयते । न स्मृतिरिन्द्रियाणामन्येन दृष्टेऽर्थेऽन्यस्य । न शरीरावयवस्य[1], अवस्थाभेदेन भिद्यमानत्वात् । "देवदत्तस्य रूपरसगन्धस्पर्शप्रत्यया एकानेकनिमित्ताः, 'मया' इति प्रत्ययेन प्रतिसन्धानात्, कृतसङ्केतानां बहूनामेकस्मिन् नर्तकीभ्रूक्षेपे युगपदनेकप्रत्ययवत्" [न्यायवार्तिक १ । १ । १०] इति **उद्द्योतकरः** ।

सुखादयश्च गुणिसापेक्षाः, गुणत्वात्, रूपवत् ।

**द्रव्यत्वनित्यत्वे वायुना व्याख्याते । ३ । २ । ५ ।**

अद्रव्यवत्त्वात् परमाणुवायोरिव द्रव्यत्वनित्यत्वे ।

ननु च

**यज्ञदत्त इति सति सन्निकर्षे प्रत्यक्षाभावाद् दृष्टं लिङ्गं न विद्यते । ३ । २ । ६ ।**

यथा चाक्षुषार्थसन्निकर्षे[3] सति यज्ञदत्तोऽयमिति प्रत्यक्षं भवति न तथा प्राणादिसुखादिसम्बद्धोऽयमात्मेति ज्ञानं जायते । अथ कथमदृष्टसम्बन्धं प्राणादि आत्मनो लिङ्गम् ? तदाह–न प्राणादि दृष्टं लिङ्गम् ।

**सामान्यतो दृष्टाच्चाविशेषः । ३ । २ । ७ ।**

प्राणादीनां निर्निमित्तानां सुखादीनां चानाश्रितानामनुत्पत्तिः, अत एषां केनापि निमित्तेनाश्रयेण भाव्यम्, इत्यतोऽपि सामान्यतो दृष्टादाकाशादीनामनिरासादविशेषः, तेषामपि हेतुत्वसम्भवात् ।

**तस्मादागमिकम् । ३ । २ । ८ ।**

'आत्मास्ति' इति प्रवादमात्रमित्यर्थः ।

नैतत्,

**अहमिति शब्दव्यतिरेकान्नागमिकम् । ३ । २ । ९ ।**

अहमिति शब्देन क्षित्यादिभिन्नात्मद्रव्यविषयेण[4] ऐकाधिकरण्यात् 'अहं प्राणादिमान्, अहं सुखवान्' इति । तस्मात् प्राणादिलिङ्गत्वान्नागमिकम् ।

---

१ शरीरस्य O. । २ दृश्यतां **नयचक्रवृत्तिः** पृ० ५८७ पं० १६ । **तत्त्वसंग्रहपञ्जिका.** श्लो० १८०-१८१ । ३ 'चक्षुषा अर्थसन्निकर्षे' इति पाठोऽत्र समीचीनो भाति । ४ क्षित्यादिविभिन्ना° O. ।

ननु च

**[1]यदि च दृष्टप्रत्यक्षोऽहं देवदत्तोऽहं यज्ञदत्त इति । ३ । २ । १० ।**

यदि खल्वहं देवदत्तोऽहं यज्ञदत्त इत्यात्मनि दृष्टप्रत्यक्षमिदं भवेत् एवं युज्येत अहंशब्दस्यात्मवाचकत्वम्, यावता शरीराभिधायकदेवदत्तशब्दैकार्थाधिकरणत्वादहंशब्दोऽपि शरीरवाचकः । तस्मान्न [2]प्राणादिसुखादीन्यात्मनिर्णयहेतुः ।

देवदत्तशब्दः कथं शरीरे इत्याह—

**देवदत्तो गच्छति विष्णुमित्रो गच्छतीति चोपचाराच्छरीरप्रत्यक्षः । ३ । २ । ११ ।**

गमनवाचिना 'गच्छति' इति शब्देन सह प्रयोगाद् देवदत्तशब्दः शरीरवचनोऽवसीयते आत्मनो गत्यसम्भवात् । तस्मादहंशब्दोऽपि शरीरे एव, देवदत्तशब्देन सह दृष्टत्वात् ।

नैतत्,

**सन्दिग्धस्तूपचारः । ३ । २ । १२ ।**

देवदत्तशब्देन एकार्थाधिकरणत्वाद् योऽयमुपचारोऽहंशब्दस्य शरीरे स सन्दिग्धः, किं शरीरस्य आत्मोपकारकत्वादहंशब्द आत्माभिधायक उपचरित उत मुख्यतया शरीरस्याभिधायकः ? इति न शरीरात्मनोरहंशब्दस्य निश्चयः ।

स्वपक्षे निश्चयमाह—

**अहमिति प्रत्यगात्मनि भावात् परत्राभावादर्थान्तरप्रत्यक्षः । ३ । २ । १३ ।**

प्रत्यगात्मनीति आत्मनि, परत्रेति शरीरे । यदि अहंशब्दः शरीरवचनः स्यात् एवं सति तस्मिन् पिण्डे देवदत्तशब्द इव सर्वैः प्रयुज्येत । न त्वेवम्, अत आत्मन्यर्थान्तरे 'अहं'शब्दः प्रत्यक्षः ।

शरीर इव आत्मन्यपि परैरप्रयोगान्न स्यादिति चेत्, अत आह—

**न तु शरीरविशेषाद् यज्ञदत्तविष्णुमित्रयोर्ज्ञानविशेषः । ३ । २ । १४ ।**

---

१ यदि दृष्टप्र° O. । २ प्राणादिसुखादीनां निर्णयहेतुः O. P. ।

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

यज्ञदत्तवि[1]ष्णुमित्रयोः सम्बन्धिनः शरीरविशेषाद् यथा दृष्टाद् न तदीये सुखादावस्मदादीनां जायते ज्ञानं तथैव न तदीयाहङ्कारोऽस्माभिः संवेद्यते यतोऽहंशब्दः प्रयुज्येत । शरीरवाचकत्वे तु यथा शरीरं दृष्ट्वा तत्र देवदत्तशब्दं प्रयुञ्जते तद्वदिममपि प्रयुञ्जीरन्, न त्वेवम् । तस्मान्न शरीरे । आत्मवृत्तित्वे तु परैरप्रयोगः । एवमहंशब्देन एकाधिकरणत्वात् सुखादय आत्मविषयाः प्राणादयश्च तन्निमित्ताः ।

ननु*

**[2]सुखदुःखज्ञाननिष्पत्त्यविशे[3]षादैकात्म्यम् । ३ । २ । १९ ।**

यथा सलिङ्गाविशेषाद् विशेषलिङ्गाभावाच्चैको भावस्तथैव सुखदुःखज्ञानानां निष्पत्त्यविशेषाद् विशेषलिङ्गाभावाच्चैकात्म्यम् ।

नैतत्*

**नाना व्यवस्थातः । ३ । २ । २० ।**

अन्यस्य सुखादियोगेऽन्यस्य तदभावादनया व्यवस्थया नाना आत्मानः ।

**[4]शास्त्रसामर्थ्याच्चेति । ३ । २ । २१ ।**

'ग्रामकामो यजेत, [3]स्वर्गकामो यजेत' [ ] इत्यतोऽपि शास्त्रसामर्थ्याद् नाना आत्मानः । तस्य गुणाः बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नादृष्टसंस्कारा वैशेषिकाः । अन्ये तु संख्यापरिमाणपृथक्त्वसंयोगविभागाः ।

॥ तृतीयोऽध्यायः ॥

---

१ °विष्णुमित्रसम्बन्धेन P. । २ * * एतच्चिह्नान्तर्गतः पाठः O मध्ये नास्ति । ३ °षादैक्यम् P । ४ शास्त्रसामर्थ्याच्च । तृतीयोऽध्यायः PS. ।

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

## चतुर्थस्याध्यायस्याद्यमाह्निकम् ।

एवं द्रव्याण्युक्त्वा नित्यत्वमुपलब्ध्यनुपलब्धी च तेषु कथयति प्रसङ्गादन्यत्–

**[1]सदकारणवत् तन्नित्यम् । ४ । १ । १ ।**

अद्रव्यवत्त्वादित्यनेन यत् सत् कारणरहितं तद् नित्यमुक्तं परमाण्वादि ।

उपलब्धौ तु

**तस्य कार्यं लिङ्गम् । ४ । १ । २ ।**

तस्य परमाण्वादेरिन्द्रियैरगृह्यमाणस्यापि शरीरमहाभूतादि[2] कार्यं लिङ्गम् ।

यतः

**कारणभावाद्धि कार्यभावः । ४ । १ । ३ ।**

यस्मात् कारणेभ्यस्तन्त्वादिभ्यः पटादि कार्यमुत्पद्यतेऽतः कार्यस्य कारणपूर्वकत्वात् कारणस्य कार्यं लिङ्गम् ।

**[3]अनित्यमिति च विशेषप्रतिषेधभावः । ४ । १ । ४ ।**

यदा खलु 'सर्वं कार्यमनित्यम्' इत्युच्यते तदानेन नित्यत्वस्य विशेषप्रतिषेधेन कार्यविषयेण किञ्चित् कारणं नित्यमिति ज्ञायते ।

**अविद्या च । ४ । १ । ५ ।**

अविद्या अग्रहणमतीन्द्रियत्वेन परमाणूनाम्, तदपि अनित्यत्वं निवारयति । अदृश्यमाने ह्यर्थे तद्गतमनित्यत्वं केन गृह्येत ? तस्मान्नानित्यता वक्तुं शक्या ।

---

१ सदकारणवन्नित्यम् O. PS. मि. उ. । **विशालामलवती.** पृ० ११७ a । "सदकारणवत्त्वा-(त्त ?)न्नित्यम्"—**प्रमाणसमुच्चयवृत्ति.** T[1] पृ० ३९ a, T[2] पृ० १२० b । यथा P. मध्ये तथा **नयचक्रवृत्तौ** [पृ० ३९० पं० ८] अपि '**सदकारणवत् तन्नित्यम्**' इति पाठ उपलभ्यत इति सोऽपि प्राचीनः पाठः । २ °भूतादिकं लिङ्गम् O. । ३ अनित्यमिति च विशेषप्रतिषेधभावः PS. । अनित्य इति विशेषतः प्रतिषेधभावः–**उ.** । अनित्यमिति विशेषप्रतिषेधाभावः O. । अनित्यमिति न विशेषे प्रतिषेधभावः P. । "यदपि नित्यत्वे द्वितीयं कारणमुक्तम्–**अनित्यमिति च विशेषतः प्रतिषेधाभाव** इति"—**ब्रह्मसूत्रशांकरभाष्य** २ । २ । १५ । 'यदपि द्वितीयमिति । लब्धरूपं हि क्वचित् किञ्चिदन्यत्र निषिध्यते तेन 'अनित्यम्' इति लौकिकेन निषेधेन अन्यत्र नित्यत्वसद्भावः कल्पनीयः । ते चान्ये परमाणव इति ।"—**ब्रह्मसूत्रशांकरभाष्यभामती.** २ । २ । १५ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उपलब्धिः कथमिति चेत्,

**महत्यनेकद्रव्यवत्त्वाद्रूपाच्चोपलब्धिः । ४ । १ । ६ ।**

महत्त्वपरिमाणसमवायिनि द्रव्ये समवायिकारणद्रव्यबहुत्वाद् रूपाच्च शुक्लादेर्ज्ञानं भवति ।

कुत एतत् ? यतः

**अद्रव्यवत्त्वात् परमाणावनुपलब्धिः । ४ । १ । ७ ।**

सत्यपि रूपे परमाणोः समवायिकारणद्रव्याभावान्नोपलब्धिः ।

**रूपसंस्काराभावाद् वायावनुपलब्धिः । ४ । १ । ८ ।**

सत्यपि अनेकद्रव्यवत्त्वे महत्त्वे च रूपाख्यस्य संस्कारस्याभावाद् वायावनुपलब्धिः । अनेकद्रव्यताया विशिष्टाया [1]ग्रहणात् द्व्यणुकेऽप्यनुपलब्धिः सिद्धा ।

रूपे कथम् ?

**[2]अनेकद्रव्येण द्रव्येण समवायाद् रूपविशेषाच्चोपलब्धिः । ४।१। ९।**

महता [3]अनेकद्रव्यसमवायिद्रव्येण घटादिना रूपगुणस्य समवायाद् रूपविशेषाच्च रूपत्वाख्यात् सामान्यविशेषादुपलब्धिः ।

**एतेन रसगन्धस्पर्शेषु ज्ञानं व्याख्यातम् । ४ । १ । १० ।**

एतेन अनन्तरोक्तेन न्यायेन अनेकद्रव्येण द्रव्येण समवायाद् रसत्वादिसामान्य-विशेषेभ्यश्च रसादीनामुपलब्धिः ।

**तदभावादव्यभिचारः । ४ । १ । ११ ।**

परमाणुरूपस्[4]यानेकद्रव्येण द्रव्येण समवायाभावान्नोपलब्धिः, ततोऽनेकद्रव्येण [द्रव्येण] समवायस्य रूपोपलब्धेश्चाव्यभिचारः ।

**संख्याः परिमाणानि [5]*पृथक्त्वं संयोगविभागौ परत्वापरत्वे कर्म च [6]रूपिद्रव्यसमवायाच्चाक्षुषाणि । ४ । १ । १२ ।**

रूपीति* विशिष्टं रूपि, तेन उपलब्धियोग्येन रूपिणा समवायादेतानि चाक्षुषाणि

१ अ[त्र ?]ग्रहणात् P. । २ अनेकद्रव्येण समवायाद् PS. O. । ३ अनेकसमवायि॰ O. । ४ °स्यानेकद्रव्येण समवाया° O. । ५ * * एतच्चिह्नान्तर्गतः पाठः P मध्ये नास्ति । ६ रूपि-समवाया° O. ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वसामान्यविशेषेभ्यश्च ।

कुतः ?

**अरूपित्वचाक्षुषत्वात् । ४ । १ । १३ ।**

यस्माद् रूपरहितेषु [1]महत्सु द्रव्यान्तरेषु स्थितानि न ज्ञायन्ते ।

**एतेन गुणत्वे भावे च [2]सर्वेन्द्रियज्ञानं [3]व्याख्यातम् । ४ । १ । १४ ।**

यथैव महत्यनेकद्रव्येण समवायाद् रूपादीनां समवेतानामुपलब्धिरेवं महति समवेतेषु गुणेषु समवेतयोर्गुणत्वभावयोस्तैस्तैर्गुणे रूपादिभिः[4]* समवायाद् यथास्वं चक्षुरादीन्द्रियैरुपलब्धिः, न तु सामान्य[5]विशेषास्तेषूपलम्भकास्तदभावात् । एवं तत्त्वादीनां सर्वैरिन्द्रियैः द्रव्ये तु भावस्य* समवायात् । कर्मणि समवेतसमवायाद् गुणवत् ।

। चतुर्थस्याद्यमाह्निकम् ॥

१ महत्सु वा्यान्तरेषु P. । महत्त्ववान्तरेषु O. । २ सार्वेन्द्रियज्ञानं P. । सर्वेन्द्रियं ज्ञानं PS. मि. उ. । ३ व्याख्यातम् । चतुर्थस्य प्रथमाह्निकम् PS. । ४ * * एतच्चिह्नान्तर्गतः पाठः O मध्ये नास्ति । ५ °विशेषेषूपल° P. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## चतुर्थस्याध्यायस्य द्वितीयमाह्निकम् ।

इदानीमाध्यात्मिकमेषां कार्यमुच्यते, तत्र—

**[1] प्रत्यक्षाप्रत्यक्षाणामप्रत्यक्षत्वात् संयोगस्य पञ्चात्मकं न विद्यते । ४ । २ । १ ।**

क्षित्यादिपञ्चकेन शरीरारम्भे त्रयाणां प्रत्यक्षत्वाद् वायोरप्रत्यक्षत्वाद् यथा तद्गता संयोगोऽप्यप्रत्यक्ष एवं शरीरमप्रत्यक्षं स्यात् प्रत्यक्षाप्रत्यक्षैरारब्धत्वात् । प्रत्यक्षत्वात्तु मन्यामहे—न पञ्चभिरारब्धमिति ।

ननु त्रिभिः प्रत्यक्षै[2]रारभ्येत,

**गुणान्तराप्रादुर्भावाच्च त्र्यात्मकमपि न । ४ । २ । २ ।**

क्षितिसलिलानलैरारम्भे विलक्षणेभ्यो रूपादिभ्यः कार्ये विलक्षणानि रूपाणि गुणान्तराणि जायेरन् । न त्वेवम् । अपि तु पार्थिवानेव रूपादीनुपलभामहे । तस्मान्न त्र्यात्मकम् ।

**आत्मसंयोगस्त्वविप्रतिषिद्धो मिथः पञ्चानाम् । ४ । २ । ३ ।**

आत्मशब्देन स्वरूपम्, स्वरूपेण पञ्चानामपि भूतानां परस्परसंयोगो न प्रतिषिध्यते [3]शरीरेऽनारम्भकत्वेन । पार्थिवशरीरे जलादीनि संयोगीनि, न समवायीनि । जलादिभिरयोनिजमेव शरीरमारभ्यते वरुणलोकादौ ।

कुतः ?

**अनेकदेशपूर्वकत्वात् । ४ । २ । ४ ।**

अनेकदेशाः परमाणवः,[4] तैरेवारभ्यते जलादिशरीरम्, न शुक्रशोणिताभ्याम् ।

तच्च

**धर्मविशेषात् । ४ । २ । ५ ।**

धर्मविशेषापेक्षाः परमाणव एव शरीरमारभन्ते न शुक्रादि । कथं हि पुण्यवतां शुक्रादिमयं शरीरं स्यात् ।

---

१ प्रत्यक्षाप्रत्यक्षाभ्यामप्रत्य° P. । २ °रारभ्यते O. । ३ शरीरेणारम्भकत्वेन O. P. । ४ तैरारभ्यते O. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इतश्च,

**कार्यविशेषात् । ४ । २ । ६ ।**

शलभादिशरीराख्यात् कार्यविशेषाद् मन्यामहे–सन्त्ययोनिजानि ।

इतश्च,

**समाख्याभावात् । ४ । २ । ७ ।**

‘ अङ्गारेभ्यो जातोऽङ्गिराः ’ इत्येवमादिसमाख्याभावाद् मन्यामहे–सन्त्ययोनिजानि ।

कुतः ?

**संज्ञादिमत्त्वात् । ४ । २ । ८ ।**

यतः प्रत्यक्षेण अङ्गारजन्मादिकमर्थं[1] दृष्ट्वा पुरुषैः प्रणीयन्ते संज्ञाः ‘ अङ्गिराः ’ इत्यादयः । अतः संज्ञानामादिमत्त्वात् समाख्या यथार्था ।

अतः

**सन्त्ययोनिजा[2] वेदलिङ्गा[3]च्चेति । ४ । २ । ९ ।**

‘ चन्द्रमा मनसो जातः ’ [ ] इत्यादिकाच्च वेदलिङ्गात् सन्त्ययोनिजाः शरीरविशेषाः । एवं जलादिशरीरमयोनिजमेव । पार्थिवं तु योनिजमयोनिजं च ।

॥ चतुर्थोऽध्यायः । समाप्तो द्रव्याधिकारः ॥

१ °जन्मादिकं दृष्ट्वा O. । २ °जानि वेद° O । ३ °लिङ्गाच्च । चतुर्थोऽध्यायः PS. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## पञ्चमस्याध्यायस्य प्रथममाह्निकम् ।

एवमुक्तेषु द्रव्येषु गुणानुलङ्घ्य अल्पवक्तव्यत्वात् कर्माण्यभिधत्ते । तत्र—

**आत्मसंयोगप्रयत्नाभ्यां हस्ते कर्म । ५ । १ । १ ।**

स्वाश्रयसंयोगापेक्षित्वात् प्रयत्नस्य क्रियारम्भे आत्महस्तसंयोगः कर्मणः कारणम् । [1]सोपेक्षकारणत्वात् संयोगस्य प्रयत्नोऽपि कारणम् । अतो द्वाभ्यां हस्ते कर्म ।

**तथा मुसलकर्म हस्तसंयोगाच्च । ५ । १ । २ ।**

तथेति सङ्ख्यामात्रातिदेशः, तेन हस्तमुसलसंयोगो मुसलकर्मणः कारणं पूर्वाधिकृतश्च प्रयत्नः । न तु आत्महस्तसंयोगोऽसमवायिकारणं मुसलकर्मणि, आत्मसंयुक्तहस्तसंयोगादेव तत्सिद्धेः ।

**अभिघातजे मुसलकर्मणि व्यतिरेकादकारणं हस्तसंयोगः । ५ । १ । ३ ।**

वेगवद्द्रव्यसंयोगोऽभिघातः, उलूखलाभिघातादुत्पन्ने मुसलस्योत्पतनकर्मणि अकारणं हस्तमुसलसंयोगः पूर्वप्रयत्नस्याभिघाताद् विनष्टत्वात्, 'उत्पततु मुसलद्रव्यम्' इतीच्छाया अभावात् प्रयत्नान्तरस्याभावः, संयोगस्य च [2]गुणकर्मारम्भे सापेक्षकारणत्वात् प्रयत्नरहितो हस्तमुसलसंयोगो न कारणमुत्पतनस्य ।

**तथात्मसंयोगो हस्तमुसलकर्मणि । ५ । १ । ४ ।**

यथैव हस्तमुसलसंयोगो मुसलोत्पतनकर्मणि न कारणं तथात्महस्तसंयोगोऽपि हस्तोत्पतनकर्मणि न कारणं संयोगस्य सापेक्षकारणत्वात् 'मुसलेन सहोत्पततु हस्तः' इति [अभि]सन्धेरभावेन प्रयत्नस्य चाभावात् ।

कुतस्तयोरुत्पतनमिति चेत्,

**मुसलाभिघातात्तु मुसलसंयोगाद्धस्ते कर्म । ५ । १ । ५ ।**

उलूखलाभिघातो मुसलस्योत्पतनकर्मणः कारणम् । हस्तमुसलसंयोगस्तु मुसलगतवेगापेक्षो हस्तकर्मणः कारणम्, नाभिघातोऽसमवेतत्वात् ।

---

१ सापेक्षि° O. । २ गुणकर्मारम्भसापेक्ष° O. । °णकर्मारम्भे सापेक्ष° P. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**तथात्मकर्म हस्तसंयोगाच्च । ५ । १ । ६ ।**

आत्मेति शरीरैकदेशः, यथा चैतदप्रत्ययं हस्ते मुसले च कर्म तथैव हस्तावयवसंयोगाद् हस्तगतवेगापेक्षाद् हस्तोत्पतनकालेऽवयवे तस्मिन्नप्रत्ययं कर्म जायते ।

**संयोगाभावे गुरुत्वात् पतनम् । ५ । १ । ७ ।**

विभागान्निवृत्ते हस्तमुसलसंयोगे गुरुत्वात् पतनं भवति ।

**नोदनविशेषाभावाद् नोर्ध्वं न तिर्यग् गमनम् । ५ । १ । ८ ।**

नुद्यतेऽनेनेति नोदनं वेगप्रयत्नापेक्षः संयोगविशेषः, प्रेरकप्रयत्नाभावे नोदनाभावाद् नोर्ध्वं तिर्यग् वा केवलाद् गुरुत्वाद् मुसलादेर्गमनकर्म भवति ।

[1]कुतो नोदनविशेषः ?

**प्रयत्नविशेषान्नोदनविशेषः । ५ । १ । ९ ।**

'अत्र इदं क्षिपामि' इति इच्छाविशेषजः प्रयत्न उत्पन्नो हस्तादेर्द्रव्यस्य द्रव्यान्तरेण संयोगं नोदनाख्यं जनयति ।

**नोदनविशेषादुदसनविशेषः । ५ । १ । १० ।**

[2]दूरदेशप्रेरणेच्छाविशिष्टात् प्रयत्नाज्जातो नोदनविशेषो दूरदेशक्षेपणं करोति ।

**हस्तकर्मणा दारककर्म व्याख्यातम् । ५ । १ । ११ ।**

यद् गर्भस्य स्पन्दनादिकर्म तदात्मशरीरैकदेशसंयोगाज्जीवनपूर्वकप्रयत्नापेक्षाद् भवतीति सप्रत्ययम्, मातुः कार्यावस्करोपसर्पणकर्म गर्भस्या[3]प्रत्ययमात्मसंयोगाददृष्टापेक्षाद् भवतीति ।

**तथा दग्धस्य विस्फोटनम् । ५ । १ । १२ ।**

व्यासक्ते मनसि यद् दग्धस्य [4]हस्तादेर्विक्षेपणं तदपि जीवनपूर्वकप्रयत्नापेक्षादात्महस्तसंयोगाद् भवतीति नाप्रत्ययम् ।

**प्रयत्नाभावे गुरुत्वात् सुप्तस्य पतनम् । ५ । १ । १३ ।**

शरीरविधारकप्रयत्नाभावे सुप्तस्याङ्गानां पतनं गुरुत्वाद् भवति [5]तदाभिसन्धेरभावात् ।

---

१ ततो O. । २ दूरदेशे O. । ३ °प्रत्ययात्मसंयोगा° O. । ४ हस्तादेरवक्षेपणं O. । ५ तदाऽभिसन्धे° P. । तदभिसन्धे° O. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**तृणकर्म वायुसंयोगात् । ५ । १ । १४ ।**

वेगापेक्षाद् वायुतृणसंयोगात् तृणादीनां कर्म, तेषां प्रयत्नाभावात् ।

**मणिगमनं सूच्यभिसर्पणमित्यदृष्टकारितानि । ५ । १ । १५ ।**

मणीनां तस्करं प्रति गमनं सूचीनां [1]चायस्कान्तं प्रति धर्माधर्मकृतमित्यर्थः ।

**इषावयुगपत् [2]संयोगविशेषाः कर्मान्यत्वे हेतुः । ५ । १ । १६ ।**

नोदनादाद्यं कर्म, संस्काराद् बहूनि कर्माणि इषावुत्पद्यन्ते । एकस्मिंस्तु कर्मणि प्रथमेणैवाकाशसंयोगेन विनष्टत्वात् कर्मण उत्तरसंयोगविभागा नोत्पद्येरन्, तस्मादिषावनेकं कर्म ।

**नोदनादाद्यमिषोः कर्म [3]कर्मकारिताच्च संस्कारादुत्तरं तथोत्तरमुत्तरं च । ५ । १ । १७ ।**

ज्याशरसंयोगः प्रयत्नापेक्षो ज्यागतवेगापेक्षो वा नोदनम्, तत आद्यमिषोः कर्म नोदनापेक्षं संस्कारं करोति, निरपेक्षं तु संयोगविभागौ । ततः संयोगाद् विनष्टे कर्मणि नोदने विभागाद् [4]विनिवृत्ते आद्यकर्मजसंस्कार उत्तरमिषौ कर्म करोति, त[5]थोत्तरमुत्तरं पौनःपुन्येनेत्यर्थः ।

**संस्काराभावे गुरुत्वात् पतनम् । ५ । १ । १८ ।**

स्पर्शवद्द्रव्यसंयोगेन संस्कारविनाशाद् गुरुत्वं तत्पतनकर्म करोति ।

॥ पञ्चमस्याद्यमाह्निकम् ॥

१ वायस्कान्तं P. । २ संयोगविशेषात्कर्मान्यत्वे हेतुः P. । संयोगविशेषात् कर्मान्यत्वे हेतुः PS. । संयोगविशेषः कर्मान्यत्वे हेतुः O. । संयोगविशेषाः कर्मान्यत्वे हेतुः **मि. उ.** । संयोगविशेषाः कर्मान्यत्वे हेतवः—**न्यायवार्तिक.** १ । ४० । ३ तत्कर्मकारिताच्च **मि. उ. सूक्ति** पृ० १७१, **सेतु** पृ० १८०, **व्योमवती** पृ० १९५ । ४ निवृत्ते O. । ५ तथोत्तरमुत्तरेण O. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# पञ्चमस्याध्यायस्य द्वितीयमाह्निकम् ।

आध्यात्मिकेषु तत्सम्बद्धेषु च कर्माण्युक्त्वा महाभूतकर्माणि व्याचष्टे–

**नो[1]दनादभिघातात् संयुक्तसंयोगाच्च पृथिव्यां कर्म ।५।२।१।**

समस्तान् व्यस्तांश्च गु[2]रुत्वद्रवत्ववेगप्रयत्नानपेक्षमाणो यः संयोगविशेषो [3]नोदनात् प्रेरणादविभागहेतोः कर्मणः कारणं [ तद् ? ] नोदनम्, तथाहि–पादादिभिर्नुद्यमानायां पङ्काख्यायां पृथिव्यां कर्म जायते । वेगापेक्षोऽभिघातादभिहन्यमानस्य विभागहेतोः कर्मणः कारणं संयोगोऽभिघातः, तथाहि–रथादिभिरभिघातात् पृथिव्येकदेशेषु दृश्यते कर्म । संयुक्तसंयोगाच्च, [4]नुद्यमानाभिहन्यमानाभ्यां च संयुक्तेषु भवन्ति कर्माणि ।

**तद् विशेषेणादृष्टकारितम् ।५।२।२।**

यत् खलु विरुद्धक्रियवायुसंयोगात् सर्वस्यां पृथिव्यां कम्पादि कर्म प्रजानां शुभाशुभसूचनायोत्पद्यते तत् सर्वेषामेव शुभाशुभसूचनाद् विशेषेणादृष्टकारितम् ।

**अपां संयोगाभावे गुरुत्वात् पतनम् ।५।२।३।**

विधारकवाय्वभ्रसंयोगाभावेऽपां गुरुत्वात् पतनकर्म भवति ।

**तद् विशेषेणादृष्टकारितम् ।५।२।४।**

सस्यानां समृद्धये वि[5]नाशाय वा सर्वजनानामदृष्टेन जनितं पतनकर्म अदृष्टकारितमुच्यते ।

**द्रवत्वात् स्यन्दनम् ।५।२।५।**

---

१ नोदनाभिघातात् O. **मि. उ.** । २ गुरुत्ववेग॰ O. । ३ नोदनादविभागहेतोः P. । तुलना—"तत्र नोदनं गुरुत्वद्रवत्ववेगप्रयत्नानपेक्षमाणो यः संयोगविशेषो नोदनमविभागहेतोरेकस्य कर्मणः कारणं तस्माच्चतुर्ष्वपि महाभूतेषु कर्म भवति, यथा पङ्काख्यायां पृथिव्याम् । वेगापेक्षो यः संयोगविशेषो विभागहेतोरेकस्य कर्मणः कारणं सोऽभिघातः । तस्मादपि चतुर्षु महाभूतेषु कर्म भवति यथा पाषाणादिषु निष्ठुरे वस्तुन्यभिपतितेषु । तथा पादादिभिर्नुद्यमानायामभिहन्यमानायां वा पङ्काख्यायां पृथिव्यां यः संयोगो नोदनाभिघातयोरन्यतरापेक्ष उभयापेक्षो वा स संयुक्तसंयोगः तस्मादपि पृथिव्यादिषु कर्म भवति । ये च प्रदेशा न नुद्यन्ते नाप्यभिहन्यन्ते तेष्वपि कर्म जायते ।" इति **प्रशस्तपादभाष्ये** कर्मनिरूपणे । ४ नुद्यमानाभिहन्यपरित्यागसंयुक्तेषु O. । ५ विनाशायात्र सर्वजनाना॰ O. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विधारकाभावादपां स्यन्दनकर्म द्रवत्वाद् भवति ।

**नाड्या वायुसंयोगादारोहणम् । ५ । २ । ६ ।**

नाडीति रश्मिः, सवितुर्द्वौ रश्मी–शुचिश्च शुक्रश्च । शुचिरप आदत्ते शुक्रेण वृद्धिं करोति । शुच्याख्यया नाड्या वायुसंयुक्तया [1]आदित्यप्रयत्नापेक्षयारोहणम् ।

**नोदनात् पीडनात् संयुक्तसंयोगाच्च । ५ । २ । ७ ।**

नोदनाच्चि[2]त्रदण्डादिभिरारोहणम्, पीडनाद् वस्त्रादिभिः, पीड्यमाननुद्यमानाभ्यां च संयुक्ते ।

**वृक्षाभिसर्पणमित्यदृष्टकारितम् । ५ । २ । ८ ।**

वृक्षमूले निषिक्तानामपां वृक्षोपरि गमनमदृष्टेन क्रियत इति ।

**अपां सङ्घातो विलयनं च [3]तेजसः संयोगात् । ५ । २ । ९ ।**

अपां सङ्घातः काठिन्यं दिव्येन तेजसा संयोगात्, दिव्यभौमाभ्यां तु विलयनम् ।

**[4]तत्रावस्फूर्जथुर्लिङ्गम् । ५ । २ । १० ।**

'अस्ति दिव्यासु अप्सु तेजः' इत्यत्र तेजसः [5]अवस्फूर्जथुरभ्रान्निःसरणं लिङ्गमिति ।

**वैदिकं च । ५ । २ । ११ ।**

'[6]तां अग्निं गर्भं दधिरे वमूषा' [ ] इति च वैदिकं वाक्यं दिव्यास्वप्सु तेजसो [7]लिङ्गमिति ।

**अपां संयोगाद् विभागाच्च स्तनयित्नुः । ५ । २ । १२ ।**

मेघाशनिशब्दः स्तनयित्नुः । विरुद्धदिक्क्रियाभ्यां वायुभ्यामपां प्रेर्यमाणानां तरङ्गभूतानां परस्पराभिघाताख्यात् संयोगाच्छब्दः । एकेनापि प्रकुपितेन वायुना व्यवच्छिद्यमानानामपां विभागाच्छब्दः ।

**पृथिवीकर्मणा तेजःकर्म वायुकर्म च व्याख्यातम् । ५ । २ । १३ ।**

यथा नोदनाभिघातसंयुक्तसंयोगादृष्टेभ्यः पृथिव्यां कर्म तथा तेजसो वायोश्च । [8]एतदनियतं कर्म ।

---

१ आदित्यं चतुरपेक्षया O. । २ °च्चत्रचण्डादिभि° O. । ३ तेजःसंयोगात् O उ. । ४ तत्र च स्फूर्जथु° P. । तत्रास्फूर्जथु° O. । तत्रापर्स्फुजथु° मि. । तत्र विस्फुर्जथु° उ. । ५ अथस्फूर्जथु° P. । ६ ता अग्निगर्भं दधिरे विरूपा O. । ७ लिङ्गम् P. । ८ एतदपि नियतं O. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नियतं तु—

**अग्नेरूर्ध्वज्वलनं वायोश्च तिर्यक्पवनमणुमनसोश्चाद्यं कर्मेत्यदृष्टकारितानि । ५ । २ । १४ ।**

अग्नेरवस्थाने तिर्यग् वा गमने पच्यमानस्याभस्मीभावः स्यादपां वा, तथा वायोरतिर्यग्गमने पूयमानद्रव्याणां पवनाभावोऽग्नेश्चाप्रबोधः, विनष्टशरीराणामात्मनां सर्गादौ पृथिव्यादिपरमाणुष्वाद्यं परस्परोपसर्पणकर्म न स्यात्, तथा लब्धभूमीनां योगिनां कल्पान्तेऽभिसन्धाय प्रयत्नेन मनः शरीराद् व्यतिरिच्यावतिष्ठमानानां सर्गादौ नवशरीरसम्बन्धाय मनस आद्यं कर्म न भवेत् अदृष्टादृते । तस्मादग्नेरूर्ध्वज्वलनं वायोश्च तिर्यक्पवनमणूनां चोपसर्पणकर्म मनसश्चाद्यं कर्म एतानि प्राणिनामदृष्टेन कृतानि ।

**हस्तकर्मणा मनसः कर्म व्याख्यातम् । ५ । २ । १५ ।**

यथात्मसंयोगप्रयत्नाभ्यां हस्ते कर्म तथात्ममनःसंयोगात् प्रयत्नाच्च मनसः कर्म, एतत् सदेहस्य कर्म, तत्र जाग्रत इच्छाद्वेषपूर्वकात् प्रयत्नात्, प्रबोधकाले तु जीवनपूर्वकात् ।

यतः संयोगो योगः स च कर्मकार्योऽतो योगाङ्गं कर्म, योगमोक्षौ च कर्माधिकारेऽप्युच्येते—

**आत्मेन्द्रियमनोर्थसन्निकर्षात् सुखदुःखे तदनारम्भः । ५ । २ । १६ ।**

यतो हेतोरात्मेन्द्रियमनोर्थसन्निकर्षो ज्ञानकारणत्वेन सुखःदुखे जनयत्यतस्तदनारम्भः तस्य सन्निकर्षस्यानारम्भोऽनुत्पत्तिरुच्यत इति ।

तथाहि—

**आत्मस्थे मनसि सशरीरस्य सुखदुःखाभावः स योगः ५ । २ । १७ ।**

यदा हि आत्मनि मनोऽवस्थितं नेन्द्रियेषु तदा चतुष्टयसन्निकर्षस्यानारम्भात् तत्कार्ययोः सुखदुःखयोरभावरूपो विद्यमानशरीरस्यात्मनो वायुनिग्रहापेक्ष आत्मनो मनसा संयोगो योगः ।

---

१ °रूर्ध्वं O. । °रूर्द्ध° P. PS. । २ °मानस्य भस्मीभावः स्यादपां तथा वायोरतिर्यग्गमने पूयमान° O. । ३ °द्रव्यागामेव नाभावः अग्नेश्चाप्रबोधः O. । ४ °रूर्द्धज्व° P. । रूर्ध्वं ज्व° O. । ५ मनसि स्वशरीरस्य PS । मनसि शरीरस्य O. P. उ. । ६ मनसि सशरीरस्य उ. । संयोगः O. PS. मि. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

योगाङ्गं प्राणायामकर्म किं नोक्तम् ?

**कायकर्मणाऽऽत्मकर्म व्याख्यातम् । ५ । २ । १८ ।**

इह आत्मशब्देन वायुः, यथात्मसंयोगप्रयत्नाभ्यां हस्ते कर्म तथात्मवायुसंयोगात् प्रयत्नाच्च प्राणायामकर्म ।

**अपसर्पणमुपसर्पणमशितपीतसंयोगः[1] कार्यान्तरसंयोगाश्चेत्यदृष्टकारितानि । ५ । २ । १९ ।**

मरणकाले पूर्वशरीराद् मनसो निःसरणमपसर्पणम्, शरीरान्तरेणाभिसम्बन्धो मनस उपसर्पणम्, शुक्रशोणितात् प्रभृति गर्भस्थस्य मात्रा [2]उपयुक्तेनान्नपानेन [3]नाड्यनुप्रविष्टेन सम्बन्धोऽशितपीतसंयोगः, कललार्बुदमांसपेशीघनशरीरादिभिरेकस्मिन्नेव संसारे ये सम्बन्धास्ते कार्यान्तरसंयोगाः, [4]तान्यपसर्पणादीन्यदृष्टेनैव क्रियन्ते, न प्रयत्नेन ।

**तदभावे संयोगाभावोऽप्रादुर्भावः स मोक्षः । ५ । २ । २० ।**

एवंरूपस्यानाद्यपसर्पणादिनिमित्तस्यादृष्टस्याभावे जीवनाख्यस्यात्ममनःसंयोगस्याभावोऽन्यस्य च शरीरस्याप्रादुर्भावो यः स मोक्षः ।

तमोवृतत्वात्[5] सर्वस्य ज्ञानानुत्पत्तौ तमो हेतुः । तत् पुनः—

**द्रव्यगुणकर्मवैधर्म्याद् [6]भावाभावमात्रं तमः । ५ । २ । २१ ।**

विनाशित्वेन नित्यैर्द्रव्यैर्वैधर्म्यादमूर्तत्वास्पर्शत्वप्रकाशविरोधैरनित्यद्रव्यैर्वैधर्म्यान्न द्रव्यं तमः, न च गुणः कर्म वा आश्रयानुपलब्धेः । तस्मात् प्रकाशस्याभावमात्रं तमः ।

कुत एतत् ?

**तेजसो द्रव्यान्तरेणावरणाच्च । ५ । २ । २२ ।**

तेजसः सवितृप्रकाशादेर्बहिः सद्भावात् पर्वतगुहादौ च द्रव्यान्तरेणावृतेऽभावाद् मन्यामहे—तेजसोऽभावमात्रं तम इति । बाह्यं प्रदीपादिनिवर्त्यम्, अविद्यात्मकं तु ज्ञानज्योतिषा, इत्युक्तौ योगमोक्षौ ।

---

१ °संयोगः कायान्तर° PS. । °संयोगकार्यान्तर° P. । °संयोगाः कार्यान्तर° O. **मि.** **उ.** **सेतु** पृ० ४१३, **व्योमवती** पृ० ४२७ । °**कायान्तर**° इति PS. पाठोप्यऽत्र समीचीनतरो भाति । "कार्यान्तरं शरीरान्तरम्"—**व्योमवती** पृ० ४२७ । २ (**उपभुक्तेन** ?) । "अशितपीतं भुक्तमुदकादि, तयोर्नाड्यन्तरेण सञ्चरणम्"—**व्योमवती** पृ० ४२७ । ३ नाड्यानुप्रविष्टे सम्बन्धो° P. । ४ ते तान्यपस° P. । ५ तमोवृत्तत्वात् O. P. । ६ भावाभावस्तमः PS. । अभावस्तमः **उ.** । भाऽभावस्तमः— **न्यायकन्दली** पृ० ६ । अत्र वृत्त्यनुसारेण **न्याय**कन्दल्यनुसारेण **मि.** अनुसारेण च '**भाऽभावस्तमः**' इति पाठोऽनुमतो भाति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**दिक्कालावाकाशं च क्रियावद्भ्यो वैधर्म्यान्निष्क्रियाणि। ५ । २ । २३ ।**

आकाश-काल-दिशोऽमूर्ताः क्रियावतः पृथिव्यादेरमूर्ततया वैधर्म्यान्निष्क्रियाः, 'च'शब्दादात्मापि निष्क्रियः ।

**एतेन कर्माणि गुणाश्च व्याख्याताः । ५ । २ । २४ ।**

[1]एतेनामूर्तत्वेन गुणाः कर्माणि च निष्क्रियाणि द्रष्टव्यानि, 'च'शब्दात् सामान्यादयः ।

**निष्क्रियाणां समवायः कर्मभ्यः प्रतिषिद्धः । ५ । २ । २५ ।**

निष्क्रियाणामभिघातादीनां कर्म समवेतं न भवति, स्वाश्रये कर्मजननात् ।

**कारणं त्वसमवायिनो गुणाः । ५ । २ । २६ ।**

यस्य गुणाः कारणमुक्तास्तस्यासमवायिन एव कारणम् ।

**गुणैर्दिग् व्याख्याता । ५ । २ । २७ ।**

'पूर्वेण निष्क्रमणम्' इत्यादेः प्रत्ययभेदस्य दिग् निमित्तकारणं व्याख्याता, कारणत्वेनातिदेशो नासमवायित्वेन ।

**[2]कारणेन काल इति । ५ । २ । २८ ।**

येनैव कारणेन प्रत्ययभेदहेतुत्वेन दिग् व्याख्याता तेनैव 'युगपत् कृतम्' इत्यादिप्रत्ययभेदस्य कालो निमित्तकारणं व्याख्यातः ।

॥ पञ्चमोऽध्यायः । समाप्तः कर्माधिकारः ॥

---

१ एतेन मूर्तत्वेन कर्माणि निष्क्रियाणि द्रष्टव्यानि O । एतेन मूर्तत्वेन गुणाः कर्माणि च निष्क्रियाणि P. । २ कारणेन कालः । पञ्चमोऽध्यायः PS. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## षष्ठस्याध्यायस्याद्यमाह्निकम् ।

कर्माणि व्याख्याय गुणा व्याख्यायन्ते । तत्र धर्म आदौ व्याख्यायते, शास्त्रादौ तस्योद्दिष्टत्वात् । तस्य वैदिको विधिः साधनम् । वेदस्य सत्यता कुत इति चेत्, यतः–

**बुद्धिपूर्वा[1] वाक्यकृतिर्वेदे । ६ । १ । १ ।**

'अग्निहोत्रं जुहुयात् स्वर्गकामः' [ ] इत्येवंभूता रचना भगवतो महेश्वरस्य बुद्धिपूर्वा सा ततः प्रमाणम्, आप्तप्रणीतत्वस्य सत्यताव्याप्तेः ।

अतीन्द्रियमशक्यं ज्ञातुमिति चेत्,

**न[2] चास्मद्बुद्धिभ्यो लिङ्गमृषेः । ६ । १ । २ ।**

लिङ्ग्यतेऽनेनार्थ इति लिङ्गं विज्ञानम् । न हि यादृशमस्मद्विज्ञानं वर्तमानाव्यवहितसम्बद्धार्थविषयं तादृशमेव भगवतो विज्ञानम् । अतः सम्भवति भगवतोऽतीन्द्रियार्थविषयं विज्ञानम् ।

स कथं ज्ञायते ?

**तथा ब्राह्मणे संज्ञाकर्मसिद्धिर्लिङ्गम् । ६ । १ । ३ ।**

विनोपदेशेन ब्राह्मणादिकमर्थमस्माकमालोचयतां प्रत्यक्षेण न 'ब्राह्मणोऽयम्' इति ज्ञानमुत्पद्यते । प्रत्यक्षेण चार्थमालोच्य संज्ञाप्रणयनं दृष्टं पुत्रादिषु । सन्ति चैता ब्राह्मणादि संज्ञास्ता येन प्रत्यक्षमर्थमालोच्य प्रणीता इति सूत्रार्थं वर्णयन्ति ।

अतः—

**बुद्धिपूर्वो ददातिः । ६ । १ । ४ ।**

यत एव परमेश्वरस्य कृतिर्वेदादौ वाक्यपदरचनाऽतोऽयं स्मार्तोऽपि दानादिविधिस्तदीयमाम्नायमनन्तशाखाभिन्नमालोच्य संक्षेपमनुमन्यमानानां भृगुप्रभृतीनां बुद्धिपूर्वः[3] । एवं दानादिविधयो धर्महेतवः ।

---

१ बुद्धिपूर्वा याऽतः P । २ स चास्मद्बुद्धिभ्योलिङ्गमृषेः O. । स वास्मद्बु[द्धिभ्यो] लिङ्गमृषेः **मि.** । 'अस्मद्बुद्धिभ्यो लिङ्गमृषेः'–मुद्रित**न्यायकन्दली** पृ. २१६, किन्तु **जेसलमेर**स्थेऽतिप्राचीने हस्तलिखिते **न्यायकन्दली**पुस्तके '**न चास्मद्बुद्धिभ्यो लिङ्गमृषेः**' इत्येव पाठोऽत्रत्वदिति ध्येयम् । ३ एवं O. ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**तथा प्रतिग्रहः । ६ । १ । ५ ।**

तथैव प्रतिग्रहोऽपि प्रक्षीणवृत्तेरवदातजन्मनः प्रतिग्रहानुपरूढगुणयुक्तस्य धर्मायैव भवति।

**तयोः क्रमो यथाऽनितरेतराङ्गभूतानाम् । ६ । १ । ६ ।**

यथा भूतानि अनितरेतराङ्गं न परस्परेण कार्यकारणभूतानि, न ह्यरणी अग्नेः कारणम्, अपि तु स्वावयवा एव, अथ चारण्योरग्नेश्च क्रमः । एवमेतयोः पूर्वं दानधर्मः पश्चात् प्रतिग्रहधर्मः, न तु कार्यकारणभावः ।

कुतः ?

**आत्मगुणेष्वात्मान्तरगुणानामकारणत्वात् । ६ । १ । ७ ।**

न ह्यन्यदीया आत्मगुणा अन्यदीयात्मगुणानां कारणं भवन्ति ।

तत्र—

**अदुष्टभोजनात् समभिव्याहारतोऽभ्युदयः । ६ । १ । ८ ।**

अदुष्टं ब्राह्मणं भोजयित्वा तदीयादाशीर्वादादिसमभिव्याहारात् पुरुषाभ्युदयः । तत्कारणं धर्मो भवतीत्यर्थः ।

**तद् दुष्टभोजने न विद्यते । ६ । १ । ९ ।**

सत्यप्याशीर्वादादिवचने दुष्टं ब्राह्मणं भोजयित्वाभ्युदयो न प्राप्यते ।

अथ को दुष्टः ?

**दुष्टं हिंसायाम् । ६ । १ । १० ।**

परस्य हिंसायां शरीरमानसदुःखरूपायां प्रवृत्तं दुष्टं जानीष्व । हिंसाशब्द उपलक्षणम्, यतः—

**समभिव्याहारतो दोषः । ६ । १ । ११ ।**

कृतमहापातकस्य संभाषणमात्रादेव दोषेण युज्यते[१], किमुत भोजनादिना ? इह समभिव्याहारः सम्भाषणम्, पूर्वत्राशीर्वादः ।

**तददुष्टे न विद्यते । ६ । १ । १२ ।**

तत् समभिव्याहारदूषणं हिंसादिरहिते ब्राह्मणे न विद्यते ।

---

१ युज्येत P. ।

अदुष्टेऽपि—

**विशिष्टे[2] प्रवृत्तिः । ६ । १ । १३ ।**

न हिंसादिमात्ररहिते, अपि तु देश[3]कालविज्ञानाचारैर्विशिष्टे ब्राह्मणेऽभ्युदयार्थिनः प्रवृत्तिः ।

ततः

**समे हीने चाप्रवृत्तिः । ६ । १ । १४ ।**

अदुष्टो ब्राह्मणो देशादि[4]युक्तो विशिष्ट उच्यते । एषामेकेन गुणेन युक्तः [5]समः । सर्वैर्युक्तो विशिष्टः । तौ त्यक्त्वान्यो दुष्टो वा क्षत्रियादिर्वा प्राणिमात्रं वा हीन उच्यते । तत्राभ्युदयेप्सोर्मन्त्रपूर्वके सुवर्णादिदाने वैशाख्यादिनिमित्ते समहीनयोरप्रवृत्तिः, अपि तु विशिष्टे ।

**एतेन हीनसमविशिष्टधार्मिकेभ्यः परादानं व्याख्यातम् । ६ । १ । १५ ।**

एतेन विपरीतेन क्रमेणापदि परस्वादानं व्याख्यातम् । उक्तं च—

> 'हीनादादेयमादौ तु तदभावे समादपि ।
> असम्भवे [6]त्वाददीत विशिष्टादपि धार्मिकात् ॥' [ ]

**तथा विरुद्धानां त्यागः । ६ । १ । १६ ।**

अनेनैव विपरीतक्रमेण ब्राह्मण आत्मनो हीनै रिपुभिर्मारणायाक्षिप्तस्तानेव शत्रूनभिहन्यात् ।

**समे आत्मत्यागः परत्यागो वा । ६ । १ । १७ ।**

आत्मनस्तुल्यगुणेन शत्रुणा प्राप्तस्य ब्राह्मणस्य विकल्पः-आत्मनो वध आततायिनो वा ।

**विशिष्टे आत्मत्यागः । ६ । १ । १८ ।**

आत्मनोऽधिकगुणेन शत्रुणा प्राप्तस्यात्मन एव रिपुप्रयुक्तो वधोऽङ्गी[7]कार्यः । इहात्मापेक्षया हीनादिव्यवहारः, प्रतिग्रहे प्रतिग्रहीतॄणामन्योन्यापेक्षयं[8] ।

॥ इति षष्ठस्याद्यमाह्निकम् ॥

---

२ विशिष्टप्रवृत्तिः O. । ३ देवसत्कुलविज्ञानाचारविशिष्टब्राह्मणे O. । ४ °युक्तोऽपि O. । ५ समः । तौ त्यक्त्वान्यो दुष्टो वा क्षत्रियादिर्वा प्राणिमात्रं वा P. । समः । सर्वैर्युक्तो विशिष्टः । तौ त्यक्त्वा दुष्टो वा क्षत्रियादेः प्रतिमात्रं वा O. । ६ वाददीत O. । ७ °ङ्गीकर्तव्यः O. । ८ प्रतिग्रहीतॄणामन्योन्यापेक्षयति O. । प्रतिग्रहीत्रॄणा अन्योन्यापेक्षश्चेति P. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## षष्ठस्याध्यायस्य द्वितीयमाह्निकम् ।

एवं श्रुतिस्मृतिविधिभ्यो धर्मो भवतीत्युक्त्वेदानीमेषां धर्मसिद्धौ प्रकारविशेषमाह । [१]तथाहि—

**दृष्टानां दृष्टप्रयोजनानां दृष्टाभावे प्रयोगोऽभ्युदयाय । ६ । २ । १ ।**

श्रुतिस्मृतिपरिदृष्टानां स्नानादीनां दृष्टस्य मलापकर्षादेरनभिसन्धाने प्रयोगोऽभ्युदयाय भवति ।

के ते ?

**अभिषेचनोपवासब्रह्मचर्यगुरुकुलवास[२]वानप्रस्थयज्ञदानप्रोक्षणदिङ्नक्षत्रमन्त्रकालनियमाश्चादृष्टाय । ६ । २ । २ ।**

विशिष्टदेशकालापेक्षेणाम्भसा यः शरीरस्य संयोगस्तदभिषेचनं स्नानम् । नक्तंदिनं वासो नियमपूर्वोऽनाहाररूप उपवासः । ब्रह्मशब्देन आत्मा, ब्रह्मणि चरणमात्ममनसोर्यः संयोगः स्त्र्यादिपरिहाररूपो ब्रह्मचर्यम् । विज्ञानाद्यर्थिनो [३]गुरुपरिचर्यापरस्य तद्गृहेषु वसनं गुरुकुलवासः । [४]शास्त्रविधिना गेहान्निःसृत्यारण्यं प्रस्थितो वानप्रस्थः, तस्य कर्म [५]वानप्रस्थ्यम् । यज्ञाः पाकयज्ञादयः । दानं सुवर्णादिदानमभयदानं च । प्रोक्षणं सन्ध्योपासनादि । दिङ्नियमादयोऽन्ये विशेषाः । दिङ्नियमः–'प्राङ्मुखोऽन्नानि भुञ्जीत' [ ] । नक्षत्रनियमः–'कृत्तिकास्वादधीत' [ ] । मन्त्रनियमः–देवस्य त्वेति [६]निर्वपति । कालनियमः–'वसन्ते ब्राह्मणोऽग्नीनादधीत' [ ] । एवमेतत् सर्वं दृष्टप्रयोजनतिरस्कारेण प्रयुज्यमानं धर्माय सम्पद्यत इति ।

तत्र—

**चातुराश्रम्य[७]मुपधाचानुपधाच । ६ । २ । ३ ।**

यदिदं चतुर्णामाश्रमिणां कर्म तदुपधया प्रयुज्यमानमधर्मायानुपधया तु धर्माय भवति ।

---

१ तथाहि O. मध्ये नास्ति । २ वानप्रस्थयज्ञ° P. **मि. उ.** । वानप्रस्थायज्ञ° PS. । ३ गुरुचर्या° P. । ४ शास्त्रविधिना गेहान्निःसृत्यारण्यप्रस्थितो O । शास्त्रविधिनान्निःसृतारण्यप्रस्थितो P. । ५ वानप्रस्थम् P. । ६ निर्वापयति O. । ७ °मुपधाश्चानुपधाश्च P. । °मुपधानुपधाश्च **मि. उ.** । अत्र **उपधाश्चानुपधाश्च** इति P. पाठोऽपि समीचीनो भवेत् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

का उपधा ?

**भावदोष उपधा । ६ । २ । ४ ।**

भावस्य अभिसन्धेर्दम्भादिदोष उपधेत्यर्थः ।

काऽनुपधा ?

**अदोषोऽनुपधा । ६ । २ । ५ ।**

अभिसन्धेर्दम्भादिरहितत्वमनुपधेत्यर्थः ।

**इष्टरूपरसगन्धस्पर्शं[1] प्रोक्षितमभ्युक्षितं[2] च तच्छुचि । ६ । २ । ६ ।**

स्मृतौ यस्य रूपादयो न निषिद्धास्तच्छुचि मन्त्रपूर्वकं प्रोक्षितं केवलाभिरद्भिरभ्युक्षितं च । एतद्विपरीतमशुचि ।

किञ्च,

**अशुचीति शुचिप्रतिषेधः । ६ । २ । ७ ।**

यस्य चात्यन्तशुचिप्रतिषेधस्तदप्यशुचि वाग्दुष्टादिकम् ।

**अर्थान्तरं च । ६ । २ । ८ ।**

मद्यादि च[2] यत् साक्षान्निषिध्यते तदप्यशुचि । ततः शुचि भोक्तव्यम् ।

ननु

**अयतस्य शुचिभोजनादभ्युदयो न विद्यते यमाभावात् । ६ । २ । ९ ।**

अयतस्य विशिष्टप्रयत्नरहितस्य शुचिमाहारं यदृच्छयोपयुञ्जानस्य अभ्युदयो नास्ति, विशिष्टस्याभिसन्धेरभावात् ।

नैतत्,

**विद्यते चानर्थान्तरत्वाद्यमस्य । ६ । २ । १० ।**

न[4] प्रयत्नव्यतिरेकी यमः, प्रयत्नाभावे सर्वस्याः क्रियाया अभावाद् विद्यते शुचिमाहारमुपयुञ्जानस्य[3] प्रयत्नः ।

---

१ °मभ्युषितं P. PS. । °मभिक्षतं O. । °मभ्युक्षितं मि. उ. । २ च O. मध्ये नास्ति । ३ ( °पभुञ्जानस्य ? ) । ४ च न O. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यदि प्रयत्नः प्रधानम्, विनापि [1]योगादिनाभ्युदयः स्यात् । नैतत्,

**असति चाभावात् । ६ । २ । ११ ।**

असति [1]योगाद्यनुष्ठाने न प्रयत्नमात्रस्य भावादभ्युदयः, क्रियोपदेशवैयर्थ्यात् ।

इदानीं निःश्रेयसहेतुं धर्ममाह—

**सुखाद्रागः । ६ । २ । १२ ।**

स्त्र्यादिविषयजनितात् सुखादेव रागो वर्धते ।

**तन्मयत्वात् । ६ । २ । १३ ।**

[2]यैर्यैरस्य सुखहेतुभिः शरीरं भावितं तन्मय इवास्ते । ततस्तन्मयत्वाद् रागः ।

किञ्च,

**तृप्तेः । ६ । २ । १४ ।**

यदा तृप्तो भवति तदास्य तृप्तिनिमित्तो रागो भवति [3]शरीरपुष्टेः ।

किञ्च,

**[4]अदृष्टात् । ६ । २ । १५ ।**

अपूर्वदृष्टेष्वनुपकारकेषु च कस्यचिद् रागो जायतेऽत्रादृष्ट एव कारणम् ।

किञ्च,

**जातिविशेषाच्च रागविशेषः । ६ । २ । १६ ।**

यथा तिरश्चां तृणादिभोजने एवं जातिविशेषादपि रागः ।

सुखादिभ्यो रागो दुःखादिभ्यो द्वेषः । ततः—

**इच्छाद्वेषपूर्विका धर्माधर्मयोः प्रवृत्तिः । ६ । २ । १७ ।**

इच्छापूर्विका धर्मे प्रवृत्तिः, अन्येन धनमदादभिभूतस्य वा द्वेषपूर्विकापि ग्रामकामेष्ट्यादौ । अधर्मेऽपीच्छा[5]पूर्विका परदारादिषु द्वेषपूर्विका । एवं धर्माधर्मयोः सञ्चयः ।

यत [6]एवं

**ततः संयोगो विभागश्च । ६ । २ । १८ ।**

---

१ (यागा° ?)। २ यैयैरस्य O. । यैरप्य P. । ३ शरीरे पुष्टे O. । ४ अदृष्टत्वात् O. । ५ °पीच्छा परदारा° P. । ६ एतत् O. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सञ्चितौ यदा धर्माधर्मौ भवतः तदा शरीरेन्द्रियैः संयोगो जन्माख्यो भवति, क्षीणयोश्च तयोर्मरणकाले वियोगः । पुनरप्याभ्यां धर्माधर्माभ्यां शरीरादिसंयोगो विभागश्चेत्येवमनादिरयं घटीयन्त्रवदावर्तते जन्तुः ।

एतद्विपरीतक्रमेणोच्यते, तथाहि—

**आत्मकर्मसु[1] मोक्षो व्याख्यातः । ६ । २ । १९ ।**

आत्मेति मनः, मनःकर्मसु तदभावे [2]संयोगाभावोऽप्रादुर्भावश्च स मोक्ष इति मोक्षो व्याख्यातः ।

## ॥ षष्ठोऽध्यायः ॥

१ व्याख्यातः षष्ठोऽध्यायः PS. । २ °भावे° O. ।

## सप्तमस्याध्यायस्य प्रथममाह्निकम् ।

इदानीं रूपादीनाह—

**उक्ता गुणाः । ७ । १ । १ ।**

रूपादिसूत्रेणोद्दिष्टा इत्यर्थः ।

**गुणलक्षणं चोक्तम् । ७ । १ । २ ।**

द्रव्याश्रयी [ १ । १ । १५ ] इत्यादिना द्रव्यकर्मभ्यां वैधर्म्यं कथितमित्यर्थः ।

**इदमेवंगुणमिदमेवंगुणमिति चोक्तम् । ७ । १ । ३ ।**

तथा ह्युक्तं ‘ रूपरसगन्धस्पर्शवती पृथिवी ’ [ २ । १ । १ ] इत्यादि ।

तत्र —

**पृथिव्यां रूपरसगन्धस्पर्शा द्रव्यानित्यत्वादनित्याः । ७ । १ । ४ ।**

घटादेः पार्थिवस्य द्रव्यस्य विनाशात् तद्गतानामपि रूपादीनां विनाश आश्रयविनाशात् ।

**अग्निसंयोगाच्च । ७ । १ । ५ ।**

अग्निसंयोगाच्च पार्थिवेषु परमाणुषु रूपादीनां विनाशः, कार्ये समवेतानां स्वाश्रयविनाशादेव ।

परमाणुष्वग्निसंयोगादेव कुतः ?

**गुणान्तरप्रादुर्भावात् । ७ । १ । ६ ।**

यस्माच्छ्यामादिगुणेभ्यो व्यतिरिक्तं गुणान्तरमुत्पद्यते[1] ततः पूर्वे परमाणुगुणा विनष्टाः, गुणवति गुणानारम्भात् ।

**एतेन नित्येष्वनित्यत्वमुक्तम् । ७ । १ । ७ ।**

एतेन गुणान्तरप्रादुर्भावेन नित्येषु परमाणुषु रूपादीनामनित्यत्वमुक्तं पार्थिवेष्वेव ।

यतः—

**अप्सु तेजसि वायौ च[2] नित्या द्रव्यनित्यत्वात् । ७ । १ । ८ ।**

---

१ °मुत्पाद्यते O. । २ च O. मध्ये नास्ति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सलिलानलानिलपरमाणुरूपादयो नित्या आश्रयनित्यत्वाद् विरोधिगुणान्तराप्रादुर्भावाच्च नाग्निसंयोगाद् विनाशः ।

**अनित्येष्वनित्या द्रव्यानित्यत्वात् । ७ । १ । ९ ।**

अनित्येषु सलिलादिषु अनित्या रूपादय आश्रयविनाशे तेषामपि विनाशात् ।

**कारणगुणपूर्वाः पृथिव्यां पाकजाश्च । ७ । १ । १० ।**

अनित्यायां कार्यरूपायां पृथिव्यां कारणगुणपूर्वा रूपादयो जायन्ते, नित्यायां तु परमाणुस्वभावायां पाकजाः पाकादग्निसंयोगाज्जाताः ।

**अप्सु तेजसि वायौ च कारणगुणपूर्वाः पाकजा न विद्यन्ते । ७ । १ । ११ ।**

कार्ये उदकाद्यवयविनि समवायिकारणरूपे रूपादय आरभ्यन्ते, पाकजास्तु जलाद्यणुषु नैव सन्ति विरोधिगुणान्तराभावात् ।

**अगुणवतो द्रव्यस्य गुणा[1]रम्भात् कर्मगुणा अगुणाः । ७ । १ । १२ ।**

अगुणस्य द्रव्यस्यैवोत्पन्नस्य कारणगुणैर्गुणा जन्यन्ते न गुणकर्मणाम्, अशेषावयवगुणैकार्थसमवायाभावात् कर्मत्ववत् ।

**एतेन पाकजा व्याख्याताः । ७ । १ । १३ ।**

अग्निसंयोगान्निवृत्तेषु श्यामादिषु पाकजा जायन्ते इति तेऽपि गुणरहिते सिद्धाः ।

संयोगवति संयोगारम्भवद् गुणवति पाकजा इति चेत्, न,

**एकद्रव्यवत्त्वात् । ७ । १ । १४ ।**

एकद्रव्यवन्तः पाकजास्ते कथं तत्रैवारभ्येरन् विरुद्धत्वात् ? संयोगस्य तु संयोगवत्यारम्भो न दु[2]ष्यति, अनेकद्रव्यत्वात् ।

परिमाणमिदानीं वक्ष्यामः–

**अणोर्महतश्चोपलब्ध्यनुपलब्धी नित्ये व्याख्याते । ७ । १ । १५ ।**

‘ नित्ये ’ इत्यध्यायनाम, ‘ यदुपलभ्यते तत्रावश्यं महत्त्वम्, अणुत्वे तु परमाणुद्व्यणुकमनसामनुपलब्धिः ’ एवं [3]नित्याख्येऽध्याये उपलब्ध्यनुपलब्ध्योः कारणे महत्त्वाणुत्वे कथिते भवतः, उपलब्धौ महत्त्वस्य नियमात् । द्व्यणुकस्य महत्त्वेऽप्यनुपलब्धिः ।

१ गुणान्तरारम्भात् O. । २ दुष्यत्येव द्रव्यत्वात् O. । ३ दृश्यताम् ४ । १ । ६–८ ।

**कारणबहुत्वात् कारणमहत्त्वात् प्रचयविशेषाच्च महत् ।७।१।१६।**

त्र्यणुके तत्कारणद्व्यणुकगता बहुत्वसंख्या महत्त्वं जनयति कारणानाममहत्वात् । द्व्यङ्गुले कारणाङ्गुलिमहत्त्वं महत्त्वं करोति । प्रशिथिलः संयोगः प्रचयः । द्वितूलके तूलपिण्डयोर्वर्तमानः प्रचयः स्वाधारावयवप्रशिथिलसंयोगापेक्षो महत्त्वमारभते ।

**तद्विपरीतमणु । ७ । १ । १७ ।**

एतस्मात् त्रिकारणाद् महतो यद् विपरीतं द्व्यणुकपरिमाणं तदणु प्रत्येतव्यम् ।

**अणु महदिति तस्मिन् विशेषभावाद् विशेषाभावाच्च । ७ । १ । १८ ।**

तस्मिन् महति वस्तुनि कुवलादावामलकापेक्षया अणुव्यवहारः, आमलके तु बिल्वापेक्षया । एवं प्रकर्षस्य भावाभावाभ्यामेकस्मिन्नेवाणुमहद्व्यवहारो भाक्तः[१] ।

कुतः ?

**एककालत्वात् । ७ । १ । १९ ।**

यत एकस्मिन्नेव[२] काले तस्मिन्नेव वस्तुनि अन्यापेक्षया द्वौ पुरुषावणुमहद्व्यवहारं विरुद्धं कुर्वातेऽतो जानीमहे 'भाक्तोऽयम्' इति ।

तत्रापेक्षिकाणुवस्तुनि

**दृष्टान्ताच्च । ७ । १ । २० ।**

यथा शुक्लतन्तुजनिते कार्ये शुक्लिमैव, न कृष्णता, एवमतो दृष्टान्ताद् महद्भिरारब्धे महत्त्वमेव, नाणुत्वम् ।

**अणुत्वमहत्त्वयोरणुत्वमहत्त्वाभावः कर्मगुणैर्व्याख्यातः ।७। १ । २१ ।**

यथा गुणकर्माणि निर्गुणानि कार्यस्य रूपादेरवयवगुणैरेकार्थसमवायाभावादेवं कारणबहुत्वादिभिरेकार्थसमवायाभावादणुत्वमहत्त्वयोस्तदभावः ।

**अणुत्वमहत्त्वाभ्यां कर्मगुणा अगुणाः । ७ । १ । २२ ।**

कारणबहुत्वादिभिरेकार्थसमवायाभावादणुत्वमहत्त्वे यथा अणुत्वमहत्त्वशून्ये एवं कर्मगुणा अणुत्वमहत्त्वशून्याः ।

---

१ °भ्यामेतस्मिन्नेव P. । २ एकस्मिन्नेव वस्तुनि P. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**एतेन दीर्घत्वह्रस्वत्वे व्याख्याते । ७ । १ । २३ ।**

उपलब्ध्यनुपलब्धी महत्त्वाणुत्ववत् । कारणमहत्त्वादिभ्यश्च जायते दीर्घत्वम्, विपरीतं ह्रस्वत्वम्, [1]तस्मिन् विशेषभावादित्यौपचारिकत्वं तथैव । तयोर्दीर्घत्वह्रस्वत्वाभाव इत्यतिदेशः ।

**कर्मभिः कर्माणि गुणैर्गुणाः । ७ । १ । २४ ।**

यथा कारणबहुत्वाद्येकार्थसमवायाभावादणुत्वमहत्त्वशून्या एवं [2]दीर्घत्वह्रस्वत्वशून्या एते कर्मगुणाः ।

**[3]तदनित्येऽनित्यम् । ७ । १ । २५ ।**

एतच्चतुर्विधं [4]परिमाणमनित्ये वर्तमानत्वादनित्यम् ।

किन्तु—

**नित्यं परिमण्डलम् । ७ । १ । २६ ।**

प[5]रमाणुपरिमाणं परिमण्डलम्, तन्नित्यम् ।

तस्य—

**अविद्या विद्यालिङ्गम् । ७ । १ । २७ ।**

परिमाणरहितस्य [6]द्रव्यस्यासम्भवः परमाणूनां परमाणुपरिमाणस्य सम्भवे लिङ्गम् । ' अविद्या ' असम्भवः, सम्भवो ' विद्या ' ।

**विभवाद् महानाकाशः । ७ । १ । २८ ।**

विभवाद् मूर्त्तद्रव्यैः समागतैरगच्छतः संयोगात् परममहत्त्वमाकाशस्यास्तीति गम्यते ।

**[7]तथा चात्मा । ७ । १ । २९ ।**

आकाशमिवात्मापि परममहान् द्रष्टव्यः । [8]असमासा[द्] दिक्कालावपि महान्तौ ।

**तदभावादणु मनः । ७ । १ । ३० ।**

विभवस्याभावाद् मनसोऽणुत्वं ज्ञानायौगपद्याच्च ।

---

१ दृश्यतां पृ० ५४ पं० ७ । २ दीर्घह्रस्वत्व° O. । ३ तदनित्ये नित्यं PS. । तदनित्ये O. । अनित्ये P. । एतदनित्यम् **मि.** । अनित्येऽनित्यम्, नित्ये नित्यम् उ. । ४ परिमाणं नित्ये निवर्तमानत्वा° P. । परिमाणं निवर्तमानत्वा° O. । ५ परमाणुषु परिमाणं O । ६ द्रव्यस्यामसम्भवो P. । ७ तथात्मा O. P. । ८ असमा दिक्कालावपि O. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**गुणैर्दिग् व्याख्याता । ७ । १ । ३१ ।**

यत्र यत्रावधिं करोति तत्र तत्र 'इदमस्मात् पूर्वेण' इत्यादिव्यवहारो मूर्तेषु प्रवर्तते, अतो मूर्तसंयोगाख्यैर्गुणैर्दिग् व्याख्याता महत्त्ववती ।

तथा

**कारणेन काल इति । ७ । १ । ३२ ।**

येन कारणेन परापरव्यतिकरादिना कालोऽनुमीयते तस्य सर्वत्र भावात् तेनैव कारणेन कालो विभुर्व्याख्यातः

॥ सप्तमस्याद्यमाह्निकम् ॥

---

१ कारणेन कालः । सप्तमस्य प्रथममाह्निकम् PS. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## सप्तमस्याध्यायस्य द्वितीयमाह्निकम् ।

इदानीं सङ्ख्यादीनुपक्रमते, भेदव्यवहारहेतुः सङ्ख्या, साऽधुना रूपादिव्यतिरिक्तेत्येतदर्थमाह—

**रूपरसगन्धस्पर्शव्यतिरेकादर्थान्तरमेकत्वं तथा पृथक्त्वम् । ७ । २ । १ ।**

'एकोऽयम्' इत्यादिप्रत्ययो न रूपादिनिमित्तः, तत्प्रत्ययविलक्षणत्वात् । रूपादिनिमित्तो हि 'रूपवान्' इत्यादिप्रत्ययः स्यात् । तस्मादर्थान्तरनिमित्तः । [1]ऐकत्वैकपृथक्त्वे कार्येषु कारणगुणपूर्वे । द्वित्वादेरेकत्वेभ्योऽनेकविषयबुद्धिसहितेभ्यो निष्पत्तिः । तथैव द्विपृथक्त्वादेः पृथक्त्वेभ्यः, किन्तु एकपृथक्त्वावपरसामान्याभावः ।

**तयोर्नित्यत्वानित्यत्वे तेजसो रूपस्पर्शाभ्यां व्याख्याते । ७ । २ । २ ।**

यथा द्रव्यनित्यत्वात् तेजःपरमाणुरूपस्पर्शौ नित्यौ [2]एवमेकत्वैकपृथक्त्वे नित्यद्रव्यवर्तिनी नित्ये, यथा चानित्ये तेजसि द्रव्यानित्यत्वादनित्यौ रूपस्पर्शौ तथैव कार्यवर्तिनी अनित्ये [3]ऐकत्वैकपृथक्त्वे ।

**[4]निष्पत्तिश्च । ७ । २ । ३ ।**

यथा च तेजसि कार्ये कारणगुणपूर्वा रूपस्पर्शयोरुत्पत्तिरेवमेकत्वपृथक्त्वयोः । एवं गुरुत्वद्रवत्वस्नेहानाम् ।

**[5]ऐकत्वपृथक्त्वयोरेकत्वपृथक्त्वाभावोऽणुत्वमहत्त्वाभ्यां व्याख्यातः । ७ । २ । ४ ।**

[6]ऐकत्वपृथक्त्वयोरवयवगुणैकार्थसमवायाभावाद् नैकत्वपृथक्त्वे स्त इत्यर्थः ।

**कर्मभिः कर्माणि गुणैर्गुणाः । ७ । २ । ५ ।**

तथैवावयवगुणैकार्थसमवायाभावात् कर्मगुणा नैकत्वपृथक्त्ववन्तः ।

---

१ एवं त्वेकपृथक्त्वे O. । २ एकैकत्वैकपृ° O. । ३ एकैकत्वैकपृ° O. । ४ निवृत्तिश्च P. । ५ सूत्रमिदं P. मध्ये नास्ति । एकत्वैकपृथक्त्वयोरेकत्वैकपृथक्त्वाभावो° मि. उ. । ६ एकत्वैकपृथक्त्वयो° P. ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

ननु सर्वेषामेव पदार्थानामेकत्वं सदविशेषात्,

**निःसंख्यत्वात् कर्मगुणानां सर्वैकत्वं न विद्यते । ७ । २ । ६ ।**

कर्मणां गुणानां च संख्यारहितत्वात् सर्वैकत्वं नैवा[1]स्ति ।

भाक्तमेकत्वं गुणादिष्विति चेत्,

**[2]ऐकत्वस्याभावाद् भाक्तं न विद्यते । ७ । २ । ७ ।**

मुख्यस्यैकत्वस्याभावाद् गुणादिषु *[3]भाक्तं यदेकत्वं कल्प्यते तद् भवत एकत्वसिद्धौ न पर्याप्नोति, 'द्रव्येषु मुख्यम्, गुणेषु* भाक्तम्' इत्यत [4]एव भेदप्रसङ्गात् ।

ननु कार्यकारणयोरेकत्वं प्राप्तं द्रव्ये संख्यानिर्विशेषात्, [5]ऐकत्वाभावादेव पृथक्त्वभावः स्यात् । नैतत्,

**कार्यकारणैकत्वपृथक्त्वाभावादेकत्वपृथक्त्वे न विद्येते । ७ । २ । ८ ।**

द्वित्वात् कार्यकारणयोर्नैकत्वं कार्यस्य कारणव्यतिरिक्ताश्रयाभावाद् नापि पृथक्त्वम् ।

**[6]एतदनित्यनित्ययोर्व्याख्यातम् । ७ । २ । ९ ।**

एतत् पूर्वसूत्रमनित्यविषयमपि [7]नित्येष्वाकाशादिषु यथासंभवं व्याख्यातं बोद्धव्यम् । तथाहि—शब्दाकाशयोः कार्यकारणयोर्नैकत्वं नापि पृथक्त्वम् ।

**अन्यतरकर्मज उभयकर्मजः संयोगजश्च संयोगः । ७ । २ । १० ।**

अन्यतरकर्मजः संयोगः श्येनस्योपसर्पणकर्मणा स्थाणुना । मल्लयोरुपसर्पणादुभयजः । संयोगजः कारणाकारणयोः संयोगात् कार्याकार्यगतः, यथाङ्गुल्याकाशसंयोगाभ्यां द्व्यङ्गुलाकाशसंयोगः ।

**एतेन विभागो व्याख्यातः । ७ । २ । ११ ।**

अन्यतरकर्मजो विभागः श्येनस्यापसर्पणात् । उभयकर्मजो मेषयोरपसर्पणात् । विभागजस्तु अङ्गुल्योरन्योन्यविभागाद् विनष्टमात्रे द्व्यङ्गुलेऽङ्गुल्याकाशविभागः, कारणाकारणयोर्वा हस्ताकाशयोर्विभागाच्छरीराकाशविभागः ।

**संयोगविभागयोः संयोगविभागाभावोऽणुत्वमहत्त्वाभ्यां व्याख्यातः । ७ । २ । १२ ।**

---

१ नास्ति P । २ एकस्याभावाद् PS. मि. । एकत्वाभावाद् उ. । ३ * * एतच्चिह्नान्तर्गतः पाठः P. मध्ये नास्ति । ४ एतीप्रसङ्गात् । ५ एकत्वभावादेव पृथग्भावः स्यात् P. । ६ एतदनित्ययो° PS. मि. उ. । तदनित्ययो° P. । ७ नित्येष्वत्याकाशा° P. ।

युतसिद्ध्यभावान्नै[1] तौ स्त इत्यर्थः ।

**कर्मभिः कर्माणि गुणैर्गुणाः । ७ । २ । १३ ।**

युतसिद्ध्यभावान्न संयोगविभागवन्त इत्यर्थः ।

**युतसिद्ध्यभावात् कार्यकारणयोः संयोगविभागौ न विद्येते । ७ । २ । १४ ।**

कार्यकारणयोः परस्परेण संयोगविभागौ न विद्येते यथा घटकपालयोः, युतसिद्ध्यभावात् । युतसिद्धिर्द्वयोरन्यतरस्य वा पृथग्गतिमत्त्वम्, सा च नित्ययोः, युताश्रयसमवेतत्वं चानित्ययोः[2] यथा घटपटयोः त्वगिन्द्रियपार्थिवशरीरयोश्च । न च घटकपालयोः युताश्रयसमवायः, घटस्य तेष्वेव समवेतत्वात् ।

शब्दस्यार्थेन सम्बन्ध इति चेत्, न,

**गुणत्वात् । ७ । २ । १५ ।**

आकाशस्य गुणत्वाच्छब्दो नार्थेन सम्बध्यते ।

**गुणे च भाष्यते । ७ । २ । १६ ।**

गुणे च रूपं रस इत्यादिषु प्रयुज्यते क्रियायां च, न च गुणकर्मणां गुणैः सम्बन्धः ।

**निष्क्रियत्वात् । ७ । २ । १७ ।**

अर्थसंयोगे सति शब्दोऽर्थं प्राप्नुयात्, निष्क्रियत्वाच्च गुणस्य गमनाभावः ।

**[3]असति नास्तीति च प्रयोगात् । ७ । २ । १८ ।**

अर्थसंयोगे सति शब्दः 'असति' अभावे 'नास्ति' इति न प्रयुज्येत । न ह्यसता संयोगः ।

तस्मात् संयोगस्याभावात्—

**शब्दार्थावसम्बद्धौ । ७ । २ । १९ ।**

---

१ °नैतौ O. । २ चानित्ययोः तथा घटपटयोः त्वगि° O. । वानित्ययोः त्वगि° P. । तुलना–" सा पुनर्द्वयोरन्यतरस्य वा पृथग्गतिमत्त्वं पृथगाश्रयाश्रयित्वं चेति ।......सा पुनर्द्वयोरन्यतरस्य वा पृथग्गतिमत्त्वम् । इयं तु नित्यानाम् । अनित्यानां तु युतेष्वाश्रयेषु समवायो युतसिद्धिरिति त्वगिन्द्रियशरीरयोः पृथग्गतिमत्त्वं नास्ति युतेष्वाश्रयेषु समवायोऽस्तीति परस्परेण संयोगः सिद्धः । ......" इति **प्रशस्तपादभाष्ये** संयोगविभागनिरूपणे । ३ असति नास्तीति प्रयोगः O. P. ।

ननु च—

**संयोगिनो दण्डात् समवायिनो विषाणाच्च । ७ । २ । २० ।**

संयोगिसमवायिभ्यां दण्डविषाणाभ्यां दण्डिविषाणिनोः प्रत्ययो दृष्टः । अस्ति च शब्दादर्थप्रत्ययः, तस्मादस्यापि सम्बन्धोऽस्तीति ।

नैतत्,

**दृष्टत्वादहेतुः प्रत्ययः । ७ । २ । २१ ।**

दण्डिविषाणिनोर्दृष्टत्वाददोषः, इह तु शब्दार्थयोः सम्बन्धस्योक्तन्यायेनादृष्टत्वादहेतुरर्थप्रत्ययः सम्बन्धे ।

**तथा प्रत्ययाभावः । ७ । २ । २२ ।**

यदि शब्दोऽर्थेन सम्बद्धः स्यादगृहीतसङ्केतोऽपि ततोऽर्थं प्रतिपद्येत । तस्मादसम्बद्धौ ।

**[1]सम्बद्धसम्बन्धादिति चेत् सन्देहः । ७ । २ । २३ ।**

ननु शब्देनाकाशं सम्बद्धम्, आकाशेन चार्थः, एवं सम्बन्ध(द्ध?)सम्बन्धादर्थेन सम्बन्ध इति । [2]नैतत्, सर्वार्थानामाकाशेन सम्बन्धात् कस्मिन्नर्थे शब्दः प्रयुक्त इति सन्देहादप्रतिपत्तिः स्यात् । अतो न सम्बन्धः ।

तस्मात्—

**सामयिकः [3]शब्दादर्थप्रत्ययः । ७ । २ । २४ ।**

तस्मात् सङ्केतनिमित्तः शब्दादर्थे प्रत्ययो न सम्बन्धात् ।

**[5]ऐकदिक्कालाभ्यां सन्निकृष्टविप्रकृष्टाभ्यां परमपरम् । ७ । २ । २५ ।**

[6]ऐकदिक्कौ पिण्डौ दिक्कृतयोः परत्वापरत्वयोः कारणम् । एककालौ वर्तमानकालसम्बद्धौ कालकृतयोः परत्वापरत्वयोः कारणम् । तौ च सन्निकृष्टविप्रकृष्टबुद्ध्यपेक्षया पिण्डौ कारणम् ।

---

१ सम्बन्धसम्बन्धा° P. PS. । २ नैवम् O. । ३ शब्दार्थे प्रत्ययः O. । शब्दार्थप्रत्ययः **मि. उ.** । "**शब्दादर्थे प्रत्ययः**" इति पाठो **नयचक्रवृत्तौ** [पृ० २१ पं० १२] उद्धृतः, स च समीचीनतरो भाति । ४ °निमित्तशब्दार्थे P. । ५ एकदिक्काभ्यां सन्नि° P. **मि.** । एकदिक्काभ्यामेककालाभ्यां सन्नि° उ. । ६ एकदिक्कालौ O. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**कारणपरत्वात् कारणापरत्वाच्च । ७ । २ । २६ ।**

परापरदिक्प्रदेशसंयोगावसमवायिकारणम् । तथैव परापरकालप्रदेशसंयोगौ । दिक्कालप्रदेशैः संयोगात् सन्निकृष्टविप्रकृष्टयोः पिण्डयोः सन्निकृष्टविप्रकृष्टबुद्ध्यपेक्षया [1]सन्निकृष्टेऽपरत्वम्, विप्रकृष्टे च परत्वम् ।

**परत्वापरत्वयोः परत्वापरत्वाभावोऽणुत्वमहत्त्वाभ्यां व्याख्यातः । ७ । २ । २७ ।**

परापरदिक्कालप्रदेशसंयोगाः परत्वापरत्वयोः कारणम् । अनयोश्च युतसिद्ध्यभावेन संयोगाभावात् परत्वापरत्वाभावः ।

**कर्मभिः कर्माणि गुणैर्गुणाः । ७ । २ । २८ ।**

यथा कर्मगुणा अणुत्वमहत्त्वशून्या एवं कर्मगुणा युतसिद्ध्यभावेन दिक्कालप्रदेशसंयोगाभावात् परत्वापरत्वशून्याः ।

**इहेति यतः कार्यकारणयोः स समवायः । ७ । २ । २९ ।**

गुणादयः समवायिनो द्रव्ये । अतः समवायं कथयति – इहेति यतः कार्यकारणयोः प्रत्यय उत्पद्यते ‘ इह तन्तुषु पटः, इह घटे रूपादयः, इह घटे कर्म ’ इति [ स ] समवायः । कार्यकारणग्रहणस्योपलक्षणत्वात् ‘ जातेर्व्यक्तौ विशेषाणां च नित्यद्रव्येषु समवायः ’ इत्युक्तं भवति ।

**द्रव्यत्वगुणत्व[2]कर्मत्वप्रतिषेधो भावेन व्याख्यातः । ७ । २ । ३० ।**

यथैक[3]द्रव्यवत्त्वान्न द्रव्यं भावो गुणकर्मसु च भावान्न कर्म न गुण एवं समवायोऽपि ।

**[4]तत्त्वं चेति । ७ । २ । ३१ ।**

यथा [5]सल्लिङ्गाविशेषा[दे]को भावस्तथा ‘इह’लिङ्गाविशेषा]दे[6]कः समवायो वृत्तिरहितो नित्यो निरवयवश्च ।

॥ [7]इति सप्तमोऽध्यायः ॥

---

१ सन्निकृष्टेन परत्वं विप्रकृष्टेनापरत्वम् O. । २ °कर्मत्व° P. मध्ये नास्ति । ३ द्रव्यत्वाद् द्रव्यं भावो O. । ४ तत्त्वं च । सप्तमोऽध्यायः PS. । ५ ‘सल्लिङ्गाविशेषाद्विशेषलिङ्गाभावाच्चैको भावस्तथा ‘इह’-लिङ्गाविशेषाद् विशेषलिङ्गाभावाच्चैकः’ इत्यपि पाठोऽत्र स्यात् । दृश्यतां पृ० १७ पं० १८ । तुलना—“न च संयोगवद् नानात्वम्, भाववल्लिङ्गाविशेषाद् विशेषलिङ्गाभावाच्च । तस्माद् भाववत् सर्वत्रैकः समवाय इति ।” इति **प्रशस्तपादभाष्ये** समवायनिरूपणे । ६ °दिकः O. । ७ इति सप्तमोऽध्यायः समाप्तः P. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# अष्टमोऽध्यायः[1]।

बुद्धिरिदानीं निरूप्यते—

**द्रव्येषु ज्ञानं व्याख्यातम्।८।१।**

षण्णां पदार्थानां मध्याद् द्रव्येष्वेव ज्ञानं व्याख्यातं यथोत्पद्यते सन्निकर्षात्, नै[2] तु गुणादिषु।

तस्य—

**मन आत्मा च।८।२।**

मन आत्मा च ज्ञानस्य कारणं व्याख्यातम्।

इदानीं गुणादिषु ज्ञानमाह—

**ज्ञान[3]निर्देशे ज्ञाननिष्पत्तिरुक्ता।८।३।**

यत इन्द्रियसन्निकर्षेण ज्ञाननिष्पत्तिरुक्ता, गु[4]णादीनां *[5]चेन्द्रियेण सन्निकर्षो नास्तीत्यतस्त्विदानीं ज्ञानमुच्यते तेषा[6]मसन्निकर्षे विज्ञानं* यतः—

**गुणकर्मस्वसन्निकृष्टेषु ज्ञाननिष्पत्तेर्द्रव्यं कारणं कारणकारणं च।८।४।**

गुणकर्मणां यतो द्रव्यं समवायि[7]कारणं ततस्तेषु साक्षादिन्द्रियेणासन्निकृष्टेषु विज्ञाननिष्पत्तेः कारणस्य सन्निकर्षस्य तदेव द्रव्यं [8]कारणं न गुणकर्माणि तस्माद् गुणकर्मसु संयुक्तसमवायाज्ज्ञानम्, 'च'शब्दो [9]हेतौ।

**सामान्यविशेषेषु सामान्यविशेषाभावात् तत एव ज्ञानम्।८।५।**

सामान्ये सत्तादौ विशेषेषु चान्त्येषु तद्दर्शिनां द्रव्यसन्निकर्षादेव ज्ञानमुत्पद्यते, न सामान्यविशेषेभ्यः, तेषु[10] *[11]तदभावात्।

---

१ O. P. PS. मध्येऽष्टमनवमदशमाध्यायेष्वाह्निकविभागो नैवास्ति। २ न तथा गुणा° P.। ३ °निर्देशो O. P.। ४ गुणानां O.। ५ * * एतच्चिह्नान्तर्गतः पाठः P. मध्ये नास्ति। ६ (°मसन्निकर्षेऽपि ज्ञानं?)। ७ °कारणं सतस्तेषु O.। ८ कारणं च गुणकर्माणि O। ९ हेतावर्थे O.। १० तेषु तेषु O.। ११ '*तदभावात्' इत्यत आरभ्य 'नादृष्टेषु*' [८ १३ ]इत्यन्तः पाठः O. मध्ये नास्ति।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अन्यत्र तु—

**सामान्यविशेषापेक्षं द्रव्यगुणकर्मसु । ८ । ६ ।**

द्रव्यगुणकर्मसु द्रव्येन्द्रियसन्निकर्षात् सामान्याच्च सादेः (सत्तादेः ?) सामान्यविशेषाच्च द्रव्यत्वादेः 'सत्' इति 'द्रव्यम्' इत्यादि च ज्ञानमुत्पद्यत इति। इह सूत्रे सामान्यं सत्ता, विशेषा द्रव्यत्वादयः; पूर्वसूत्रेऽन्यथा ।

तत्रापि—

**द्रव्ये द्रव्यगुणकर्मापेक्षम् । ८ । ७ ।**

चक्षुःसन्निकर्षाद् यज्ज्ञानं द्रव्ये सामान्यविशेषापेक्षं 'विषाणी' इति, गुणापेक्षं 'शुक्लः' इति, कर्मापेक्षं 'गच्छति' इत्युत्पद्यत इति। द्रव्यादीनां च विशेषणत्वात् पूर्वमुपलम्भः, तेन विशेषणबुद्धेः कारणत्वं विशेष्यबुद्धेः कार्यत्वम् ।

**गुणकर्मसु गुणकर्माभावाद् गुणकर्मापेक्षं न विद्यते । ८ । ८ ।**

गुणे गुणकर्मणोरभावात् कर्मणि च गुणकर्मनिमित्तं गुणकर्मसु ज्ञानं न भवतीति ।

द्रव्यादौ ज्ञानस्य पूर्वोत्पत्तावनियमः, यथा—

**समवायिनः श्वैत्याच्छ्वैत्यबुद्धेः श्वेते बुद्धिस्ते कार्यकारणभूते । ८ । ९ ।**

श्वेतगुणसमवायिनः [3]श्वैत्यसामान्यात श्वैत्यसामान्यज्ञानाच्च श्वेतगुणज्ञानं जायते, सामान्यगुणसम्बन्धोऽपि द्रष्टव्यः, अतो विशेषणबुद्धिः कारणं विशेष्यबुद्धिः कार्यम् ।

विशेषणविशेष्य[त्वा]भावे तु—

**द्रव्येष्वनितरेतरकारणात् कारणायौगपद्यात् । ८ । १० ।**

अणुत्वाद् मनसो यौगपद्याभावात् सत्यपि क्रमे घटपटज्ञानयोर्न कार्यकारणभावः, विशेषणविशेष्यत्वायोगात् ।

**तथा द्रव्यगुणकर्मसु कारणाविशेषात् । ८ । ११ ।**

गौः शुक्ला गच्छतीति च द्रव्यगुणकर्मसु ज्ञानानां क्रमेणापि जायमानानां न

---

१ 'सामान्यात् सत्तादेः' इति 'सामान्यात् सत्तायाः' इति वा पाठोऽत्र समीचीनो भाति ।

२ अत्र '**द्रव्यापेक्षं विषाणीति**' इति पाठः समीचीनो भाति। तुलना–"द्रव्ये द्रव्यापेक्षं यथा गौर्विषाणीति, गुणापेक्षं यथा गौः शुक्ल इति, कर्मजन्यं यथा गौर्गच्छतीति।"–**मि.** पृ० ७६ ।

३ श्वेतसामान्यात् P. ।

Jain Education International          For Private & Personal Use Only          www.jainelibrary.org

कार्यकारणभावो विशेषणविशेष्यताऽभावादित्यस्य पूर्वोक्तस्य कारणस्याविशेषात् । अतो द्रव्यज्ञानं न गुणकर्मबुद्धयोः कारणम्, गुणकर्मबुद्धी अपि न परस्य कारणम् ।

विशेषणन्यायाभावे तु—

**अयमेष कृतं त्वया भोजयैनमिति बुद्ध्यपेक्षम् । ८ । १२ ।**

'अयम्' इति सन्निकृष्टे 'एषः' इति च किञ्चिद्विप्रकृष्टे प्रत्ययः, 'कृतं त्वया' इति कर्मकर्तृप्रत्ययो(यौ), 'भोजयैनम्' इति कर्तृकर्मप्रत्ययौ । सन्निकृष्टापेक्षो विप्रकृष्टे प्रत्ययः, 'कृतम्' इति कर्मापेक्षः कर्तरि, 'भोजय' इति कर्त्रपेक्षः¹ कर्मणि ।

कुतः सापेक्षा इति चेत्,

**दृष्टेषु भावाददृष्टेष्वभावात् । ८ । १३ ।**

दृष्टेषु सत्सु यतः सन्निकृष्टादिषु विप्रकृष्टादिप्रत्यया भवन्ति नादृष्टेषु*, अतः सापेक्षा अपि सन्तो न कार्यकारणभूता विशेषणविशेष्यत्वायोगात् ।

बुद्धीनामर्थेन्द्रियापेक्षत्वेऽप्यर्थस्तावदुच्यते—

**अर्थ इति द्रव्यगुणकर्मसु । ८ । १४ ।**

विनाप्यर्थत्वेन सामान्येन त्रिष्वेव द्रव्यादिषु तत्र प्रसिद्ध्या 'अर्थ'शब्दः परिभाष्यते । क्व ? यथा सामान्यविशेषेषु विना सामान्यान्तरेण यथा सत्तादिषु सामान्येषु 'सामान्यं सामान्यम्' इति ज्ञानं तथा विशेषेषु विशेषान्तराभावेऽपि 'विशेषो विशेषः' इति तद्दर्शिनां विज्ञानमेवं द्रव्यादिषु विनाप्यर्थत्वेन पारिभाषिकोऽर्थशब्दः ।

इन्द्रियाण्युच्यन्ते, तानि च न पञ्चात्मकानि, यतः—

**द्रव्येषु पञ्चात्मकं प्रत्युक्तम् । ८ । १५ ।**

यतो द्रव्येष्वारब्धव्येषु² पञ्चभूतान्यारम्भकाणि न विद्यन्ते, अपि तु यान्यारभन्ते चत्वारि तानि स्वां स्वां जातिमारभन्ते । एवमिन्द्रियाण्यपि प्रतिनियतभूतकार्याणि³, तथाहि—

**भूयस्त्वाद् गन्धवत्त्वाच्च पृथिवी गन्धज्ञाने । ८ । १६ ।**

गन्धज्ञानं घ्राणम्, तस्मिन्नारब्धव्ये पृथिवी कारणं भूयस्त्वात्, शरीरापेक्षया तु⁴

---

१ °क्ष कर्मणि P. । २ द्रव्येष्वारब्धारब्धेषु द्रव्येषु पञ्च O. । ३ °भूतकानि O. । ४ तु O. मध्ये नास्ति ।

भूयस्त्वम् । भूयस्त्वं च घ्राणे पृथिव्याः, पादादिना गन्धोपलब्ध्यभावात् । गन्धवत्त्वाच्च, यतश्च स्वसमवायिना गन्धेन घ्राणेन्द्रियं गन्धमभिव्यनक्त्यतस्तस्य गन्धवती पृथिव्येव कारणम्, भूतान्तराणि तु संयोगीनि स्वल्पान्येव ।

**तथापस्तेजो [1]वायुश्च रसरूपस्पर्शज्ञानेषु रसरूपस्पर्शविशेषादिति । ८ । १७ ।**

स्वसमवायिना [2]मधुरापाकजेन रसेन रूपेण शुक्लभास्वरेण स्पर्शेन अपाकजानुष्णाशीतेन यतो [3]रसन-नयन-स्पर्शनानि रस-रूप-स्पर्शानभिव्यञ्जन्त्यतो रसवत्त्वाद् रूपवत्त्वात् स्पर्शवत्त्वाच्च भूतान्तरैर्निमित्तैरनभिभूतत्वेन भूयस्त्वाच्च त्रिष्विन्द्रियेषु यथासङ्ख्यमापस्तेजो वायुश्च समवायिकारणानि द्रष्टव्यानि । [4]आकाशं तु स्वत एव श्रोत्रं कर्णशष्कुल्य[5]वच्छिन्नं न प्रकृतिरनारम्भकत्वात् । एवं प्रत्यक्षं व्याख्यातम् ।

॥ अष्टमोऽध्यायः ॥

१ वायुश्च रसरूपस्पर्शेषु रसरूपस्पर्शविशेषात् PS. । वायुश्च रसरूपस्पर्शेषु रसरूपस्पर्शादिति O. । वायुश्च रसरूप[स्पर्श]ज्ञानेषु रसरूपस्पर्शात् **मि.** । वायुश्च रसरूपस्पर्शाविशेषात् **उ.** । २ मधुररसेन O. । ३ रसना° O. । ४ आकाशे तु स्वत एव श्रोत्रे O. । ५ °ल्यावच्छिन्नं न प्रकृति° P. । °ल्यवच्छिन्नं प्रकृति° O. ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

## नवमोऽध्यायः[1]।

इदानीमनुमानं व्याचिख्यासुस्तस्य विषयं दर्शयति—

**क्रियागुणव्यपदेशाभावा[2]दसत् । ९ । १**

न तावत् कार्यं प्रागुत्पत्तेः प्रत्यक्षेण गृह्यते । नाप्यनुमानेन, सति लिङ्गे तस्य भावात्, लिङ्गाभावश्च तदीययोः क्रियागुणयोरनुपलब्धेः, न चान्यद् 'व्यपदेश'शब्द-सूचितं लिङ्गमस्ति । तस्मात् प्रागुत्पत्तेरसत् ।

पश्चात्—

**सदसत् । ९ । २ ।**

सद्भूतं च कार्यं प्रध्वस्तमुत्तरकालमसदेव, न[3] सतस्तिरोधानं क्रियागुणव्यपदेशा-भावादेव ।

मध्ये तु—

**[4]असतः सत् क्रियागुणव्यपदेशा(श?)भावादर्थान्तरम् । ९ । ३ ।**

प्रध्वंसात् पूर्वमुत्पत्तेरुत्तरकालमसतोऽर्थान्तरभूतं वस्तु 'सत्' इत्युच्यते क्रियागुण-व्यपदेशानां भावात् ।

**सच्चासत् । ९ । ४ ।**

सदपि वस्तु भावान्तरनिषेधेन गौरश्वो न भवतीति, कार्याकरणेन नायं गौर्यो न वहति 'असत्' इत्युपचर्यते ।

**यच्चान्यत् सतस्तदप्यसत् । ९ । ५ ।**

सतश्च वस्तुनो यदन्यदत्यन्ताभावरूपं प्रागुपाधिप्रध्वंसाभावाविषयं[6] शशविषाणादि तदप्यसदेव । असतामविशेषात् प्रागसति कथं कारकप्रवृत्तिर्नान्यत्रेति चेत्, न, विशेषग्रहणात् ।

---

१ O. P. PS. मध्येऽस्मिन्नध्याय आह्निकविभागो नास्ति । २ °वात्तस्यासत् O. । °वात्प्रागसत् उ. । ३ न सत् न तिरोधानं O. । ४ असतः क्रियागुणव्यपदेशाभावादर्थान्तरम् उ. । असति क्रियागुणव्यपदेशाभावादर्थान्तरम् मि. । ५ व्यपदेशाभावात् O । ६ प्रध्वंसाविषयं O. ।

तत्र—

**असदिति [1]भूतप्रत्यक्षाभावाद् भूतस्मृतेर्विरोधिप्रत्यक्षत्वाच्च [2]ज्ञानम् । ९ । ६ ।**

प्रध्वंसासति 'असत्' इति ज्ञानं भूतस्य वस्तुनः पूर्ववदिदानीं दर्शनाभावात् तस्य च भूतस्य वस्तुनः स्मरणाद् विरोधिनश्च कपालादेर्ग्रहणाद् विनाशं परिकल्प्योत्पद्यते, [3]अन्यथा तत् कथमिव न दृश्येत तथात्वस्य[4]ाविशेषात् ।

प्रागभावे तु—

**तथा[ऽ]भावे भावप्रत्यक्षत्वाच्च । ९ । ७ ।**

मृत्पिण्डावस्थायां प्रागभावे घटविषयं प्रत्यक्षज्ञानं नाभूत्, इदानीं तु घटविषयं विरुद्धं विज्ञानमुदभूत्, स्मर्यते चाभावावस्था, तस्मादिदानीमयं भावः समभूत् पूर्वमस्याभाव एव चा[5]सीदिति प्रागभावे 'असत्' इति निश्चयज्ञानम् ।

**एतेनाघटोऽगौरधर्मश्च व्याख्यातः[6] । ९ । ८ ।**

य[7]दा हि स्थाल्यां घट इत्युत्पन्नविज्ञानस्य [8]कारणान्तरतः सम्यक्प्रत्यय उत्पद्यते 'नायं घटः, स्थालीयम्' इति तदपि घटप्रत्ययस्याभावात् तस्य च स्मरणाद् विरुद्धस्य च स्थाल्यादेर्दर्शनाद् बोद्धव्यम् । एवमश्वे[9] 'अगौः' इति । तथा सामान्यतो दर्शनाद् रात्रिस्नानादेर्धर्मत्वे सम्भाविते 'अधर्मः' इत्युत्पद्यत इति चेतनाचेतनातीन्द्रियभेदेनोदाहरणत्रयम् ।

**अभूतं नास्तीत्यनर्थान्तरम् । ९ । ९ ।**

प्राक्प्रध्वंसोपाध्यभावेभ्यो यदत्यन्ताभावरूपं शशविषाणादि तद् 'अभूतम्' 'नास्ति' इति पर्यायशब्दा[10]भ्यामव्यतिरिक्तमुच्यते, नास्य पर्यायशब्दैरर्थान्तरता कथ्यते, अतोऽस्य पर्यायशब्दैरेवोपदर्शनं लक्षणम्, नास्य देशकालादिनिषेधः ।

---

१ भूतस्य प्रत्यक्षाभावाद् O. । भूतप्रत्ययाभावाद् P. । तुलना–"तदपि घटप्रत्ययस्याभावात् तस्य च स्मरणाद् विरुद्धस्य च स्थाल्यादेर्दर्शनाद् बोद्धव्यम्"–पृ० ६७ पं० १४–१५ । २ न ज्ञानम् O. । ३ अन्यथा कथमिव P. । ४ °विशेषः O. । ५ आसीदिति प्रागभावमसदिति निश्चयज्ञानम् O. । ६ एतत् सूत्रं यावदेव **मि.** पुस्तकम् । ७ यथाहि P. । ८ कारणान्तरितसम्यक्प्र° P. । ९ °मश्वो[ऽ]गौरिति O. । १० °शब्दाभ्यां चाव्यति° O. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अन्यत्र तु—

**नास्ति घटो गेह इति सतो घटस्य गेहसंयोगप्रतिषेधः । ९ । १० ।**

नास्ति घटोऽस्मिन् देशे काले वेति देशादिनिषेधो घटादेः[1], न स्वरूपतो निषेधः क्रियत इति ।

**नास्त्यन्यश्च[2]न्द्रमा इति सामान्याच्चन्द्रमसः प्रतिषेधः । ९ । ११ ।**

'नास्ति द्वितीयश्चन्द्रमाः' इति सङ्ख्याप्रतिषेधेन सामान्याच्चन्द्रत्वाख्याच्चन्द्रमा निवर्त्यते इति कृत्वा चन्द्रत्वं सामान्यं नास्तीत्युक्तं भवति । देश-का[3]ल भाव सामर्थ्योपाधीनामभावे तदत्यन्तासत एव प्रभेदश्चन्द्रत्वसामान्यनिषेध इति वर्णयन्ति ।

सिकता[4]भ्योऽनुत्पत्तेर्दध्नः क्षीराच्चोत्पत्तेः [5]प्रत्यक्षेण चाग्रहणात् सदसत् कार्यं कारणे ।

**स[6]दसतोर्वैधर्म्यात् कार्ये सदसत्ता न । ९ । १२ ।**

सत्त्वासत्त्वयोर्युगपद्विरुद्धत्वान्न सदसत् कार्यं कारणे । तस्मादसदेव ।

प्रत्यक्षपरोक्षविषयत्वाद् योगिप्रत्यक्षं प्रत्यक्षानुमानयोर्मध्ये व्याख्यायते—

**आत्मन्यात्ममनसोः संयोगविशेषादा[7]त्मप्रत्यक्षम् । ९ । १३ ।**

आहृत्य विषयेभ्य इन्द्रियाणि तेभ्यश्च मन आत्मन्येव यदा समाधीयते तदा योगजधर्मापेक्षादात्मान्तःकरणसंयोगाद् विशिष्टात् तत्रभवतां स्वस्मिन्नात्मनि ज्ञानं प्रत्यक्षमुत्पद्यते ।

**[8]तथा द्रव्यान्तरेषु । ९ । १४ ।**

प्रतिषिद्धात्मसंयोगेषु व्यापकद्रव्येष्वात्मनाऽसंयुक्तेषु अप्रतिषिद्धात्मसंयोगेषु च परमाण्वादिषूभाभ्यां संयुक्तेषु ज्ञानमुत्पद्यते ।

---

१ घटादेः स्वरूपतो निषेधः क्रिय इति P. । २ °श्चन्द्रमसिः प्रतिषेधः PS. । °श्चन्द्रमा इति सामान्याच्चन्द्रमसि निषेधः P. । **अयं P. पाठोऽपि समीचीनो भाति** । °श्चन्द्रमा इति सामान्यचन्द्रमस्यनिषेधः O. । **उ.** मध्ये नास्त्येवेदं सूत्रम् । तुलना–" यथा नास्त्यन्यश्चन्द्रमा इति द्वितीयचन्द्राभावादनन्योऽयमेवेति सामान्यात् प्रतिषिध्यते चन्द्रमास्तथा नास्ति घटो गेहे मृत्पिण्डे कपालावस्थायां वेलादीन्यसत्त्वानि सविशेषणानि ।"–**नयचक्रवृत्ति.** पृ० ४३५ । ३ देशकालसामर्थ्योपाधी० O । ४ °तादि(दे?)रनुत्पत्ते° O. । ५ प्रत्यक्षेणाग्रहणात् O. । ६ उद्धृतमिदं सूत्रं **नयचक्रवृत्तौ** पृ० ४६० पं० ७, पृ० ४९० पं० १० । **उ.** मध्ये नास्त्येवेदं सूत्रम् । ७ °दात्मनि प्रत्यक्षम् O. । ८ तथा P. मध्ये नास्ति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किञ्च—

**आत्मेन्द्रियमनोर्थसन्निकर्षाच्च । ९ । १५ ।**

सूक्ष्मव्यवहितविप्रकृष्टेष्वर्थेषु तेषां चतुष्टयसन्निकर्षादपि प्रत्यक्षं जायते । तथास्मदादिप्रत्यक्षेषु ।

**तत्समवायात् कर्मगुणेषु । ९ । १६ ।**

यथाऽन्तःकरणसंयोगाद् द्रव्यान्तरेषु ज्ञानमुत्पद्यते तथैव तद्द्रव्यसमवेतेषु कर्मगुणेषु ज्ञानमुत्पद्यते । यथा च चतुष्टयसन्निकर्षात् सूक्ष्मादिष्वस्मत्प्रत्यक्षेषु च ज्ञानं तथैव तत्समवेतेषु गुणकर्मसु ज्ञानमुत्पद्यते संयुक्तसमवायात् ।

**आत्मसमवायादात्मगुणेषु । ९ । १७ ।**

यथात्ममनःसंयोगात् स्वस्मिन्नात्मनि ज्ञानं[1] तथैव स्वात्मसमवेतेषु सुखादिषु ज्ञानमुत्पद्यते ।

योगिप्रत्यक्षं व्याख्यायानुमानं व्याचष्टे—

**अस्येदं कार्यं कारणं सम्बन्धि एकार्थसमवायि विरोधि चेति लैङ्गिकम् । ९ । १८ ।**

अस्येदमिति सम्बन्धमात्रं दर्शयित्वा 'कार्यं कारणम्' इत्यादिना विशिनष्टि । 'कार्यकारण'ग्रहणेन समवायिमात्रोपलक्षणाज्जात्यादेरपि ग्रहणम्; 'सम्बन्धि'शब्देन संयोगिनो ग्रहणं धूमादेः । अन्यद् व्याख्यातं संयोग्यादिसूत्रे[2] । तत्र 'एवंविधप्रसिद्धसम्बन्धस्यार्थैकदेशमसन्दिग्धं पश्यतः शेषानुव्यवसायो यः स लिङ्गदर्शनात् सञ्जायमानो लैङ्गिकम्' इति वृत्तिकारः ।

**एतेन शाब्दं[3] व्याख्यातम् । ९ । १९ ।**

यथा कार्यादि[4]स्मृतिसव्यपेक्षमनुमानं त्रिकालविषयमतीन्द्रियार्थं च तथैव शाब्दं सङ्केतस्मृत्यपेक्षं त्रिकालविषयमतीन्द्रियार्थं च । अतोऽनुमानेनैकयोगक्षेमत्वादनुमानमेवेत्युक्तं भवति ।

कः शब्दोऽर्थस्य चेत्, तदुच्यते—

**हेतु[5]रपदेशो लिङ्गं निमित्तं प्रमाणं कारणमित्यनर्थान्तरम् । ९ । २० ।**

---

१ च विज्ञानं तथैव तत्समवेतेषु सुखादिषु O. । २ दृश्यताम् ३ । १ । ८ । ३ साध्यं व्याख्यातम् P. PS. । शब्दो व्याख्यातः O. । ४ कालादिस्मृति° O. । ५ °रपदेशो निमित्तं लिङ्गं प्रमाणं—**नयचक्रवृत्ति** पृ० ६५ । °रपदेशो लिङ्गं प्रमाणं ज. ।

हेत्वादिशब्दैस्तात्पर्येण कारणं कथयति । हेतुरपदेशः कारणमित्यर्थः । एवं[1] शब्दः कारणं सदर्थस्य प्रतिपत्तौ लिङ्गं कुत इति चेत्,

**अस्येदमिति बुद्ध्यपेक्षत्वात् । ९ । २१ ।**

यथा ‘ अर्थस्य[2] प्रतिपत्तावियं हस्तचेष्टा कारणं प्रतिपत्तव्या ’ इति वृत्तसङ्केतः तां हस्तचेष्टां दृष्ट्वा[3] ततः शब्दात् कारणादर्थं प्रतिपद्यते एवम् ‘अस्यार्थस्य प्रतिपत्तावयं शब्दः कारणम्’ इति प्रसिद्धसङ्केतस्ततः[4] शब्दात् कारणादर्थं प्रतिपद्यते, यथा अभिनयादेरपि अर्थं प्रतिपद्यन्ते लौकिका एवं शब्दोऽर्थस्य सङ्केतवशेन व्यञ्जकत्वात् कारणमिति वृत्तिकारः । एवमुपमा[ना]दीनामन्तर्भावः । एवं द्वे एव प्रमाणे । प्रमाणत्वं च प्रमीयतेऽनेनेति प्रमाणं प्रमा प्रमाणमिति वा ।

अनुमानाङ्गं स्मृतिरुच्यते—

**आत्ममनसोः संयोगविशेषात् संस्काराच्च स्मृतिः । ९ । २२ ।**

अग्न्यर्थिनो धूमदर्शनं यदुत्पन्नं तदपेक्षादात्मान्तःकरणसंयोगाद् विशिष्टाच्च भावनाख्यसंस्काराद् ‘यत्र धूमस्तत्राग्निः’ इति स्मृतिरुत्पद्यते ।

**तथा[5] स्वप्नः स्वप्नान्तिकं च । ९ । २३ ।**

उपरतेन्द्रियस्य प्रलीनमनस्कस्यान्तःकरणेनैव ज्ञानं स्वप्नः, स्वप्नेऽपि स्वप्नज्ञानं स्वप्नान्तिकम्, तदुभयं पूर्वप्रत्ययापेक्षादात्ममनःसंयोगविशेषाद् भावनासहायादुत्पद्यते ।

**धर्माच्च । ९ । २४ ।**

अननुभूतार्थविषयमपि स्वप्नज्ञानं शुभाशुभसूचकं धर्मात् ‘च’शब्दादधर्माच्चेति ।

जाग्रतस्तु—

**इन्द्रियदोषात् संस्काराच्चाविद्या[6]* । ९ । २५ ।**

वातादिदोषेणोपहतेन्द्रियस्य पूर्वरजतानुभवजनितात् संस्कारादात्ममनःसंयोगाच्च

---

१ एवं शब्दकारणसमर्थस्य O. । ( एवं शब्दः कारणमर्थस्य ? ) । २ अर्थस्यार्थस्य O. । अत्र ‘ **अस्यार्थस्य** ’ इत्यपि पाठः समीचीनो भाति । ३ दृष्ट्वा सर्वत्र समर्थं प्रतिपद्य एवम् O. । ४ प्रसिद्धसंकेतात्ततश्शब्दात् O. । ५ तथा स्वप्नस्वप्नान्तिकम् PS. । तथा स्वप्नः स्वप्नेऽपि स्वप्नज्ञानं स्वप्नान्तिकं च P. । तथा स्वप्नः स्वप्नान्तिकम् उ. । ६ ***विद्या** इत्यत आरभ्य **पञ्चभ्यो*** [ १० । १ ]इत्यन्तः पाठः O. मध्ये नास्ति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विशिष्टादधर्मापेक्षादतस्मिंस्तदिति ज्ञानं यथा शुक्तिकायां रजतमिति । अनध्यवसायो यथा दाक्षिणात्यस्योष्ट्रदर्शने ।

**तद् दुष्टं ज्ञानम् । ९ । २६ ।**

यदेतत् संशयविपर्ययानध्यवसायस्वप्नलक्षणं तद् दुष्टमप्रमाणमिति ।

**अदुष्टं विद्या । ९ । २७ ।**

यददुष्टं प्रत्यक्षानुमानाख्यं तद्विद्येत्युच्यते ।

**आर्षं सिद्धदर्शनं च धर्मेभ्यः[1] । ९ । २८ ।**

तत्र यल्लिङ्गनिरपेक्षमतीतानागतवर्तमानेषु धर्मादिष्वतीन्द्रियेषु ग्रन्थैरनुपात्तेषु देवर्षीणां यत् प्रातिभमुत्पद्यते विज्ञानं लौकिकानां कदाचिदेव 'श्वो मे भ्राता आगन्ता, हृदयं मे कथयति' इति अनवधारणफलं केवलं तर्केण नीयते तदार्षमित्युच्यते । अञ्जनरसायनादि सिद्धानां तु सूक्ष्मव्यवहितविप्रकृष्टार्थविषयं यद्वा दिव्यान्तरिक्षादिनिमित्तेभ्यः प्राणिनां धर्माधर्मविपाकपरिज्ञानं तत् सिद्धदर्शनम् । तच्च प्रत्यक्षानुमानाभ्यां न भिद्यते, आर्षं भिद्यत इति वर्णयन्ति । तदेतदार्षं सिद्धदर्शनं च विशिष्टाद् धर्मादात्ममनःसंयोगाच्चोत्पद्यते ।

॥ इति नवमोऽध्यायः ॥

१ धर्मेभ्यः । नवमोऽध्यायः PS. ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# [1]दशमोऽध्यायः ।

[2]बुद्धिप्रसङ्ग एवापर्यवसिते सुखदुःखबुद्ध्योरालम्[3]बने सुखदुःखे च कथयति । तथाहि—'सुखदुःखमोहमयानि भूतानि' इत्याहुः । तदयुक्तम् ।

**आत्मसमवायः सुखदुःखयोः *पञ्चभ्योऽर्थान्तरत्वे हेतुस्तदाश्रयि[4]भ्यश्च गुणेभ्यः । १० । १ ।**

आत्मन्येव यः समवायः सुखदुःखयोरसौ पञ्चभ्यः क्षित्यादिभ्यस्तदाश्रयिभ्यश्च गुणेभ्यो गन्धरसरूपस्पर्शेभ्योऽर्थान्तरत्वे हेतुः, अन्यगुणानामन्यत्रासमवायात् । आत्मसमवायश्चैतयोरहङ्कारेणैकवाक्यभावात् ।

आत्मसमवायित्वेऽपि—

**इष्टानिष्टकारणविशेषाद् विरोधाच्च मिथः सुखदुःखयोरर्थान्तरभावः । १० । २ ।**

स्त्र्यादिकारणजन्यं सुखम् । वि[6]षादिकारणजन्यं दुःखम् । परस्परविरुद्धे च सुखदुःखे, अन्योन्यविनाशेनोत्पत्तेः । अतोऽनयोर्भेदः, नैकत्वमेकार्थसमवायात् ।

संशयनिर्णयौ परस्पराभावमात्र[7]म्, न वस्तुसन्ताविति चेत्, न,

**संशयनिर्णययोरर्थान्तरभा[8]वश्च ज्ञानान्तरत्वे हेतुः । १० । ३ ।**

अर्थान्तरात् परस्परविलक्षणात् कारणाद् भाव उत्पत्तिः संशयनिर्णययोः । तथाहि—विशेषं जिज्ञासोरगृहीतविशेषस्य सामान्यालोचनात् संशयो जायते । संशयात् परतः प्रमाणान्तरेण विशेषग्रहणात् 'स्थाणुरेवायम्' इति निश्चयः । यदि चैतौ न वस्तुसन्तौ भवेतां नैतौ विलक्षणकारणाभ्यामुत्पद्येयाताम् । अतो ज्ञानान्तरभूतौ संशयनिर्णयौ परस्परतः, निर्णयस्तु प्रत्यक्षानुमानाभ्यां न भिद्यत इति केचित् ।

**तयोर्निष्पत्तिः प्रत्यक्षलैङ्गिकाभ्यां ज्ञानाभ्यां व्याख्याता । १० । ४ ।**

---

१ O. P. PS. मध्येऽस्मिन्नध्याये आह्निकविभागो नास्त्येव । २ बुद्धिप्रसंगा एगापर्यवसिते । **'बुद्धिप्रसङ्गे पर्यवसिते'** इत्यपि पाठोऽत्र समीचीनो भवेत् । ३ °म्बनसुखदुःखे P. । (°म्बनं सुखदुःखे ?) । ४ °श्रयिभ्यो गुणेभ्यः O. । ५ °वायः O. । ६ विषादिकारणजन्यं दुःखम् P. मध्ये नास्ति । ७ °मात्रेणावस्तुसन्ताविति O. । ८ °भावः ज्ञाना° O. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यथा स्मृतिमत आत्मनः प्रत्यक्षं लिङ्गं दृष्ट्वा अप्रत्यक्षे ज्ञानमुत्पद्यते तथैव सामान्यमात्रदर्शनात् स्मृतिमतो विशेषं जिज्ञासोरगृहीते विशेषे 'स्थाणुः पुरुषो वा' इति जायते संशयः। यथा च भूतार्थसम्बन्धवशेन 'अयमेवंभूतोऽर्थः' इति प्रत्यक्षमुत्पद्यते तथैव विशेषसम्बन्धवशेन निवृत्ते संशये 'इदमेवंभूतम्' इति निर्णयो जायते।

इदानीं कार्यकारणबुद्धी निरूपयति—

**भूतमिति प्रत्यक्षं[2] व्याख्यातम्। १०। ५।**

स्वकारणेभ्य उत्पन्ने[3] कार्ये भूतं निष्पन्नमिदं कार्यमिति कार्यज्ञानम्, 'विशेषणज्ञानाद् विशेष्यज्ञानम्' इति न्यायेन तद् व्याख्यातम्, तच्च मुख्यम्।

अन्यत्र त्वौपचारिकं कार्याभावात्। तथाहि—निष्पत्स्यमाने[4] कार्ये

**भविष्यतीति कार्यान्तरे[5] दृष्टत्वात्। १०। ६।**

यथाभूतायाः सामग्र्या अनन्तरं पटादि कार्यमुत्पन्नं दृष्टं तथाभूतसामग्रीदर्शनादिदानीमनुत्पन्नेऽपि कार्ये कार्यशब्दमुपचर्य 'भविष्यति कार्यम्' इति जायते कार्यबुद्धिः।

निष्पद्यमानेऽपि[6]—

**तथा[7] भवतीति सापेक्षेभ्योऽनपेक्षेभ्यश्च। १०। ७।**

यदा[8] प्रस्तारितांस्तन्तून् पूर्वपूर्वसंयोगापेक्षानुपलभमानः पश्चात् पश्चादुत्तरोत्तरतन्तुसंयोगे सति अनपेक्षानुपलभते तदास्य पट्टिकाद्यं[9]वान्तरं कार्यं पश्यत उत्पद्यमाने कार्यद्रव्ये निष्पन्नानिष्पन्नसंयोगपर्यालोचनया 'भवति कार्यम्, उत्पद्यते कार्यम्' इति जायते बुद्धिः।

यथा चोत्पत्तौ एवं विनाशेऽपि प्रयत्नानन्तरोत्पत्तीनां घटादिद्रव्याणां विनाशे 'अभूत्' इति प्रत्ययस्य 'भूतप्रत्यक्षाभावात्' [९।६] इत्यादिना कथितत्वादिदानीं पारिणामिके शरीरादौ कथ्यते। तत्र विनष्टे—

**अभूदित्यभूतात्। १०। ८।**

---

१ सभूता° O.। (सद्भूता° ?)। २ प्रत्यक्षमाख्यातम् O.। ३ उत्पन्ने ज्ञाने भूतं O.। ४ निष्पद्यमाने कार्ये O.। ५ °न्तरदृष्टत्वात् PS.। ६ °ऽपि O. मध्ये नास्ति। ७ तथा भवति सापे° O. P.। "तथा भवतीति सापेक्षेभ्यो निरपेक्षेभ्यश्च" इति **प्रशस्तपादभाष्ये** संयोगनिरूपणे। ८ यदा प्रस्तारिताःशून्य(रितांशून् ?)पूर्वपूर्वसंयोगा° P.। यदप्रसूरितं तद्भूत पूर्वं पूर्वपूर्वसंयोगा° O.। ९ °द्यवान्तकार्यम् P.।

१०

अभूताद् विनष्टादित्यर्थः । पाणिपादग्रीवादीनवयवान् विभक्तानुपलभ्य विनष्टादसमवायिकारणात् संयोगाद् विनष्टे कार्ये 'अभूत् कार्यं[1] शरीराख्यम्' इति जायते बुद्धिः ।

विनश्यति पुनः—

**सति च कार्यासमवायात् । १० । ९ ।**

सति संयोगे 'च'शब्दादसति, घातकादिविनाशकारणव्यापारेऽपि केषाञ्चिद् ग्रीवाद्यवयवानामनिवृत्ते संयोगे विभागाच्च पाण्यादीनां विनिवृत्ते कार्यस्य शरीरादेरसमवायाद् विनाशकारणाघ्रातत्वेन प्रचलितत्वाद् विनष्टाविनष्टसंयोगालोचनेन 'कार्यं नश्यति' इति ज्ञानमुत्पद्यते । अन्ये तु 'अभूत् कार्यम्' इति व्याचक्षते, [2]तदयुक्तं तदभिप्रायेणैव [3]कार्यस्य विनष्टत्वात् ।

एषा च बुद्धिः—

**एकार्थसमवायिषु कारणान्तरेषु दर्शनादेकदेश [4]इत्येकस्मिन् । १० । १० ।**

शरीरादौ क्वचिदेकस्मिन्नर्थे यदा पाण्यादयोऽवयवाः समवायिन उपलब्धाः, अथास्य तेषु एकदेशबुद्धिरुत्पन्ना, इदानीं [5]तान् विभज्य विभक्तानुपलभ्य [6]एतस्मिन्नेकदेशिनि 'अभूत कार्यम्' इति ज्ञानोत्पत्तिः ।

के तेऽवयवा इत्याह—

**शिरः पृष्ठमुदरं पाणिरिति तद्विशेषेभ्यः । १० । ११ ।**

स्वसामान्यविशेषेभ्यः [7]शिरस्त्वादिभ्यो येषु ज्ञानं जायते [ ते ] शिरआदयोऽवयवा इत्यर्थः ।

कारणबुद्धिस्तु—

**कारणमिति [8]द्रव्ये कार्यसमवायात् । १० । १२ ।**

कार्यं [9]द्रव्यं गुणान् कर्म वा समवेतं द्रव्ये पश्यतो 'द्रव्यं कारणम्' इति मुख्या बुद्धिः, कार्यस्य जातत्वात् ।

---

१ अभूतात् कार्यं शरीराख्यम् P. । अभूत् कार्याख्यं शरीरम् O. । २ तदपि युक्तं तथाहि(तदभि ?)-प्रायेणैव O. । ३ ( कार्यस्याविनष्टत्वात् ? ) । ४ इत्येतस्मिन् P. । ५ तद्विभक्तानुपलभ्य ते देशिनि अभूत् कार्यमिति ज्ञानोत्पत्तेः O. । ६ (एकस्मिन्नेकदेशिनि ?) । ७ शिरआदिभ्यो O. । ८ द्रव्यं O. । ९ द्रव्यगुणाः कर्म वा P. । द्रव्यं द्रव्यगुणाः कर्म वा O. । ( द्रव्यगुणौ कर्म वा ? ) ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अजाते तु—

**संयोगाद्वा । १० । १३ ।**

अनिष्यमाणेऽपि कार्ये तन्त्वादीनां परस्परेण संयोगादस्य पटं प्रति तेषु कारणबुद्धिरुत्पद्यते ।

**कारणसमवायात् कर्मणि । १० । १४ ।**

संयोगविभागेषु निरपेक्षकारणत्वात् तत्कारण[1]द्रव्ये समवेतत्वात् कर्मोत्पन्नमात्रमेव कारणबुद्धिं जनयति ।

इदानीं गुणेषु—

**तथा रूपे कारणकारणसमवायाच्च । १० । १५ ।**

[2]कार्यरूपस्य समवायिकारणे पटादौ यत् समवायिकारणं तन्तवस्तेषु कारणकारणेषु समवेतत्वात् [3]कारणं रूपादय इत्युच्यन्ते, 'च'शब्दादनुत्पन्नेऽपि कार्यरूपे कारणबुद्धिः ।

**कारणसमवायात् संयोगे । १० । १६ ।**

कार्यस्य पटादेः समवायिकारणेषु तन्त्वादिषु समवेतत्वात् संयोगे द्रव्यं प्रति कारणबुद्धिः ।

गुणकर्मारम्भे तु—

**[4]तथा कारणाकारणसमवायाच्च । १० । १७ ।**

कारणे घटेऽकारणे चाग्नावग्निसंयोगः समवेतत्वात् कारणं पाकजानाम् । अभिघात्ये [5]कर्मकारणेऽभिहन्तरि चाकारणे समवेतत्वाद् वेगवद्द्रव्यसंयोगः कर्मणः कारणम् ।

पाकजारम्भे तु—

**संयुक्तसमवायादग्नेर्वैशेषिकम् । १० । १८ ।**

अणूनां पाकजरूपाद्यारम्भेऽणुभिः संयुक्तेऽग्नौ समवेतमुष्णस्पर्शं [6]वैशेषिकं गुणमपेक्षते संयोगः । द्रव्यं वर्जयित्वाऽन्यत्र संयोगः सापेक्षः कारणम् ।

---

१ °द्रव्यसमवे° O. । २ कार्यस्य रूपस्य O. । ३ कार्यगुणा रूपादय O. । ४ तथा O. P. उ. मध्ये नास्ति । ५ कर्मकारणे अभिहन्तरि च कारणसमवेतत्वाद् O. । कर्मकारणे समवेतत्वाद् P. । ६ वैशेषिकगुण° O. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अतीन्द्रिये भूतादावर्थे—

**[1]लैङ्गिकं प्रमाणं व्याख्यातम् । १० । १९ ।**

लैङ्गिकं परोक्षमुच्यते, 'भविष्यति' इत्यादि कार्याणां येनावगम्यते तदनुमानं प्रमाणं व्याख्यातम् ।

[2]शास्त्रादौ धर्मो व्याख्येयतया प्रतिज्ञातः, अतस्तस्य प्रत्याम्नायानुसन्धानार्थं सूत्रद्वयं गतमपि पुनरुच्यते—

**[3]दृष्टानां दृष्टप्रयोजनानां दृष्टाभावे प्रयोगोऽभ्युदयाय । १० । २० ।**

श्रुतौ स्मृतौ च दृष्टानां [4]दृष्टस्य प्रयोजनस्याभावे प्रयोगोऽभ्युदयाय धर्मायेत्यर्थः । तस्य चाम्नायात् समधिगम उक्तः । आम्नायस्य च सिद्धं प्रामाण्यम्—

**तद्वचनादाम्नायप्रामाण्यमिति[5] । १० । २१ ।**

तनु-भुवनादिकार्यतया विज्ञातो भगवानीश्वरः, तत्प्रणयनाच्चाम्नायस्य सिद्धं प्रामाण्यम् । 'इति'शब्दः समाप्त्यर्थः । एवं द्रव्यादीनां साधर्म्यवैधर्म्यपरिज्ञानाद् वैराग्यद्वारेण ज्ञानोत्पत्तेः 'आत्मा ज्ञातव्यः' [6]इत्यादिवाक्येभ्यश्चोपासाक्रमेण विज्ञानावाप्तेर्निःश्रेयसाधिगमः ।

जगतोऽस्यानन्दकरं [7]विद्याशर्वर्याः सदैव यश्चन्द्रम् ।
आनन्दयति स वृत्तिं [8]चन्द्रानन्दो व्यधादेताम् ॥

॥ [9]* इति वैशेषिकसूत्रवृत्तिः समाप्ता * ॥

१ लैङ्गिके P. PS. । २ दृश्यताम् १ । १ । १ । ३ दृश्यताम् ६ । २ । १ । ४ दृष्टप्रयोजन(ना)भावात् O. । ५ °मिति ॥ दशमोऽध्यायः ॥ वैशेषिकसूत्राणि समाप्तानि ॥–PS. । दृश्यताम् १ । १ । ३ । ६ इत्यादिवाक्येभ्यश्चोपाक्रमेग विज्ञानाव्याप्तिनिःश्रेयसाधिगमः O. । इत्यादिना वाक्येभ्यश्चोपासाक्रमेण विज्ञानाव्याप्तेर्निःश्रेयसाधिगमः P. । ७ विद्यासर्वर्याः P. । विद्यायास्सर्वथा O. । ८ चन्द्रानन्दो व्यधात् कश्चित् ॥ इति वैशेषिकसूत्रवृत्तिस्समाप्ता ॥ भद्रं पश्येम प्रचरेम भद्रम् । भद्रं वदेम शृणुयाम भद्रम् ॥ O. । ९ * * अयं पाठः P. मध्ये नास्ति ।

# प्रथमं परिशिष्टम्[1]।

## अत्र[2] मुद्रितस्य O. P. PS. अनुसारिसूत्रपाठस्य उपस्कारकृदभिमतसूत्रपाठेन सह तुलना ।

| [2]अत्र मुद्रितः सूत्रपाठः । | उपस्कारकृदभिमतः सूत्रपाठः । |
|---|---|
| **१. १.** | |
| अथातो धर्मं व्याख्यास्यामः । १ । | १ । १ । १ । |
| यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः । २ । | १ । १ । २ । |
| तद्वचनादाम्नायप्रामाण्यम् । ३ । | तद्वचनादाम्नायस्य प्रामाण्यम् । १। १। ३ । |
| × | धर्मविशेषप्रसूताद् द्रव्यगुणकर्मसामान्यविशेषसमवायानां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसम् ।१।१।४। |
| पृथिव्यापस्तेजो वायुराकाशं कालो दिगात्मा मन इति द्रव्याणि । ४ । | १ । १ । ५ । |
| रूपरसगन्धस्पर्शाः सङ्ख्याः परिमाणानि पृथक्त्वं संयोगविभागौ परत्वापरत्वे बुद्धयः सुखदुःखे इच्छाद्वेषौ प्रयत्नश्च गुणाः । ५ । | ....प्रयत्नाश्च गुणाः । १ । १ । ६ । |

१ **शङ्करमिश्रेण** वैशेषिकसूत्रस्योपरि उपस्काराभिधा व्याख्या विरचितास्ति । तत्र च सूत्रपाठे यत्र यत्र साम्यं वैषम्यं न्यूनाधिकत्वं वा दृश्यते तदेतस्मिन् परिशिष्टे प्रदर्श्यते । इदं तु ध्येयम्—यत्र यत्र × एतादृशं चिह्नं विहितं तत्र तत्र तत्तत् सूत्रं नास्तीति ज्ञेयम् । यत्र न कश्चिद् विशेषो दर्शितस्तत्र तत् सूत्रमुपस्कारेऽत्र मुद्रितेन सूत्रपाठेन तुल्यमेव विद्यत इत्यवगन्तव्यम् । २ अत्र मुद्रिते O. P. PS. अनुसारिसूत्रपाठेऽपि O. P. PS. मध्ये परस्परं भिन्नाः केचन पाठभेदाः सन्ति । ते च वृत्तिसहिते तत्र तत्र सूत्रेऽधस्तात् टिप्पण्यामस्माभिर्दर्शितास्तत्रैवावलोकनीयाः । उपस्कारकृदभिमतसूत्रपाठात् O. P. PS. अनुसारी वैशेषिकसूत्रपाठोऽतिप्राचीन इत्यपि ध्येयम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| अत्र मुद्रितः सूत्रपाठः । | उपस्कारकृदभिमतः सूत्रपाठः । |
|---|---|
| उत्क्षेपणमवक्षेपणमाकुञ्चनं प्रसारणं गमनमिति कर्माणि । ६ । | १ । १ । ७ । |
| सदनित्यं द्रव्यवत् कार्यं कारणं सामान्यविशेषवदिति द्रव्यगुणकर्मणामविशेषः ।७। | १ । १ । ८ । |
| × | द्रव्यगुणयोः सजातीयारम्भकत्वं साधर्म्यम् । १ । १ । ९ । |
| द्रव्याणि द्रव्यान्तरमारभन्ते । ८ ।<br>गुणाश्च गुणान्तरम् । ९ । | १ । १ । १० । |
| कर्म कर्मसाध्यं न विद्यते । १० । | १ । १ । ११ । |
| कार्याविरोधि द्रव्यं कारणाविरोधि च । ११। | न द्रव्यं कार्यं कारणं च वधति । १।१।१२। |
| उभयथा गुणः । १२ । | उभयथा गुणाः । १ । १ । १३ । |
| कार्यविरोधि कर्म । १३ । | १ । १ । १४ । |
| क्रियावद् गुणवत् समवायिकारणमिति द्रव्यलक्षणम् । १४ । | क्रियागुणवत् .... । १ । १ । १५ । |
| द्रव्याश्रय्यगुणवान् संयोगविभागेष्वकारणमनपेक्ष इति गुणलक्षणम् । १५ । | १ । १ । १६ । |
| एकद्रव्यमगुणं संयोगविभागेष्वनपेक्षं कारणमिति कर्मलक्षणम् । १६ । | ........ष्वनपेक्ष........ १ । १ । १७ । |
| द्रव्यगुणकर्मणां द्रव्यं कारणं सामान्यम् । १७ । | १ । १ । १८ । |
| तथा गुणः । १८ । | १ । १ । १९ । |
| संयोगविभागानां कर्म । १९ । | ....विभागवेगानां कर्म समानम् ।१।१।२०। |
| न द्रव्याणां व्यतिरेकात् । २० । | न द्रव्याणां कर्म । १ । १ । २१ ।<br>व्यतिरेकात् । १ । १ । २२ । |
| गुणवैधर्म्यान्न कर्मणाम् । २१ ।<br>द्रव्याणां द्रव्यं कार्यं सामान्यम् । २२ । | द्रव्याणां द्रव्यं कार्यं सामान्यम् ।१।१।२३।<br>गुणवैधर्म्यान्न कर्मणां कर्म । १ । १ । २४ । |
| द्वित्वप्रभृतयश्च संख्याः पृथक्त्वं संयोगविभागाश्च । २३ । | द्वित्वप्रभृतयः संख्याः पृथक्त्वसंयोगविभागाश्च । १ । १ । २५ । |

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| अत्र मुद्रितः सूत्रपाठः । | उपस्कारकृदभिमतः सूत्रपाठः । |
|---|---|
| असमवायात् सामान्यं कर्म कार्थं न विद्यते । २४ । | असमवायात् सामान्यकार्थं कर्म न विद्यते । १ । १ । २६ । |
| संयोगानां द्रव्यम् । २५ । | १ । १ । २७ । |
| रूपाणां रूपम् । २६ । | १ । १ । २८ । |
| गुरुत्वप्रयत्नसंयोगानामुत्क्षेपणम् । २७ । | १ । १ । २९ । |
| संयोगविभागाः कर्मणाम् । २८ । | संयोगविभागाश्च कर्मणाम । १ । १ । ३० । |
| कारणसामान्ये द्रव्यकर्मणां कर्माकारणमुक्तम्[1] । २९ । | १ । १ । ३१ । |

## १. २.

| | |
|---|---|
| कारणाभावात् कार्याभावः । १ । | १ । २ । १ । |
| न तु कार्याभावात् कारणाभावः । २ । | १ । २ । २ । |
| सामान्यं विशेष इति बुद्ध्यपेक्षम् । ३ । | १ । २ । ३ । |
| भावः सामान्यमेव । ४ । | भावोऽनुवृत्तेरेव हेतुत्वात् सामान्यमेव । १ । २ । ४ । |
| द्रव्यत्वं गुणत्वं कर्मत्वं च सामान्यानि विशेषाश्च । ५ । | १ । २ । ५ । |
| अन्यत्रान्त्येभ्यो विशेषेभ्यः । ६ । | १ । २ । ६ । |
| सदिति यतो द्रव्यगुणकर्मसु । ७ । | ........द्रव्यगुणकर्मसु सा सत्ता । १ । २ । ७ । |
| द्रव्यगुणकर्मभ्योऽर्थान्तरं सत्ता । ८ । | १ । २ । ८ । |
| एकद्रव्यवत्वान्न द्रव्यम् । ९ । | × |
| गुणकर्मसु च भावान्न कर्म न गुणः । १० । | १ । २ । ९ । |
| सामान्यविशेषाभावाच्च । ११ । | सामान्यविशेषाभावेन च । १ । २ । १० । |
| एकद्रव्यवत्त्वेन द्रव्यत्वमुक्तम् । १२ । | अनेकद्रव्यवत्त्वेन...... १ । २ । ११ । |

१ प्रायः प्रत्यध्यायं प्रत्याह्निकं च O. P. मध्येऽन्तिमे सूत्रे समाप्तिद्योतक '**इति**' शब्दो दृश्यते, किन्तु PS. **मि. उ.** मध्येऽदर्शनादस्मिन् परिशिष्टेऽस्माभिस्तत्र तत्र '**इति**' शब्दो नोपात्त इति ध्येयम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| अत्र मुद्रितः सूत्रपाठः । | उपस्कारकृदभिमतः सूत्रपाठः । |
|---|---|
| सामान्यविशेषाभावेन च । १३ । | १ । २ । १२ । |
| गुणे भावाद् गुणत्वमुक्तम् । १४ । | तथा गुणेषु भावाद्.... १ । २ । १३ । |
| सामान्यविशेषाभावेन च । १५ । | १ । २ । १४ । |
| कर्मणि भावात् कर्मत्वमुक्तम् । १६ । | कर्मसु भावात् कर्मत्वमुक्तम् । १ । २ । १५ । |
| सामान्यविशेषाभावेन च । १७ । | १ । २ । १६ । |
| सल्लिङ्गाविशेषाद् विशेषलिङ्गाभावाच्चैको भावः । १८ । | सदिति लिङ्गाविशेषाद्विशेषलिङ्गाभावाच्चैको भावः । १ । २ । १७ । |

## २. १.

| | |
|---|---|
| रूपरसगन्धस्पर्शवती पृथिवी । १ । | २ । १ । १ । |
| रूपरसस्पर्शवत्य आपो द्रवाः स्निग्धाश्च ।२। | ....आपो द्रवाः स्निग्धाः । २ । १ । २ । |
| तेजो रूपस्पर्शवत् । ३ । | २ । १ । ३ । |
| वायुः स्पर्शवान् । ४ । | स्पर्शवान् वायुः । २ । १ । ४ । |
| त आकाशे न विद्यन्ते । ५ । | २ । १ । ५ । |
| सर्पिर्जतुमधूच्छिष्टानां पार्थिवानामग्निसंयोगाद् द्रवताऽद्भिः सामान्यम् । ६ । | सर्पिर्जतुमधूच्छिष्टानामग्निसंयोगाद् द्रवत्वमद्भिः सामान्यम् । २ । १ । ६ । |
| त्रपुसीसलोहरजतसुवर्णानां तैजसानामग्निसंयोगाद् द्रवताऽद्भिः सामान्यम् । ७ । | त्रपुसीसलोहरजतसुवर्णानामग्निसंयोगाद् द्रवत्वमद्भिः सामान्यम् । २ । १ । ७ । |
| विषाणी ककुद्मान् प्रान्तेवालधिः सास्नावानिति गोत्वे दृष्टं लिङ्गम् । ८ । | २ । १ । ८ । |
| स्पर्शश्च । ९ । | स्पर्शश्च वायोः । २ । १ । ९ । |
| न च दृष्टानां स्पर्श इत्यदृष्टलिङ्गो वायुः ।१०। | २ । १ । १० । |
| अद्रव्यवत्त्वाद् द्रव्यम् । ११ । | अद्रव्यवत्त्वेन द्रव्यम् । २ । १ । ११ । |
| क्रियावत्त्वाद् गुणवत्त्वाच्च । १२ । | २ । १ । १२ । |
| अद्रव्यवत्त्वेन नित्यत्वमुक्तम् । १३ । | २ । १ । १३ । |
| वायोर्वायुसम्मूर्च्छनं नानात्वे लिङ्गम् ।१४। | ........नानात्वलिङ्गम् । २ । १ । १४ । |

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| अत्र मुद्रितः सूत्रपाठः । | उपस्कारकृदभिमतः सूत्रपाठः । |
|---|---|
| वायुरिति सति सन्निकर्षे प्रत्यक्षाभावाद् दृष्टं लिङ्गं न विद्यते । १५ । | वायुसन्निकर्षे प्रत्यक्षाभावाद् दृष्टं लिङ्गं न विद्यते । २ । १ । १५ । |
| सामान्यतो दृष्टाच्चाविशेषः । १६ । | २ । १ । १६ । |
| तस्मादागमिकम् । १७ । | २ । १ । १७ । |
| संज्ञाकर्म त्वस्मद्विशिष्टानां लिङ्गम् । १८ । | २ । १ । १८ । |
| प्रत्यक्षपूर्वकत्वात् संज्ञाकर्मणः । १९ । | प्रत्यक्षप्रवृत्तत्वात्........ । २ । १ । १९ । |
| निष्क्रमणं प्रवेशनमित्याकाशस्य लिङ्गम् ।२०। | २ । १ । २० । |
| तदलिङ्गमेकद्रव्यवत्त्वात् कर्मणः । २१ । | तदलिङ्गमेकद्रव्यत्वात्....। २ । १ । २१ । |
| कारणान्तरानुक्लृप्तिवैधर्म्याच्च । २२ । | २ । १ । २२ । |
| संयोगादभावः कर्मणः । २३ । | २ । १ । २३ । |
| कारणगुणपूर्वः कार्यगुणो दृष्टः, कार्यान्तराप्रादुर्भावाच्च शब्दः स्पर्शवतामगुणः ।२४। | कारणगुणपूर्वकः कार्यगुणो दृष्टः।२।१।२४।<br>कार्यान्तराप्रादुर्भावाच्च.... । २। १ । २५। |
| परत्र समवायात् प्रत्यक्षत्वाच्च नात्मगुणो न मनोगुणः । २५ । | २ । १ । २६ । |
| लिङ्गमाकाशस्य । २६ । | परिशेषाल्लिङ्गमाकाशस्य २ । १ । २७ । |
| द्रव्यत्वनित्यत्वे वायुना व्याख्याते ।२७। | २ । १ । २८ । |
| तत्त्वं भावेन । २८ । | २ । १ । २९ । |
| × | शब्दलिङ्गाविशेषाद् विशेषलिङ्गाभावाच्च।३०। |
| × | तदनुविधानादेकपृथक्त्वं चेति । २। १। ३१। |

## २. २.

| | |
|---|---|
| पुष्पवस्त्रयोः सति सन्निकर्षे गन्धान्तराप्रादुर्भावो वस्त्रे गन्धाभावलिङ्गम् । १ । | पुष्पवस्त्रयोः सति सन्निकर्षे गुणान्तराप्रादुर्भावो वस्त्रे गन्धाभावलिङ्गम् ।२।२।१। |
| एतेनाप्सूष्णता व्याख्याता । २ । | व्यवस्थितः पृथिव्यां गन्धः । २ । २ । २ । |
| व्यवस्थितः पृथिव्यां गन्धः । ३ । | एतेनोष्णता व्याख्याता । २ । २ । ३ । |
| तेजस्युष्णता । ४ । | तेजस उष्णता । २ । २ । ४ । |



Jain Education International For Private & Personal Use Only www.jainelibrary.org

| अत्र मुद्रितः सूत्रपाठः । | उपस्कारकृदभिमतः सूत्रपाठः । |
|---|---|
| अप्सु शीतता । ५ । | २ । २ । ५ । |
| अपरस्मिन् परं युगपदयुगपच्चिरं क्षिप्रमिति काललिङ्गानि । ६ । | अपरस्मिन्नपरं युगपच्चिरं क्षिप्रमिति काललिङ्गानि । २ । २ । ६ । |
| द्रव्यत्वनित्यत्वे वायुना व्याख्याते । ७ । | २ । २ । ७ । |
| तत्त्वं भावेन । ८ । | २ । २ । ८ । |
| कार्यविशेषेण नानात्वम् । ९ । | × |
| नित्येष्वभावादनित्येषु भावात् । १० । कारणे कालाख्या । ११ । | नित्येष्वभावादनित्येषु भावात् कारणे कालाख्येति । २ । २ । ९ । |
| इत इदमिति यतस्तद्दिशो लिङ्गम् । १२ । | ...यतस्तद् दिश्यं लिङ्गम् । २ । २ । १० । |
| द्रव्यत्वनित्यत्वे वायुना व्याख्याते । १३ । | २ । २ । ११ । |
| तत्त्वं भावेन । १४ । | २ । २ । १२ । |
| कार्यविशेषेण नानात्वम् । १५ । | २ । २ । १३ । |
| आदित्यसंयोगाद् भूतपूर्वाद् भविष्यतो भूताच्च प्राची । १६ । | २ । २ । १४ । |
| तथा दक्षिणा प्रतीची उदीची च । १७ । | २ । २ । १५ । |
| एतेन दिगन्तराणि व्याख्यातानि । १८ । | ...दिगन्तरालानि... । २ । २ । १६ । |
| सामान्यप्रत्यक्षाद् विशेषाप्रत्यक्षाद् विशेषस्मृतेश्च संशयः । १९ । | २ । २ । १७ । |
| दृष्टमदृष्टम् । २० । | × |
| दृष्टं च दृष्टवत् । २१ । | २ । २ । १८ । |
| दृष्टं यथादृष्टमयथादृष्टमुभयथादृष्टत्वात् । २२ । | यथादृष्टमयथादृष्टत्वाच्च । २ । २ । १९ । |
| विद्याविद्यातश्च संशयः । २३ । | २ । २ । २० । |
| श्रोत्रग्रहणो योऽर्थः स शब्दः । २४ । | २ । २ । २१ । |
| तस्मिन् द्रव्यं कर्म गुण इति संशयः । २५ । | × |
| तुल्यजातीयेष्वर्थान्तरभूतेषु च विशेषस्योभयथा दृष्टत्वात् । २६ । | तुल्यजातीयेष्वर्थान्तरभूतेषु विशेषस्योभयथा दृष्टत्वात् । २ । २ । २२ । |
| एकद्रव्यवत्त्वान्न द्रव्यम् । २७ । | एकद्रव्यत्वान्न द्रव्यम् । २ । २ । २३ । |

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| अत्र मुद्रितः सूत्रपाठः । | उपस्कारकृदभिमतः सूत्रपाठः । |
|---|---|
| अचाक्षुषत्वान्न कर्म । २८ । | नापि कर्माचाक्षुषत्वात् । २ । २ । २४ । |
| गुणस्य सतोऽपवर्गः कर्मभिः साधर्म्यम् । २९ । | २ । २ । २५ । |
| सतो लिङ्गाभावात् । ३० । | २ । २ । २६ । |
| नित्यवैधर्म्यात् । ३१ । | २ । २ । २७ । |
| कार्यत्वात् । ३२ । | × |
| अभावात् । ३३ । | × |
| कारणतो विकारात् । ३४ । | अनित्यश्चायं कारणतः । २ । २ । २८ ।<br>न चासिद्धं विकारात् । २ । २ । २९ । |
| दोषात् । ३५ । | अभिव्यक्तौ दोषात् । २ । २ । ३० । |
| संयोगाद् विभागाच्छब्दाच्च शब्दनिष्पत्तेः । ३६ । | संयोगाद् विभागाच्च शब्दाच्च शब्दनिष्पत्तिः । २ । २ । ३१ । |
| लिङ्गाच्चानित्यः । ३७ । | लिङ्गाच्चानित्यः शब्दः । २ । २ । ३२ । |
| द्वयोस्तु प्रवृत्त्योरभावात् । ३८ । | २ । २ । ३३ । |
| संख्याभावात् । ३९ । | × |
| प्रथमाशब्दात् । ४० । | २ । २ । ३४ । |
| सम्प्रतिपत्तिभावाच्च । ४१ । | २ । २ । ३५ । |
| सन्दिग्धाः सति बहुत्वे । ४२ । | २ । २ । ३६ । |
| सङ्ख्याभावः सामान्यतः । ४३ । | २ । २ । ३७ । |

## ३. १.

| | |
|---|---|
| प्रसिद्धा इन्द्रियार्थाः । १ । | ३ । १ । १ । |
| इन्द्रियार्थप्रसिद्धिरिन्द्रियार्थेभ्योऽर्थान्तरत्वे हेतुः । २ । | इन्द्रियार्थप्रसिद्धिरिन्द्रियार्थेभ्योऽर्थान्तरस्य हेतुः । ३ । १ । २ । |
| सोऽनपदेशः । ३ । | ३ । १ । ३ । |
| कारणाज्ञानात् । ४ । | ३ । १ । ४ । |
| कार्याज्ञानात् । ५ । | कार्येषु ज्ञानात् । ३ । १ । ५ । |

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| अत्र मुद्रितः सूत्रपाठः । | उपस्कारकृदभिमतः सूत्रपाठः । |
| --- | --- |
| अज्ञानाच्च । ६ । | ३ । १ । ६ । |
| अन्य एव हेतुरित्यनपदेशः । ७ । | अन्यदेव हेतुरित्यनपदेशः । ३ । १ । ७ । |
| × | अर्थान्तरं ह्यर्थान्तरस्यानपदेशः । ३ । १ । ८ । |
| संयोगि समवायि एकार्थसमवायि विरोधि च । कार्यं कार्यान्तरस्य कारणं कारणान्तरस्य । विरोधि अभूतं भूतस्य, भूतमभूतस्य, अभूतमभूतस्य, भूतं भूतस्य । ८ । | संयोगि समवाय्येकार्थसमवायि विरोधि च । ३ । १ । ९ ।<br>कार्यं कार्यान्तरस्य । ३ । १ । १० ।<br>विरोध्यभूतं भूतस्य । ३ । १ । ११ ।<br>भूतमभूतस्य । ३ । १ । १२ ।<br>भूतो भूतस्य । ३ । १ । १३ । |
| प्रसिद्धिपूर्वकत्वादपदेशस्य । ९ । | ३ । १ । १४ । |
| अप्रसिद्धोऽनपदेशः । १० ।<br>असन् सन्दिग्धश्चानपदेशः । ११ । | अप्रसिद्धोऽनपदेशोऽसन् संदिग्धश्चानपदेशः । ३ । १ । १५ । |
| विषाणी तस्मादश्वो विषाणी तस्माद् गौरिति च । १२ । | यस्माद् विषाणी तस्मादश्वः । ३ । १ । १६ ।<br>यस्माद् विषाणी तस्माद् गौरिति चानैकान्तिकस्योदाहरणम् । ३ । १ । १७ । |
| आत्मेन्द्रियमनोऽर्थसन्निकर्षाद् यन्निष्पद्यते तदन्यत् । १३ । | आत्मेन्द्रियार्थसन्निकर्षाद् यन्निष्पद्यते तदन्यत् । ३ । १ । १८ । |
| प्रवृत्तिनिवृत्ती च प्रत्यगात्मनि दृष्टे परत्र लिङ्गम् । १४ । | ३ । १ । १९ । |

## ३. २.

| | |
| --- | --- |
| आत्मेन्द्रियार्थसन्निकर्षे ज्ञानस्याभावो भावश्च मनसो लिङ्गम् । १ । | आत्मेन्द्रियार्थसन्निकर्षे ज्ञानस्य भावोऽभावश्च मनसो लिङ्गम् । ३ । २ । १ । |
| द्रव्यत्वनित्यत्वे वायुना व्याख्याते । २ । | तस्य द्रव्यत्व ....... । ३ । २ । २ । |
| प्रयत्नायौगपद्याज्ज्ञानायौगपद्याच्चैकं मनः । ३ । | ...........चैकम् । ३ । २ । ३ । |
| प्राणापाननिमेषोन्मेषजीवनमनोगतीन्द्रियान्तरविकाराः सुखदुःखे इच्छाद्वेषौ प्रयत्नश्चेत्यात्मलिङ्गानि । ४ । | प्राणापाननिमेषोन्मेषजीवनमनोगतीन्द्रियान्तरविकाराः सुखदुःखेच्छाद्वेषप्रयत्नाश्चात्मनो लिङ्गानि । ३ । २ । ४ । |

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| अत्र मुद्रितः सूत्रपाठः । | उपस्कारकृदभिमतः सूत्रपाठः । |
| --- | --- |
| द्रव्यत्वनित्यत्वे वायुना व्याख्याते । ५ । | तस्य द्रव्यत्व............। ३ । २ । ५ । |
| यज्ञदत्त इति सति सन्निकर्षे प्रत्यक्षाभावाद् दृष्टं लिङ्गं न विद्यते । ६ । | यज्ञदत्त इति सन्निकर्षे प्रत्यक्षाभावाद्दृष्टं लिङ्गं न विद्यते । ३ । २ । ६ । |
| सामान्यतो दृष्टाच्चाविशेषः । ७ । | ३ । २ । ७ । |
| तस्मादागमिकम् । ८ । | तस्मादागमिकः । ३ । २ । ८ । |
| अहमिति शब्दव्यतिरेकान्नागमिकम् । ९ । | अहमिति शब्दस्य व्य... ३ । २ । ९ । |
| यदि च दृष्टप्रत्यक्षोऽहं देवदत्तोऽहं यज्ञदत्त इति । १० । | यदि दृष्टमन्वक्षमहं देवदत्तोऽहं यज्ञदत्त इति । ३ । २ । १० । |
| × | दृष्ट आत्मनि लिङ्गे एक एव दृढत्वात् प्रत्यक्षवत् प्रत्ययः । ३ । २ । ११ । |
| देवदत्तो गच्छति विष्णुमित्रो गच्छतीति चोपचाराच्छरीरप्रत्यक्षः । ११ । | देवदत्तो गच्छति यज्ञदत्तो गच्छतीत्युपचाराच्छरीरे प्रत्ययः । ३ । २ । १२ । |
| सन्दिग्धस्तूपचारः । १२ । | ३ । २ । १३ । |
| अहमिति प्रत्यगात्मनि भावात् परत्राभावादर्थान्तरप्रत्यक्षः । १३ । | ३ । २ । १४ । |
| × | देवदत्तो गच्छतीत्युपचारादभिमानात् तावच्छरीरप्रत्यक्षोऽहंकारः । ३ । २ । १५ । |
| × | सन्दिग्धस्तूपचारः । ३ । २ । १६ । |
| न तु शरीरविशेषाद् यज्ञदत्तविष्णुमित्रयोर्ज्ञानविशेषः । १४ । | ...र्ज्ञानं विषयः । ३ । २ । १७ । |
| × | अहमिति मुख्ययोग्याभ्यां शब्दवद्व्यतिरेकाव्यभिचाराद्विशेषसिद्धेर्नागमिकः ।१८। |
| सुखदुःखनिष्पत्त्यविशेषादैकात्म्यम् ।१५। | सुखदुःखज्ञाननिष्पत्त्य...।३।२।१९। |
| नाना व्यवस्थातः । १६ । | व्यवस्थातो नाना । ३ । २ । २० । |
| शास्त्रसामर्थ्याच्च । १७ । | ३ । २ । २१ । |

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## ४. १.

| अत्र मुद्रितः सूत्रपाठः । | उपस्कारकृदभिमतः सूत्रपाठः । |
|---|---|
| सदकारणवत् तन्नित्यम् । १ । | सदकारणवन्नित्यम् । ४ । १ । १ । |
| तस्य कार्यं लिङ्गम् । २ । | ४ । १ । २ । |
| कारणभावाद्धि कार्यभावः । ३ । | कारणभावात् कार्यभावः । ४ । १ । ३ । |
| अनित्यमिति च विशेषप्रतिषेधभावः । ४ । | अनित्य इति विशेषतः प्रतिषेधभावः । ४ । |
| अविद्या च । ५ । | अविद्या । ४ । १ । ५ । |
| महत्यनेकद्रव्यवत्त्वाद्रूपाच्चोपलब्धिः । ६ । | ४ । १ । ६ । |
| अद्रव्यवत्त्वात् परमाणावनुपलब्धिः । ७ । | × |
| रूपसंस्काराभावाद् वायावनुपलब्धिः ।८। | सत्यपि द्रव्यत्वे महत्त्वे रूपसंस्काराभावाद्वायोरनुपलब्धिः । ४ । १ । ७ । |
| अनेकद्रव्येण द्रव्येण समवायाद्रूपविशेषाच्चोपलब्धिः । ९ । | अनेकद्रव्यसमवायाद् रूपविशेषाच्च रूपोपलब्धिः । ४ । १ । ८ । |
| एतेन रसगन्धस्पर्शेषु ज्ञानं व्याख्यातम् ।१०। | तेन रस........ । ४ । १ । ९ । |
| तदभावादव्यभिचारः । ११ । | तस्याभावादव्यभिचारः । ४ । १ । १० । |
| सङ्ख्याः परिमाणानि पृथक्त्वं संयोगविभागौ परत्वापरत्वे कर्म च रूपिद्रव्यसमवायाच्चाक्षुषाणि । १२ । | ४ । १ । ११ । |
| अरूपिष्वचाक्षुषत्वात् । १३ । | अरूपिष्वचाक्षुषाणि । ४ । १ । १२ । |
| एतेन गुणत्वे भावे च सर्वेन्द्रियज्ञानं[१] व्याख्यातम् । १४ । | ...सर्वेन्द्रियं ज्ञानं....। ४ । १ । १३ । |

## ४. २.

| | |
|---|---|
स्थानेषु शब्दशो नानूदितम्, अपि त्वाशय एव वर्णित इत्यपि दृश्यते । वसुधररक्षितविरचितानुवादापेक्षया कनकवर्मरचितानुवाद एव शोभनतरस्तथापि क्वचिद् वसुधररक्षितरचितानुवाद एवात्यन्तमुपकरोति । वसुधररक्षितरचितानुवादयोः कनकवर्मरचितानुवादयोश्च क्वचित् साम्यमपि दृश्यते क्वचिच्चाल्पं बहुतरं वा वैषम्यमपि दृश्यते । विशालामलवतीटीकाया अनुवादस्तु यद्यप्यतीव समीचीनस्तथापि तत्र काश्चिदशुद्धयः सन्त्येव, क्वचिदनुवादोऽपि न समञ्जसः, किञ्चान्यत्—तत्र प्रमाणसमुच्चयस्य तद्वृत्तेश्च कानिचिदेव पदानि प्रतीकत्वेनोपादाय व्याख्यातानि, न तु सर्वाणि । अतस्तदनुसारेणापि प्रमाणसमुच्चयस्य तद्वृत्तेश्च कानिचिदेव पदानि संस्कृते सम्यगनुवदितुं शक्यन्ते । अतो भोटभाषान्तरेभ्यः संस्कृतेऽनुवदनमिहातिगुरुतरमपि परमकृपालुश्रीगुरुचरणानां कृपयैव लाघवेन सम्पन्नमिति प्रतीमः ।

इदं तु ध्येयम्- N. ed.-P. ed. मध्ये कनकवर्मविरचितः प्रमाणसमुच्चयकारिकानुवादः, वसुधररक्षितविरचितः प्रमाणसमुच्चयवृत्त्यनुवादः कनकवर्मविरचितश्च प्रमाणसमुच्चयवृत्त्यनुवाद इत्यनुवादत्रयमेवोपलभ्यते । C. ed.-D. ed. इत्यत्र तु वसुधररक्षितविरचितः प्रमाणसमुच्चयकारिकानुवादः प्रमाणसमुच्चयवृत्त्यनुवादश्चेत्यनुवादद्वयमेवोपलभ्यते[1] । वृत्तौ सर्वाण्यपि कारिकापदानि यद्यप्यन्तर्गतानि तथापि पृथग् मूलपाठज्ञानाय कारिकानुवादोऽप्यावश्यकः । अतोऽस्माभिरादौ पिपठिषूणामानुकूल्याय भोटभाषानुवादानां संस्कृतेऽनुवाद उपन्यसिष्यते, ततः परं कारिकाणां भोटभाषानुवादावुपन्यसिष्येते, ततः परं वृत्तेरनुवादद्वयमुपन्यसिष्यते, तदनन्तरं तु विशालामलवत्यां ये प्रतीकाः सन्ति तेषां संग्रहः प्रमाणसमुच्चयस्य वृत्तेश्च संस्कृतानुवादेऽत्युपयोगित्वादुपन्यसिष्यते ।

वसुधररक्षितेन कनकवर्मणा च प्रमाणसमुच्चयानुवादः साक्षात् प्रमाणसमुच्चयमवलम्ब्य विहितो वृत्तितो वा प्रमाणसमुच्चयः ताभ्यामुद्धृत इत्यत्रास्माभिः किमपि निश्चेतुं न पार्यते । वसुधररक्षितविरचिते प्रमाणसमुच्चयानुवादे विद्यमाना अनेकेंऽशा कनकवर्मविरचिते प्रमाणसमुच्चयानुवादे नोपलभ्यन्ते इत्यप्यवधेयम् ।

संस्करणेषु C. ed.-D ed. इत्यनयोः प्रायः सर्वथा साम्यं दृश्यते । N. ed.-P. ed.

---

१ एते प्रमाणसमुच्चयस्य वृत्तेश्चानुवादाः C. ed. - D. ed. इत्यत्र Bstan-ḥgyur, Tshad-ma, ce. ( = 95 ) इत्यत्र सन्ति N. ed. - P. ed. इत्यत्र तु Bstan-ḥgyur, Mdo. ce. ( = 95 ) इत्यत्र सन्ति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्यनयोश्च बहुशः साम्यं दृश्यते । वसुधररक्षितरचितः कारिकानुवादो वृत्त्यनुवादश्चात्र C. ed. अनुसारेणोपन्यस्तः । कनकवर्मरचितः कारिकानुवादः N. ed. अनुसारेण वृत्त्यनुवादस्तु P. ed. अनुसारेणोपन्यस्तः प्राधान्येन । विशालामवत्या[1] अनुवादस्तु प्राधान्येन D. ed. अनुसारेणैवास्माभिरादृतः[2] । एषु सर्वत्र यथायोगमन्यान्यपि संस्करणानि प्रसङ्गमाश्रित्यास्माभिरवलोकितानि[3] ।

## अस्मिन् परिशिष्टे सङ्केतानां विवरणम् ।

C. ed.=Choni edition.

D. ed.=Derge edition.

K.=कनकवर्मविरचितो भोटभाषानुवादः ।

N. ed.=Narthang edition.

P. ed.=Peking edition.

PS.=प्रमाणसमुच्चयकारिकाणां भोटभाषानुवादः ।

PS.[1]=प्रमाणसमुच्चयकारिकाणां वसुधररक्षितविरचितो भोटषानुवादः ।

PS.[2]=प्रमाणसमुच्चयकारिकाणां कनकवर्मविरचितो भोटभाषानुवादः ।

PSV.=प्रमाणसमुच्चयवृत्तेर्भोटभाषानुवादः ।

PSV.[1]=प्रमाणसमुच्चयवृत्तेर्वसुधररक्षितविरचितो भोटभाषानुवादः ।

PSV.[2]=प्रमाणसमुच्चयवृत्तेः कनकवर्मविरचितो भोटभाषानुवादः ।

V.=वसुधररक्षितविरचितो भोटभाषानुवादः ।

VT.='विशालामलवती' टीकाया भोटभाषानुवादः ।

अथ यथानिर्दिष्टक्रमं भोटभाषानुवादानां संस्कृतेऽनुवाद उपन्यस्यते । भोटभाषानुवादास्तु ग्रन्थान्ते द्रष्टव्याः ।

---

१ विशालामलवत्या भोटभाषानुवादः C. – ed. – D. ed. इत्यत्र Bstan-ḥgyur; Tshad-ma, Ye. (111) इत्यत्र विद्यते । CCTBC. No. 4268 । N. ed. P. ed. इत्यत्र Bstan-ḥgyur, Mdo, Re. (=112) इत्यत्र वर्तते ॥ २ अयं शुद्धतर इत्यस्माकमनुभवः ॥ ३ 'Darma-rin-Chen' इत्यभिधेन भोटदेशीयविदुषा विरचिताया प्रमाणसमुच्चयस्य भोटभाषामय्याष्टीकाया [ CCTBC. No. 5437, folios 1-124 ] अपि यथायोगं विहितोऽत्रोपयोगः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## अथ भोट[Tibetan]भाषान्तरतः संस्कृतेऽनुवादः[1] ।

### दिङ्नागविरचिते सवृत्तिके प्रमाणसमुच्चये प्रथमे प्रत्यक्षपरिच्छेदे वैशेषिकमतपरीक्षा ।

विषया[2]लोचनार्थत्वाद् योजना न विशेषणैः ।
[3]नैकं रूपाद्यभेदो वा दृष्टं चेन्नेन्द्रियेण तत् ॥ २१ ॥
अक्षानेकत्ववैयर्थ्यात् स्वार्थे भिन्नेऽपि शक्तिमत् ।
[4]सर्वेन्द्रियेण ग्राह्यं स्याद् द्रव्यादौ न तथा सति ॥ २२ ॥
[[5]अगृहीतेरभावत्वात् कथं चेद् ] अन्यगोचरम् ।
तुल्यगोचरतेष्टा चेदनिष्टेऽपि प्रसज्यते । ॥ २३ ॥
अनेकान्तोऽन्यथोक्तं तत् सर्वं साध्यं न कथ्यते ।
[6]अक्षाभेदेऽपि धीभेदाद् भेदेऽभेदोऽन्यथा कुतः ॥ २४ ॥

वैशेषिकाणां केनचित् सम्बन्धेन " आत्मेन्द्रियमनोर्थसन्निकर्षाद् यन्निष्पद्यते तदन्यत् " [ वै० सू० ३ । १ । १३ ] इति सौत्रं तावद् द्रव्ये प्रत्यक्षलक्षणम् । केचित् प्रमाणात् फलमर्थान्तरमिच्छन्तोऽसाधारणकारणत्वादिन्द्रियार्थसन्निकर्षं प्रमाणं प्रतिपादयन्ति । अन्ये तु प्रधानत्वादात्ममनःसन्निकर्षः प्रमाणमित्याहुः ।

तथा च "संशय[7]निर्णयज्ञानयोर्निष्पत्तिः प्रत्यक्षलैङ्गिकाभ्यां ज्ञानाभ्यां

---

१ संस्कृतेऽनुवादोऽयमस्माभिः पृ. १६७ पं. १–६ इत्यत्र निर्दिष्टकारणवशाद् विशालामलवत्यन्तर्गतान् प्रतीकान् कनकवर्मविरचितं च भोटभाषानुवादमवलम्ब्य प्रामुख्येन विहितः, तथापि क्वचित् सौष्ठवं दृष्ट्वा वसुधररक्षितरचितोऽनुवादोऽप्यवलम्बितः । यथायोगं चोपयोगितां विभाव्यानुवादभेदोऽपि टिप्पणे दर्शयिष्यते । २ अत्रेदमवधेयम्—प्रमाणसमुच्चयवृत्तेर्मिश्रकव्याख्यानरूपत्वात्तत्र सर्वासां कारिकाणामन्तर्गतत्वेऽपि तासां पृथक् कल्पनं दुष्करम् । प्रमाणसमुच्चयभोटभाषानुवादानुसारेणैव ताः सम्यक् पृथग् ज्ञातुं शक्यन्ते । तथापि सन्ति कानिचित् स्थलानि यत्र द्वयोः प्रमाणसमुच्चयभोटभाषानुवादयोर्वैषम्यम्, एकत्र कारिकांशत्वेनाभिमतोंऽशोऽन्यत्र वृत्तिरूपत्वेनात एव च गद्यरूपेणानूदितो दृश्यते, क्वचिच्चैकस्यापि पादस्य भोटभाषानुवादे पादद्वयमुपलभ्यते, क्वचित् त्रुटिरपि दृश्यते । अत एतादृशेषु स्थलेषु कारिकानिर्णयो दुष्करः । एतच्च यथास्थानं यथायोगमावेदयिष्यते ॥ ३ दृश्यतां पृ० १७० टि० १० ॥ ४ VT. अनुसारेण बहुवचनान्तत्वसम्भावनायां '**सर्वेन्द्रियेण ग्राह्याः स्युः**' इति पाठो भवेत् ॥ ५ अभावाद् नान्यगोचरम् PS[1] । ( अभावादन्यगोचरम् PS[1] ? ) । अभावात् कथमन्यगोचरम् PS[2] ॥ ६ PS–PSV मध्ये पादत्रयात्मकोऽत्रानुवादः ॥ ७ " संशयनिर्णययोरर्थान्तरभावश्च ज्ञानान्तरत्वे हेतुः । १० । ३ । तयोर्निष्पत्तिः प्रत्यक्षलैङ्गिकाभ्यां ज्ञानाभ्यां व्याख्याता । १० । ४ । "—**वै० सू०** ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्याख्याता" इति यदुक्तं तद् विरुध्यते। न हि चतुष्टयसन्निकर्षोत्पन्नेन ज्ञानेन [1]निर्णयजं [ज्ञानं] तुल्यम्, निर्णयस्य विकल्पपूर्वकत्वात् प्रत्यक्षस्य [2]विषयालोचनमात्रत्वात्। [3]विषयालोचनमात्रं हि चतुष्टयसन्निकर्षाज्जायते, तत्र विचारणा कुतः? इन्द्रियार्थसन्निकर्षप्रमाणवादेऽतिदेशः कोऽपि नास्त्येव। इन्द्रियार्थसन्निकर्षप्रमाणवादिदर्शने 'किमेतत्' इति जिज्ञासायां [4]सर्वथा ग्रहणप्रसङ्गः, सर्वात्मना सन्निकृष्टत्वात्। आत्ममनःसन्निकर्षवादेऽपि [5]विषयमेदः। [6]न हि विषयान्तरे प्रमाणं भवत्यन्यत्र फलं भवतीति [7]पूर्वमुक्तम्।

अपि च, '[8]सामान्यविशेषापेक्षं द्रव्यगुणकर्मापेक्षं च प्रत्यक्षम्' इति न युज्यते, यस्मादिन्द्रियार्थसन्निकर्षोत्पन्नस्य विषयालोचनार्थत्वाद् योजना न विशेषणैः। इन्द्रियबुद्धीनां स्वार्थमात्रग्राहित्वाद् विशेषणैः सह योगो नोपपद्यते। 'इदमस्य सामान्यं द्रव्यादि वा' इत्यवश्यमर्थद्वयं गृहीत्वा तथा सम्बन्धः कल्प्यते। ततो मतुब्लोपादभेदोपचाराद्वा गृह्यते। तच्च विशेषणं स्मृत्योपस्थापितत्वाद् मनोबुद्धावुपपद्यते, अन्यथा सुरभि मधुरमिति ग्रहणमपि प्रत्यक्षं स्यात्, तथा च न युज्यते विशेषणविशेष्ययोर्भिन्नेन्द्रियग्राह्यत्वात्।

यदि चैकं द्रव्यमनेकेन्द्रियग्राह्यं तथा सति [10]नैकम्, रूपादिवदनेकं स्यात्। रूपादौ हि अनेकेन्द्रिय[11]ग्राह्यस्यैकत्वं क्वचिदपि न दृष्टम्। रूपाद्यभेदो वा। यद्यनेकेन्द्रियग्राह्यमप्यभिन्नमिष्यते रूपाद्यपि द्रव्यवदेकं स्यात्। दृष्टं चेत्। यद्येवं

---

१ पूर्वापरसम्बन्धपर्यालोचनया 'निर्णयस्योत्पत्तिस्तुल्या' इति पाठोऽप्यत्र सम्भवेत्। २ विषयालोचनमात्रार्थत्वात् VT.॥ ३ विषयालोचनमात्रार्थं हि VT.। दृश्यतां पृ० १७६ पं० १६॥ ४ समस्तार्थग्रहणं स्यात् PSV। तुलना—"सर्वथा ग्रहणप्रसङ्गश्च सर्वात्मना सन्निकृष्टत्वात्।"—तत्त्वार्थराजवार्तिक. १।१०। पृ० ५१ पं० ८॥ ५ विषयभेदोऽपि VT.। एवं चात्र 'आत्ममनःसन्निकर्षवादे च विषयभेदोऽपि' इत्यपि पाठः स्यात्॥ ६ 'न ह्यन्यविषयस्य प्रमाणस्यान्यत्र फलं भवति' इति पाठो 'न हि विषयान्तरे प्रमाणभावोऽन्यत्र फलभावः' इति वा पाठोऽप्यत्र भवेत्॥ ७ एतत्परिशिष्टान्ते **पूर्ति**र्द्रष्टव्या॥ ८ "सामान्यविशेषापेक्षं द्रव्यगुणकर्मसु। ८।६। द्रव्ये गुणकर्मापेक्षम्। ८।७।"—**वै० सू०**॥ ९ °यविषयत्वात् PSV.॥ १० "नन्वेवं कायचक्षुर्गोचरो धर्मी भिद्यते ग्राहकभेदाद् रूपादिवत्। तानि वा सत्यपि ग्राहकभेदे न भिद्येरन्। अनेकेन्द्रियग्राह्यमेकं सद् दृष्टं सत्त्वमिति चेत्, न, विकल्पकस्यैवेन्द्रियेणाग्रहणात्। अपि चेन्द्रियाणां सङ्कीर्णविषयत्वेऽक्षानेकत्ववैयर्थ्यमपि। एकमेव हि तदिन्द्रियं नानाविषयान् परिच्छेत्स्यतीति किमिन्द्रियभेदेन? तदुक्तम्—**नैकं रूपाद्यभेदो वा दृष्टं चेन्नेन्द्रियेण तत्। अक्षानेकत्ववैयर्थ्यं स्वार्थे भिन्नेऽपि शक्तिमत्**॥ इति।"—**मीमांसाश्लोकवार्तिककाशिका** पृ० २५६॥ ११ °ग्राह्यमेकं K॥

भिन्नेन्द्रियविषये द्रव्येऽभिन्नं ज्ञानं दृष्टमेव [1]सत्तागुणत्ववत्। [2]तस्माद् [3]रूपादावेकत्वानेकत्वप्रसङ्गोऽसिद्ध इति चेत्, ईदृशमभिन्नं ज्ञानं दृष्टम्, किन्तु नेन्द्रियेण तत्, न तदिन्द्रियद्वारेणेन्द्रियान्तरविषये ज्ञानम्, यस्मात् अक्षानेकत्ववैयर्थ्यात्। यदीन्द्रियान्तरविषयेऽपीन्द्रियान्तरस्य ग्रहणशक्तिरीष्यते रूपादावनेकेन्द्रियकल्पना व्यर्था। [4]अथापि स्यात्-रूपादौ भेदसद्भावादेकमिन्द्रियं न ग्रहणशक्तिमदिति चेत्, तदप्ययुक्तम्। कुत इति चेत्, इन्द्रियं हि स्वार्थे भिन्नेऽपि शक्तिमत्। स्वार्थो नीलादिभेदेन संख्यादिभेदेन च भवन्मतेन भिन्नोऽपीन्द्रियेण ग्रहीतुं शक्यते, नेन्द्रियान्तरार्थः। इन्द्रियान्तरविषयत्वेन च रूपभिन्नस्पर्शवद् यतश्चक्षुषा न गृह्यते। [5]यदि स्पर्शनगृहीतमपि द्रव्यं चक्षुषा गृह्यते इन्द्रियान्तरविषयोऽपि चक्षुषः स्वार्थ इति स्वष्टमभ्युपगमाद् भिन्नस्यापि नीलादिवत् स्पर्शादेरपि चक्षुषा ग्रहणप्रसङ्ग इति भिन्नत्वमनेकेन्द्रियग्राह्यत्वे न कारणम्, किं तर्हि? इन्द्रियान्तरार्थाग्रहणम्।

यदि चाभिन्नोऽप्यर्थोऽनेकेनेन्द्रियेण गृह्यते [6]रूपादयः प्रत्येकमपि सर्वेन्द्रियेण ग्राह्याः स्युः द्रव्यादिवत्, तथा च रूपादयोऽनेकेन्द्रियग्राह्याः स्युः।

न सन्त्येते दोषाः। रूपादयस्तेषु स्वस्वविशेषे नियामकाः। [7]तदभावादिन्द्रियबुद्धीनां नीलेऽव्यभिचार इति चेत्, कथं तेषां नियामकत्वम्? यत्र रूपत्वाभावस्तच्चक्षुषा न गृह्यते, एवं स्पर्शादीनामपि स्वस्वविशेषनियामकत्वम्।

तथा सति [8]चक्षुःस्पर्शनयोर्वृत्तिर्द्रव्यादौ न। द्रव्यसङ्ख्यादिकर्मसु रूपत्वस्पर्शत्वाभावस्येष्टत्वाद् न स्यात् तेषां चक्षुःस्पर्शनाभ्यां ग्रहणम्। यद्येवं यत्र रूपत्वमस्ति तच्चाक्षुषम्, एवं स्पर्शादावपि। एवं [9]नियतत्वेनास्ति विशेषः। तथा च रूपत्वाद्यभावाद् द्रव्यादिषु नियमाभावो भविष्यतीति चेत्, [10]तथा सति "तदभावादव्यभिचारः" [वै० सू० ४।१।११] इति सूत्रविरोधः। रूपत्वादेः

---

१ "इन्द्रियाणि गन्धरसरूपस्पर्शशब्देषु तत्सामान्येषु च नियतानि, अन्यत्रानियतानीति। तत्र पृथिव्यप्तेजांसि द्वीन्द्रियग्राह्याणि शेषश्च गुणराशिः। सत्तागुणत्वे च सर्वेन्द्रियग्राह्ये समवायोऽभावश्च तथा।" —**न्यायवार्तिक** १।१।१४॥ २ रूपादिषु न। तस्मादेकानेकसिद्धिरिति चेत् K॥ ३ रूपादावेकत्वप्रसङ्गो द्रव्ये चानेकत्वप्रसङ्गोऽसिद्ध इत्याशयः॥ ४ यद्येवं रूपा० PSV.॥ ५ तद् यदि VT.॥ ६ अत्र PSV मध्ये सर्वैकाक्षवचनान्तः प्रयोगः। ततस्तदनुसारेण '**सर्वेन्द्रियेण ग्राह्यं स्यात्**' इति कारिकांशोऽत्र सम्भवेत्॥ ७ रूपादयाभावाद इत्यर्थो भाति॥ ८ चक्षुःस्पर्शनयोः संघातेऽपि वृत्तिर्द्रव्यादौ न V?॥ ९ 'नियामकत्वेन' इत्यपि पाठः स्यात्॥ १० तथापि K॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शब्दादावभावाद्व्यभिचार उच्यते, न रूपत्वादे रूपादौ सद्भावद्वारेण । युक्त्यापी[1]यं कल्पना नोपपद्यते, यस्माद् अगृहीतेर भावत्वात्, इन्द्रियान्तरेणाग्रहणं हि ग्रहणाभावः, स कथं रूपत्वादिना क्रि[2]यते ? भ[3]वतु कारणाभावेन ग्रहणाभावः । तस्माद् रूपत्वादीनां नियामकत्वं न युज्यते । न[4]नु यद् द्रव्यादावभिन्नं ग्रहणं दृष्टं तत् कथं चेत्, अन्यगोचरम् । चक्षुःस्पर्श[5]नाभ्यां भिन्नो विषय उपलभ्यते, तत्सहचा[6]रिसमुदायविषयम[7]भिन्नं ग्रहणं स्मरणज्ञानमन्यदेवोपजायते रूपाद्यग्रहे तद्बुद्ध्यभावात् । एवं विशेष्याणि भिन्नानि स्वेनेन्द्रियेणोपलभ्य अर्थान्तरव्यवच्छेदविषयमभेदेन सर्वत्र मानसं ज्ञानं जायते, न तु सत्तागुणत्वे प्रत्यक्षे । तदनुपलक्षणात् ‘ प्रत्यक्षेण ग्रहणम् ’ इत्यभिमानस्[8]तयोः कुतार्किकाणाम् ।

**तुल्यगोचरतेष्टा चेत्** । स्यादेतत्—विशेषणविशेष्ययोरवश्यं तुल्येन्द्रियग्राह्यत्वमभ्युपगन्तव्यं तदग्रहे तद्बुद्ध्यभावादिति चेत्, तथा सति **अनिष्टेऽपि प्रसज्यते** । यद्युभयं तुल्येन्द्रियग्राह्यं [9]द्रव्यगुणकर्माण्यपि द्रव्यवन्तीति सत्तावद् द्रव्यं सर्वेन्द्रियं स्यात् । एवमे[10]कद्रव्यवत्त्वाद् न द्रव्यं सत्ता, सत्तायाः सर्वेन्द्रियत्वात् । ननु [11]द्रव्यवृत्तित्वात् सत्ता एकद्रव्या तद्वती उच्यते इति चेत्, न, अभिन्नत्वात् । अभिन्ना सत्ता सर्वत्र द्रव्यादौ सति न निषिध्यते । तथा चोक्तम्—“ गुणकर्मसु च भावान्न कर्म न गुणः ” [ वै० सू० १ । २ । १८ ] इति । यदि च द्रव्ये वर्तमानैवैकद्रव्या नान्यत्र वर्तमाना एकद्रव्येति [ उच्यते V ] भे[12]दः स्यात् । यदा च चाक्षुषप्रत्यक्षेण ‘ अग्निरुष्णः ’ इति ग्रहणं तदा स्पर्शोऽपि चाक्षुषः स्या[13]त् । तस्मात् सत्तागुणत्ववद् भिन्नेन्द्रियग्राह्यत्वेऽपि द्रव्यमभिन्नमिति न युज्यते ।

---

१ V मध्ये सम्यगर्थो न ज्ञायते ॥ २ युज्यते । यदि कारणाभावे ग्रहणाभावो भवतीति चेत् । तस्माद् रूपादेः स्वविशेषनियामकत्वं न युज्यते V ॥ ३ न भवति K । अत्र **‘न’** इति निरर्थकं भाति । ‘ कारणाभावे ननु ग्रहणाभावो भविष्यति ’ इत्यपि पाठोऽत्र सम्भवेत् ॥ ४ यद्येवं द्रव्यादा° PSV. ॥ ५ ‘ तत्सहचर° ’ इत्यपि पाठोऽत्र भवेत् ॥ ६ तत्सहकारि PSV ? ॥ ७ ( अभेदग्राहकं ? ) ॥ ८ **तयोः** सत्तागुणत्वयोः । ‘ **तेषां** कुतार्किकाणाम् ’ इत्यपि पाठश्चिन्त्यः ॥ ९ “ सदनित्यं द्रव्यवत् कार्यं कारणं सामान्यविशेषवदिति द्रव्यगुणकर्मणामविशेषः । ”—**वै० सू०** १ । १ । ७ । १० “ द्रव्यगुणकर्मभ्योऽर्थान्तरं सत्ता । १ । २ । ७ । एकद्रव्यवत्त्वान्न द्रव्यम् । १ । २ । ८ । ”—**वै० सू०** ॥ ११ द्रव्ये वर्तमाना PSV ॥ १२ द्रव्यभेदः स्यात् V । किन्त्वशुद्धमेतत्, सत्ताभेदस्याभिप्रेतत्वात् ॥ १३ इतः परं ‘ **तथा च न** ’ इति VT. मध्ये प्रतीको भाति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यद्येवं भिन्नेन्द्रियग्राह्यत्वादप्यन्यत्ववादेऽनेकान्तः। [ यस्माद् K ] एकेन्द्रियग्राह्यत्वेऽपि द्रव्यगुणकर्मणां भेदो नीलादिभेदश्च दृष्टः, विनापीन्द्रियभेदं ग्रहणभेदाद् नील[2]ादिभेदश्च दृष्टः। यदभावेऽपि यद् भवति तस्य तदकारण[3]त्वादिन्द्रियभेदोऽन्यत्वस्य न कारणमिति चेत्, अन्यथोक्तं तत्। भिन्नेन्द्रियग्राह्यत्वादनेकत्वमुच्यते, नैकेन्द्रियग्राह्यत्वादेकत्वं यतोऽनेकान्तः स्यात्। न हि भिन्नेन्द्रियग्राह्यत्वादेवानेकत्वमुच्यते, [4]किं तर्हि ? अनेकत्वमेव इति [ वचनाद् K ] नानैकान्तिकः।

'इन्द्रियभेदं विनापि' इति यदुक्तमत्र सर्वं साध्यं न कथ्यते। न हि सर्वमनेकमिन्द्रियभेदादित्युच्यते, किं तर्हि ? यत्रेन्द्रियभेदस्तदनेकम् [ एव V ] इति भेदोऽ[5]प्यन्यत्वस्य कारणं न निषिध्यते।

अपि च, अक्षाभेदेऽपि धीभेदाद् भेदेऽभेदोऽन्यथा कुतः। यत्र [ च VT ] इन्द्रियभेदं विनापि बुद्धिभेदाद् नानात्वमुच्यते तत्रेन्द्रियभेदे बुद्धिभेदे च '[6]एकम्' इत्यस्य नावकाशः।

एतेन गुणादिषु [7]प्रत्यक्षज्ञानमपि निराकृतं वेदितव्यम्। [ यस्मात् K ] तदपि हि स्वाश्रयसम्बन्धद्वारेण चतुष्टयसन्निकर्षादेवोत्पद्यते। [8]यथा च सर्वथा सन्निकर्षान्न ज्ञानोत्पत्तिरुक्तमेवं नैयायिकप्रत्यक्षपरी[9]क्षायाम्। एवं वैशेषिकप्रत्यक्षमपि सदोषम्।

अथ जिनेन्द्रबुद्धिरचिता विशालामलवती नाम व्याख्या।

केनचित् सम्बन्धेनेति, वृत्तिकृन्मतविशेषेणानेके सम्बन्धाः, तत्र कस्मिंश्चित् सम्बन्धे प्रत्यक्षलक्षणसूत्रमिदं न सम्भवतीत्यतः 'केनचित् सम्बन्धेन' इत्युक्तम्। तत्र केचित्—[10]प्रसिद्धिर्लिङ्गमात्मनः। प्रसिद्धिर्ज्ञानमित्यनर्थान्तरम्। सा च प्रसिद्धिर्गुणत्वानित्यत्वाभ्यां शब्दवद् द्रष्टव्येत्युक्तम्। यदि बुद्धिरनित्या, अनित्यं च कारणवत्, ततोऽस्या अपि कारणं वक्तव्यमन्यत्वं चानेन ज्ञापकहेतुनेति चेत्, उच्यते–'आत्मे-

---

१ सर्वेन्द्रियग्राह्यत्वादप्यनेकत्ववादे K ॥ २ नीलादिभेदग्रहणं दृष्टम् V। ३ °दिन्द्रियभेदोऽनेकत्वे न हेतुरिति चेत् K ॥ ४ 'अपि तु' इत्यपि भवेत् पाठः ॥ ५ °प्यनेकत्वस्य K ॥ ६ 'एकत्वम्' इति निरवकाशम् V ॥ ७ प्रत्यक्षज्ञानोत्पत्तिरपि निराकृता वेदितव्या V ॥ ८ तथा च सर्वथा सन्निकर्षान्न ज्ञानोत्पत्तिरिति नयायिकपरीक्षायां यथोक्तम्। **तस्माद् वैशेषिकप्रत्यक्षं दुर्विहितम्।** –V ॥ ९ एतत्परिशिष्टान्ते **पूर्ति**र्द्रष्टव्या ॥ १० तुलना–**वै० सू०** ३। १। २ ॥

न्द्रियमनोर्थसन्निकर्षाद् यन्निष्पद्यते तदन्यत्' [वै० सू० ३।१।१३]। यद् यतो निष्पद्यते तत् ततोऽन्यत्, यथा मृदादेर्घटादि, आत्मादिभ्यो ज्ञानमपि तथा निष्पद्यते तस्मात् तदपि तेभ्योऽन्यत्। कारणमप्यनेनैव दर्शितमात्मादि।—इति सम्बन्धमाहुः। अस्मिन् सम्बन्धे प्रत्यक्षलक्षणसूत्रमिदं नोपपद्यते।

अन्ये तु—लैङ्गिकप्रमाणेऽभिहिते तत आह–किं लैङ्गिकमेकमेव प्रमाणमाहोस्विन्नेति चेत्, उच्यते—"आत्मेन्द्रियमनोर्थसन्निकर्षाद् यन्निष्पद्यते तदन्यत्" [वै० सू० ३।१।१३] प्रत्यक्षप्रमाणमिति वाक्यशेषः।—इति सम्बन्धमाचक्षते। अस्मिन् सम्बन्धे प्रत्यक्षलक्षणसूत्रमिदं व्याख्यायते।

असौत्रमपि भाष्यकृदभिहितमस्ति "इन्द्रियार्थसन्निकर्षः प्रत्यक्षमात्ममनःसन्निकर्षो वा" इति। अतः सौत्रमित्युक्तम्। द्रव्यवचनेन गुणकर्मणोरपि सौत्रं प्रत्यक्षलक्षणमन्यदस्तीति दर्शयति। तत् पुनः "गुणकर्मस्वसन्निकृष्टेषु ज्ञाननिष्पत्तेर्द्रव्यं कारणं कारणकारणं च" [वै० सू० ८।४] इत्येतत्। स्वाश्रयेणानभिव्यक्तेषु गुणकर्मसु ज्ञानं नोपजायते, अतस्तदाश्रयो द्रव्यं गुणकर्माण्यभिव्यञ्जयत् तज्ज्ञानस्य कारणं भवति। गुणकर्मज्ञानस्य कारणमिन्द्रियार्थसन्निकर्षः, तत्कारणं द्रव्यं घटादि कारणकारणमित्युच्यते। अत्र च प्रधानत्वादेकार्थसमवायिकारणत्वाच्चात्ममनःसंनिकर्षादुत्पत्तौ इन्द्रियमनोर्थसन्निकर्षास्तत्रोपकारकाः।

केचिदिति। यस्माज्ज्ञानस्य प्रमाणत्वे फलान्तरं न भवति, तथाहि–अधिगतिः फलम्, ज्ञानाच्चाधिगतिरनर्थान्तरम्। ततः श्रावस्कादयः सन्निकर्षमभिलषन्ति असाधारणकारणत्वादिति, इतरे सन्निकर्षाः स्मृत्यादिज्ञानसाधारणाः, इन्द्रियार्थसन्निकर्षस्तु प्रत्यक्षस्यैव कारणम्।

प्रधानत्वादिति आत्ममनसोः प्रधानत्वात् तत्संनिकर्षस्यापि प्रधानत्वम्, ततो रावणादयो मन्यन्ते। तत्रात्मनः प्राधान्यं ज्ञानस्य कर्तृत्वात् तल्लिङ्गत्वात् फलोपभोक्तृत्वाच्च। मनसस्तु सर्वविषयत्वाज्ज्ञानेनैकार्थसमवायाच्च।

तथा चेत्यादिना शास्त्रविरोधमाह। यथा अग्न्याद्यनुस्मृतिमत आत्मनः प्रत्यक्षं लिङ्गं दृष्ट्वा अप्रत्यक्षेऽर्थेऽनुमानं भवति तथा विशेषस्मृतिमतोऽस्यैव सामान्यमात्रदर्शनाद् गृहीतेषु विशेषेषु संशय इति संशयस्य निष्पत्तिर्लैङ्गिकेन तुल्या। यथा च भूतार्थसम्बन्ध-

१ दृश्यतां पृ० १५० टि० १॥ २ दृश्यतां पृ० १५० टि० १॥ ३ तुलना पृ० ७३ पं० ३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वशेन ' अयमेवंभूतोऽर्थः ' इति प्रत्यक्षमुत्पद्यते तथा भूतार्थसम्बन्धवशेन ' अयमेव, नान्यः ' इति निर्णयो जायते इत्यस्य निष्पत्तिः प्रत्यक्षेण तुल्या—इति यदुक्तं तद् विरुध्यते, निर्णयस्य विकल्पपूर्वकत्वादिति सम्बन्धः । सामान्यदर्शनवतः संशयो जायते । विकल्पाद् यदा विशेषरूपेणार्थोऽवधार्यते तदा ' इयं गौरेव, न महिषी ' इति निर्णयो जायते । विषयालोचनार्थत्वादिति विषयानुभवप्रयोजनत्वादित्यर्थः । विषयालोचनमात्रार्थं हीति 'मात्र'शब्दोऽधिकव्यवच्छेदार्थः । एवमुक्तं भवति–विशेषारोपादौ न व्याप्रियत इति । तच्च निर्विकल्पकत्वात् । यस्य च विषयानुभवमात्रं प्रयोजनं तद् विकल्पनिरपेक्षं प्रवर्तते । तद् दर्शयति–तत्र विचारणा कुत इति । ततश्च वैधर्म्यात् तेन निर्णयस्योत्पत्तिर्न तुल्या यथानुमानेन । स्यादेतत्–भूतार्थसम्बन्धवशादुत्पत्तिमात्रस्यातिदेश इति । तदयुक्तम्, विशेषातिदेशस्य निरर्थकत्वप्रसङ्गात् । संशयानुमानादिभिरप्येवं तुल्योत्पत्तिः प्राप्नोति, तेषामपि सामान्यादिभूतार्थाभिसम्बन्धवशेनोत्पत्तेः । अतिदेशो नास्त्येवेति, ज्ञानत्वं समानो धर्मः, तस्य चाभावात् । सर्वथा ग्रहणप्रसङ्ग इति सर्वथा [1]बहुमत्त्वादिभिरपि ग्रहणं स्यात् । यस्मिन्नंशे सामर्थ्यं स एव गृह्यत इति चेदुच्यते–सर्वात्मनेत्यादि । निरंशत्वादर्थस्य यथायोगं पञ्चविधेन सन्निकर्षेण य इन्द्रियासन्निकृष्टोऽशः स नास्त्येव । ततश्च तद्विशेषाणामर्थादभिन्नत्वात् तेष्वपि ग्रहणमुत्पत्तुं शक्नोति । ननु य एव जिघृक्षितोऽशः स एव गृह्यत इति चेदाह—किमेतदित्यादि । यदा परेषां द्रष्टा आलोच्यार्थदर्शनात् प्रागेव ' किमेतत् ' इत्यविशेषेण ग्रहीतुमिच्छायां तत्र प्रतीत्य पश्यति तदायं दोषो भवति ।

सम्बन्धवादे चैतद्दोषाभिधानेनायमर्थतो ज्ञानवादेऽप्युक्त एव भवति । तथाहि–सन्निकर्षोऽर्थग्रहणस्य कारणमित्ययं दोष उच्यते, ज्ञानप्रमाणवादिनापि स एव ज्ञानकारणमिष्यते इति समानो दोषः । तथाहि–अयमेव दोषोऽनुमाने वक्ष्यते । यदीन्द्रियार्थसम्बन्धे सर्वात्मना ग्रहणप्रसङ्गस्तदा भवतोऽपि त्रिभिरिन्द्रियैः सम्बध्यमाने विषये कस्मान्न सर्वात्मना ग्रहणमिति चेत्, अस्माभिः सन्निकर्षस्तत्कारणं नेष्यते, तस्याद्रव्यत्वात् । किञ्च, अस्माभिश्चक्षुरादिनाप्यर्थः सर्वथा गृह्यते इतीष्यते । तद्ग्रहणेऽपि तथा व्यभिचारनिमित्तसद्भावात् कस्मिंश्चिदंशे निर्णयो न भवतीति भेदायोग्यत्वात् तदग्रहणतुल्यं केवलमित्येतदुक्तम् । यदि च परोऽप्येवं ब्रूयात् तत एवं वक्तुं नार्हति, " यदर्थेषु साक्षादालोचनम् ' अयं गौरेव अयमश्व एव ' इति तत् प्रत्यक्षम् " [ ]

१ ( बाहुमत्त्वादिभिरपि ? ) ( बाहुल्यादिभिरपि ? ) ॥ २ तुलना पृ० ७३ पं० ३ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्युक्तत्वात्, एवं “भूतार्थसम्बन्धवशेन ‘अयमेवंभूतः’ इति प्रत्यक्षमुत्पद्यते” [ ] इत्युक्तत्वात्, एवं “ये[1]षामिन्द्रियाणामर्थेषु प्रसिद्धिः—अयं शब्दः, इदं रूपम्, अयं रसः, अयं गन्धः, अयं स्पर्श इति” [ ] इत्यप्युक्तत्वात्। यतः प्रत्यक्षं निश्चयात्मकं परेणेष्यते। इयमेव च निश्चयानां स्वार्थप्रतिपत्तिर्यत् तन्निश्चयनम्। तद् यदि प्रकारान्तरवद् न निश्चीयते तैः कथं गृहीतम्? कथमिदानीं भवतोऽपि प्रत्यक्षेणानिश्चयनं तत्र च ग्रहणमिति चेत्, यस्य प्रत्यक्षं न निश्चयात्मकं तस्य यद् ग्रहणं तद् न निश्चयेन, किं तर्हि? तदाभासेन। ततो निश्चयानिश्चयवशाद् न प्रत्यक्षस्य ग्रहणाग्रहणे। निश्चयस्य हि नैवंविधम्–किञ्चिन्निश्चितमप्यन्यदनिश्चितमिति ग्रहणाग्रहणे। तस्माद् यो निश्चयस्तदेवास्य ग्रहणम्। अन्यथैकस्मिन्नपि प्रकारे तद् न स्यात्। सर्वात्मना ग्रहणेऽप्येवं निश्चयः किं न भवतीति चेत्, सहकारिवैकल्यात्। अनुभवो हि यथाविकल्पाभ्यासं निश्चयान् जनयति, यथा रूपदर्शनेऽविशेषेऽपि कुणप-कामिनी-भक्ष्यविकल्पाः। तत्र बुद्धिवैशद्य-तद्वासनाभ्यास-प्रकरणादीन्यनुभवे निश्चयोत्पत्तिकारणानि। तेषामेव तारतम्यादिवशात् पौर्वापर्यम्। यथा जनकपाठकत्वाविशेषेऽपि पितरं दृष्ट्वा मम पिताऽऽगच्छतीति पूर्वं निश्चयो भवति, नोपाध्याय आगच्छतीति। स च भूतनिश्चयो व्यभिचारनिमित्ताभावे भवति। ततोऽनुभव इत्येव न सर्वथा निश्चयः। यदि परेण प्रत्यक्षं सविकल्पकमिष्यते कथं ‘[2]विषयालोचनमात्रार्थं हि चतुष्टयसन्निकर्षाज्जायते’ इत्येतदुक्तमिति चेत्, इन्द्रियज्ञानस्य निर्विकल्पकत्वं प्रमाणेन सिद्धमिति वस्तुसामर्थ्यादाचार्येण तथोक्तम्। अस्माभिस्तु पराभ्युपगमवशादेवमुक्तमित्यविरोधः। यदि परेण प्रत्यक्षं निश्चयात्मकमित्यभ्युपगम्यते प्रत्यक्षेण निर्णयस्य तुल्योत्पत्तिरित्येतत् कथं युज्यते? न हि तेनैव तस्य तुल्योत्पत्तिरित्यभ्युपगमो युक्त इति चेत्, इदं तस्य दोषान्तरं य एवमिच्छतीत्यलमतिप्रसङ्गेन।

विषयभेदोऽपीति प्रमाणस्यात्ममनोविषयत्वात् फलस्यार्थविषयत्वात्। ननु ज्ञानमप्यात्मसमवायित्वात् तद्विषयमेवेति चेत्, नैतत्, यस्माज्ज्ञानस्य ज्ञेयं विषयत्वेनाभिलप्यते न समवायिकारणम्, अन्यथा सर्वं ज्ञानमेकविषयं स्यात्। आत्ममनःसन्निकर्षस्यानुपलब्धौ तत्समवायिका[3]रणेऽन्यः को विषयो भवेदित्यनुत्तरमेतत्। विषयभेदे को दोष इत्याह—नेत्यादि।

१ दृश्यतां वै० सू० ३।१।२॥ २ दृश्यतां पृ० १७० पं० ३॥ ३ °कारणादन्यः (?)॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अपि चेत्योदिनाभ्युपगमबाधामाह। शास्त्र उक्तम्–'सामान्यविशेषापेक्षं द्रव्यगुणकर्मसु प्रत्यक्षम्, द्रव्येषु द्रव्यगुणकर्मापेक्षम्' इति। अत्र सामान्यवचनेन महासामान्यं सत्ता गृह्यते, विशेषवचनेन द्रव्यत्वादीनि शेषसामान्यानि। सामान्यं विशेष इत्येतच्चापेक्षाकृतम्। तस्मादेतानि सामान्यानि विशेषशब्दवाच्यानि। सत्ता सामान्यमेव, न विशेषः। शेषाणि सामान्यानि विशेषाश्चापेक्षया भवन्ति। तत्र सामान्यापेक्षं द्रव्ये सद् द्रव्यमिति। विशेषापेक्षं द्रव्यं पृथिवी घट इत्यादि। द्रव्यगुणकर्मापेक्षं दण्डी शुक्लो गच्छतीति। कस्मान्न युज्यत इति चेदुच्यते—यस्मादित्यादि। स्वार्थमात्रग्राहित्वात्येतद् विषयालोचनार्थत्वादित्यस्य विवरणम्। सन्धानं योजनम्। तत्स्वरूपं दर्शयति—इदमस्येत्यादि। अवश्यमिति, अन्यथा यद् विशेषणं विशेष्यं चागृहीतं तयोर्योगोऽपि न क्रियते। तच्चैवं गृहीतं भवतीत्याशयः। मतुब्लोपादभेदोपचाराद्वेति यथासम्भवं द्रष्टव्यम्। तथाहि–गुणवचनेभ्यो मतुपो लुक्। अभेदोपचारश्च सर्वत्र नास्ति, यस्मात् क्रिया-द्रव्यरूपेणाश्रयप्रतीतिर्नास्ति। मतुप्प्रत्ययार्थो यत्र गम्यते तत्रैव मतुब्लोपेनापि लक्ष्यते। यदीन्द्रियबुद्धौ तन्नोपपद्यते क्व तर्हि [उपपद्यते] इति चेदुच्यते-तच्चेत्यादि। पूर्वं विशेषणं विशेष्यं च गृहीत्वा लोकव्यवस्थां चानुस्मृत्य अनुसन्धानं कर्तुं शक्यते, नान्यथा। तदा चेन्द्रियज्ञानं चिरनिरुद्धमिति स्मृत्यैवोपस्थाप्य विशेषणं मनसैव योज्यते। तस्मात् तत्रैव तदुपपद्यते। अन्यथेति यदि विशेषणस्य स्मृत्युपस्थापितत्वं नेष्यते। तदनेन 'विशेषापेक्षं ज्ञानं तदप्रत्यक्षं मानसमेव वा, यथा सुरभि मधुरमिति ज्ञानम्, गौर्गच्छतीत्यपि यथोक्तप्रकारम्' इति व्यापकविरोधो द्वितीयसाध्यापेक्षया स्वभावश्चोक्तः। न च युज्यत इति दृष्टान्ते साध्यवैकल्याशङ्कां निराकरोति। भिन्नेन्द्रियग्राह्यत्वादिति गन्धरसयोर्घ्राणरसनग्राह्यत्वाद् द्रव्यस्य च चक्षुःस्पर्शनग्राह्यत्वात्। तत एवमुक्तं भवति–यद् भिन्नेन्द्रियग्राह्यविशेषणविशेष्यविषयं ज्ञानं तदप्रत्यक्षं तद् मानसमेव वा, यथा रूपमाम्लमिति ज्ञानम्, सुरभि मधुरमित्येतज्ज्ञानमपि तथेति पूर्ववद्धेतुभेदो योज्यः।

इदानीं द्रव्यमेव न किञ्चिदस्ति रूपादिसमुदाये तदुपचारात्, तत् कुतस्तत्र प्रत्यक्षं स्यादिति द्रव्यविचारणामारभते–यदि चेत्यादि। अयमस्यार्थः—यदनेकेन्द्रियग्राह्यं तद् नैकं रूपादिवत्, द्रव्यमपि तथेति व्यापकविरोधप्रसङ्गः। द्रव्यस्यानेकेन्द्रियग्राह्यत्वं 'दृश्यं स्पृश्यं च द्रव्यम्' इत्यभ्युपगमात्। रूपाद्यभेदो वेत्येवं दर्शयति–

१ "सामान्यविशेषापेक्षं द्रव्यगुणकर्मसु। द्रव्ये द्रव्यगुणकर्मापेक्षम्।"—वै० सू० ८।६, ७ ॥

२३

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रूपादावपि भेदव्यवस्थाकारणमनेकेन्द्रियग्राह्यत्वम्, यदि चैवमपि द्रव्ये भेदो नेष्यते रूपादिष्वपि स न स्यादिति । ग्राहकभेदाद् रूपादीनामनेकत्वं व्यवस्थाप्यत इति चेत्, भवतु, ततश्चास्माभिर्भिन्नेन्द्रियग्राह्यत्वादेव भेद इति नावधार्यते । किञ्च, भिन्नेन्द्रियग्राह्यत्वेन ग्राहकभेदोऽप्याक्षिप्त एव, भिन्नेन्द्रियग्राह्यत्वेऽवश्यं ग्राहकभेदो भवितुमर्हति । ननु द्रव्ये सत्यपि भिन्नेन्द्रियग्राह्यत्वे ग्राहकभेदो न भवतीति चेत्, न, तस्यैव द्रव्यस्य विचार्यमाणत्वाद् रूपादिष्वपि पर्यनुयोगस्य तुल्यत्वाच्च । दृष्टं चेदित्यादिना द्रव्यस्यैकत्वं प्रत्यक्षसिद्धं रूपादीनां चानेकत्वम्, ततः कथं तदनुमानेनान्यथा कर्तुं शक्यते इति दर्शयति । सत्तागुणत्ववदित्यनेन सत्ता-गुणत्वाभ्यामनेकान्तमाह । सत्तागुणत्वयोराश्रयो रूपादीनि सर्वेन्द्रियाणि । तस्मात् तयोरपि सर्वेन्द्रियत्वम् । यथोक्तम्—" एतेन गुणत्वे भावे च सर्वेन्द्रियं ज्ञानं व्याख्यातम् " [ वै० सू० ४ । १ । १४ ] इति । अभिन्नं ज्ञानं पुनः ' यमेवाहमद्राक्षं तमेव स्पृशामि ' इति । नेन्द्रियेण तदित्युत्तरम् । अक्षानेकत्ववैयर्थ्यादिति अक्षानेकत्वकल्पनायां निमित्ताभावादित्यर्थः । एकेनेन्द्रियेणानेकोऽर्थः समस्तः प्रतिपत्तुं न शक्यत इति इन्द्रियान्तरं परिकल्प्यते । यदि चेन्द्रियान्तरार्थेऽपि प्रवर्ततेऽनेकेन्द्रियकल्पना निर्निमित्ता स्यात् । एवमुक्तं भवति–कार्यभेदेनेन्द्रियभेदः कल्प्यते । यदीन्द्रियकार्यमप्येकेनैव क्रियत इन्द्रियान्तरे प्रमाणं नास्तीति तन्न कल्पनीयं स्यादिति । व्यर्थेति निर्निमित्तेत्यर्थः । अथापि स्यादित्येवं मन्यते–अनेकेनेन्द्रियेणैकोऽर्थः परिच्छेत्तुं शक्यते, नैकेनानेकोऽर्थः । रूपादयश्चानेके । तस्मादिन्द्रियबहुत्वकल्पनावैयर्थ्याभाव इति चेत्, स्वार्थे भिन्नेऽपीत्यादि । यद्येकमिन्द्रियमिन्द्रियान्तरार्थेऽपि प्रवर्तते ततः स सर्व एव तस्य स्वार्थः स्यात् । स्वार्थे च भिन्नेऽपि नीलादिवत् तत् शक्तिमदेवेत्यनुत्तरम् । सङ्ख्यादिभेदेन चेति " संख्या परिमाणानि पृथक्त्वं संयोगविभागौ परत्वापरत्वे कर्म च रूपिसमवायाच्चाक्षुषाणि " [ वै० सू० ४ । १ । १२ ] इति सिद्धान्तात् । नेन्द्रियान्तरार्थ इति, एतेन ' यश्चक्षुरिन्द्रियार्थस्तत्र त्वगिन्द्रियमशक्तिमत्, रूपादिवत्, द्रव्यमपि तथा ' इति व्यापकविरोधप्रसञ्जनम् । इन्द्रियान्तरविषयत्वेन चेत्यादि रूपस्पर्शौ भेदे सत्यपि यावद् भिन्नेन्द्रियेण न प्रतीयेते तावज्ज्ञातुं न शक्येते । यदि चैकेनेन्द्रियेण गृह्येते तदा यथा नीलादीनां चक्षुर्गोचरत्वेनाभेदस्तथा रूपस्पर्शयोरपि स्यात् । ततश्च स्पर्शोऽपि चक्षुषा गृह्येत । यतश्चक्षुषा न गृह्यते इति भेदकृतस्येन्द्रियान्तरेण ग्रहणस्याभावं दर्शयति । तदनेन ' यत्र स्पर्शनेन्द्रियं शक्तिमत् स न चक्षुरिन्द्रियार्थः, स्पर्शवत्, द्रव्येऽपि स्पर्शनेन्द्रियं शक्तिमत् '

१ ' भवेत् ' इत्यपि पाठः स्यादत्र । ऽप्युर्° मोद् VT. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति व्यापकविरोधप्रसङ्गमाह। अस्यैव साध्यविपर्ययेऽनिष्टप्रसङ्गमाह–तद् यदीत्यादि। यदि च चक्षुषा स्पर्शनग्राह्यमपि द्रव्यं गृह्यते इतीष्यते तदेन्द्रियान्तरार्थोऽपि चक्षुषः स्वार्थ इत्यभ्युपगतं स्याद् द्रव्यवत्। ततश्च स्वार्थत्वात् स स्पर्शरसादिभेदेन भिन्नोऽपि नीलादिवच्चक्षुषा गृह्यत इत्यतो भिन्नत्वमनेकेन्द्रियग्राह्यत्वे न कारणम् अनेकेन्द्रियकल्पनाया न कारणमित्यर्थः। यतः स्वार्थो भिन्नोऽप्येकेनैवेन्द्रियेण परिच्छिद्यते, ततो रूपादयो भिन्नत्वादनेकेन्द्रियग्राह्या इति यदुक्तं तन्न युज्यते। किं तर्हि ? इन्द्रियान्तरार्थाग्रहणमिति अनेकेन्द्रियत्वे कारणमिति सम्बन्धः। यस्माद् यदीन्द्रियान्तरार्थ इन्द्रियान्तरेण ग्रहीतुं न शक्यते तथा सत्यनेकमिन्द्रियं कल्पयितुं शक्यते इति दर्शितं तस्मादेवमनेकेन्द्रियग्राह्यं द्रव्यं नास्तीति स्थितम्।

पुनरप्येतदेव द्योतयितुमनेकेन्द्रियद्रव्याभ्युपगमेऽभ्युपगमबाधा प्राप्नोतीति दर्शयितुमाह—यदि चेत्यादि। यद्यभिन्नोऽर्थोऽनेकेनेन्द्रियेण गृह्यते तत इन्द्रियाणि स्वविषयनियतानि न स्युः। ततश्च रूपादयः सर्वेन्द्रियग्राह्याः प्रत्येकमपि स्युर्द्रव्यवत्। सर्वेन्द्रियग्राह्यवचनं चात्रैकेन्द्रियग्राह्यत्वनियमं निराकरोति। यदाह—[१]तथा [ च ] रूपादयोऽनेकेन्द्रियग्राह्याः स्युरिति नियमेनैकेन्द्रियग्राह्या न स्युरित्यर्थः।

स्वविशेषे नियामका इति [२]स्वविशेषे नियामका इन्द्रियबुद्धीनामिति सम्बध्यते। द्रव्यसङ्ख्यादिकर्मस्विति आदिवचनाद् भाव-गुणत्व-पृथक्त्वादीनि ग्राह्याणि। न स्यादित्यादि द्रव्यस्य स्पर्शनचक्षुर्भ्यां ग्रहणं न स्यात् शेषाणां चक्षुषेति योज्यम्। [३]यद्येवमित्यन्यथा नियामकत्वमाह। तथा चेत्यस्मिन् पक्षे सोऽनन्तरोक्तो दोषो न वर्तत इति दर्शयति। यस्य यत्र नियामकं कारणं नास्ति तत् तत्रानियतम्, यथा यदृच्छामात्रेण प्रवृत्ता डित्थादिसंज्ञाः क्वचिदर्थे, इन्द्रियाणामपि द्रव्यादिषु नियामकं कारणं नास्तीति कारणाभावः। सूत्रविरोध इत्यभ्युपगमविरोधमाह। युक्त्यापीत्यादिना 'योऽभावः स न क्रियते, आकाशपुष्पवत्, इन्द्रियान्तरेणाग्रहणमप्यभावः' इति व्यापकविरोधः। अन्ये तु सूत्रमन्यथा वर्णयन्ति–'तद्'वचनेन स्वविशेषरहितं विशेषान्तरमभिमतम्, तदभावात् स्पर्शत्वाद्यभावाद् रूपे चक्षुरिन्द्रियं प्रवर्तते, ततश्च स्पर्शत्वाद्यभावेन रूपत्वसद्भावो लक्ष्यते। इन्द्रियान्तरेणाग्रहणमव्यभिचार इति। तदपि युक्त्यापीत्यादिनैव निराकर्तव्यम्। युक्त्यानुविहितत्वे एवमुक्तिः शोभेत। युक्तिविरोधे तु कृच्छकल्पना

१ 'एवं रूपादयः...' इत्यपि पाठः स्यादत्र॥ २ 'स्वभेदे' इत्यपि पाठः स्यादत्र। रङ् गि ख्यद् पर् ल VT.॥ ३ 'एवं तर्हि' इति 'नन्वेवम्' इति वा पाठोऽपि भवेत्॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अकल्पनैव । किञ्च, स्वविशेषाणां प्रकृतत्वात् तेषामेव ग्रहणं युक्तं न विशेषान्तराणामप्रकृतत्वात् । तदभावेन च भावोपादानमयुक्तमित्यसारमेतत् । पूर्वस्मिन् व्याख्याने नायं दोषः । यत्र यस्य कारणाभावः स तत्र न भवतीति युक्तं यदुक्तं भवत्वित्यादि[1] । यद्येवं द्रव्याभावे यमहमद्राक्षं तमेव स्पृशामीत्यस्याभिन्नज्ञानस्य को विषयः ? इदं निर्विषयमेवेति च वक्तुं न शक्यते, विषयादिनियमेनोत्पत्तेः, अभिमतप्रत्यक्षवदिति मत्वाह—ननु यदित्यादि । अन्यगोचरमित्यादि । द्रव्यादन्यः कल्पित एवास्य विषय इति दर्शयति । भिन्नो विषय इत्यादि रूपं स्पर्शश्च । परस्परविपरीतविषयोपलब्धियोगात् तज्जायते ततो यद्यपि कल्पितविषयं तथापि रूपाद्युपलब्धिसद्भावे तद्भावात् मरीचिकादिजलज्ञानवत् विषयादिनियमेनैव तज्जायते इति द्योतयति । तत्सहचारिसमुदायविषयमिति, चक्षुःस्पर्शनाभ्यामुपलब्धो भिन्नो विषयः स सहचार्यस्येति तद्गुणसंविज्ञानो बहुव्रीहिः । पुनरपि तत्सहचारी समुदायो विषयोऽस्येति बहुव्रीहिरेव । एवं रूपस्पर्शयोः सहचारस्योपलक्षणत्वे च गन्धादिमात्रविषयत्वं नोक्तं भवति । स्मरणमेवाभिन्नं ज्ञानमिति रूपादिषु येष्वनुभवपूर्वको 'घटः' इति सङ्केतस्तत्समुदाये पुनरुत्तरकालं रूपस्पर्शोपलब्धियोजकं स्मरणं 'स एवायं घटः' इत्यभिन्नं ज्ञानमुपजायते । समुदायोऽवस्तुत्वात् केनचिदपि ज्ञानेन नानुभूयते, ततः कथं तत्र स्मरणमिति यो वदति तस्येदं न चोद्यम् । यस्मात् समुदायः कल्पितः, यश्च कल्पितो भावः स विज्ञानस्य ग्राह्यांशत्वेनात्मभूत इति स्वसंवित्त्यैवानुभूतः । अन्यथा कथं सैवेयं महती प्रासादमालेति स्मरणं भवेत् । कुत एतत् समुदायविषयं न पुनर्वस्तुसद्घटादिविषयमिति चेत्, उच्यते—रूपाद्यग्रहे तद्बुद्ध्यभावादिति । यद् यद्ग्रहे उपलब्धिलक्षणप्राप्तं नोपलभ्यते तत् ततो भिन्नं नास्ति, वृक्षादिभ्यः षण्णगरीवत् प्रासादमालावद्वा । घटादिद्रव्यमपि रूपाद्यग्रहे उपलब्धिलक्षणप्राप्तं नोपलभ्यते इति स्वभावानुपलब्धिमाह । यत्रालोकः समन्ताद् गृह्यते तत्र रूपं द्रष्टुमयोग्यमेव, आलोकाभावेऽपि कैश्चित् प्राणिभिस्तद्ग्रहणात् तेन नानेकान्तः । एवं विशेष्याणीत्यादि, सत्ता-गुणत्वाभ्यां पूर्वमनेकान्त उक्तः, तत्परिहारायोपन्यस्यति । विशेष्याणि रूपादीनि, तानि भिन्नानि 'सन् गुणः' इत्यनेन विशेषणेनासम्बद्धान्येव उपलब्धपूर्विणस्ततोऽर्थान्तरव्यवच्छेदविषयम् असतोऽगुणाच्च व्यावृत्तिलक्षणं यत् सामान्यं तद्विषयमिति यावत् । अभेदेन सर्वत्रेति मानसं ज्ञानं सामान्याकारानुबद्धम्, तत् तेषां भेदं सन्तमपि संवृत्य स्वाकारमभिन्नमपि एषु अध्यवस्यति । एकत्वमिव अगृह्णत् तेष्वभेदेन तत् सर्वत्रोपजायते नैक-

१ 'भवेदित्यादि' इत्यपि पाठोऽत्र स्यात् । ऽग्युर्° मोद्° चेस्° प° ल° सोग्स्° प VT. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्मिन्नेव। न तु सत्तागुणत्वे प्रत्यक्षे इत्यतो नानेकान्त इत्याशयः। तदनुपलक्षणादिति पूर्वमनुभवज्ञानं भिन्नवस्तुविषयम्, ततस्तत्पूर्वकं सामान्यज्ञानमित्येतद्विशेषानुपलक्षणात्।

तुल्यगोचरतेष्टा चेदिति अनैकान्तिकत्वं ग्राहयितुमुपन्यासः। गोचरसाम्ये हेतुमाह–तदग्रहे तद्बुद्ध्यभावादिति विशेषणाग्रहणे विशेष्ये बुद्धिर्न वर्तत इत्यर्थः। ततश्च रूपादीनां विशेष्याणां सर्वेन्द्रियत्वात् तद्विशेषणयोः सत्तागुणत्वयोः सर्वेन्द्रियत्वं सिद्धं। ये विशेषणविशेष्यभूतास्ते तुल्येन्द्रियविषयाः, यथा दण्डदण्डिनौ, सत्ता-तद्वन्तः गुणत्व-तद्वन्तश्च तथेति स्वभावप्रतिरूपकः। अनिष्टे प्रसज्यते इति प्रसङ्गविपर्ययेणानैकान्तिकत्वमाह। द्रव्यवन्तीत्यादि द्रव्यमाश्रयोऽस्त्येषामिति द्रव्यवन्ति। अत्र द्रव्ययोगेन गुणो विशेष्यम्, द्रव्यं विशेषणम्। ततश्च यथा गुणः पञ्चेन्द्रिय एवं द्रव्यमपि स्यात्। एवमेकद्रव्यत्वादित्यादि। द्रव्यमद्रव्यमनेकद्रव्यं चेष्यते, एकद्रव्यं द्रव्यं नास्ति। तत्राद्रव्यं द्रव्यं यत्र द्रव्यान्तमाधारो नास्ति, यथा परमाण्वाकाशादि। अनेकद्रव्यं यत्रानेकद्रव्यमाधारः, यथा घटः। स ह्यनेकसमवेतः। अत्र च एकद्रव्यं सत्तायाः सर्वेन्द्रियायाः विशेषणमिति द्रव्यमपि सर्वेन्द्रियं स्यात्। न चेष्यते। तस्मादनैकान्तिकः। द्रव्यवृत्तित्वादित्यादि। द्रव्यवृत्तिर्या सत्ता तस्या एकद्रव्यं विशेषणम्, इयं च न सर्वेन्द्रिया, किं तर्हि ? गुणवृत्तिः। ततो नायं प्रसङ्गः। कुतोऽभिन्ना सत्तेयं द्रव्यादौ सति न निषिध्यते, न भिन्नेति चेदाह–तथोक्तमित्यादि। सत्ताया द्रव्यस्वभावे निषिद्धे ततो गुणः कर्म च स्यादित्याशङ्कां निराकर्तुमेतदुच्यते–" गुणकर्मसु च भावान्न कर्म न गुणः" [ वै० सू० १। २। १० ] इति। अतः प्रकृत एव सत्ताधर्मः ' च 'शब्देन समुचीयते। अन्यथा समुच्चयाय च युज्यते द्रव्ये वृत्तेरपि गुणकर्मस्ववृत्तेर्गुणकर्मस्वभावः निराकृतो न स्यात्। यदि चेत्यादि, यद्ययं विरुद्धधर्माध्यास इष्यते ततो भेदः स्यात्। ततश्च सोऽनन्तरोक्तो दोषोऽत्र स्यात्। इदं च सूत्रं विरुध्यते—" सल्लिङ्गाविशेषाद् विशेषलिङ्गाभावाच्चैको भावः" [ वै० सू० १। २। १८ ] इत्याशयः। यदा चेत्यादि, यदेदं चक्षुषा दृष्ट्वा ' उष्णोऽयमग्निः ' इति ग्रहणं ततस्तदा स्पर्शोऽप्यग्निविशेषणत्वाच्चाक्षुषः स्यात्। तथा च नेति। ततश्चानेकान्तः।

---

१ ग्शन्॰ दु॰ न॰ ब्स्दु॰ बडि॰ छेद्॰ दु॰ यङ्॰ रिग्स॰ सो। ज़ेस्॰ ल॰ ऽजुग्॰ प॰ लस्॰ क्यङ्। योन्॰ तन्॰ दङ्॰ लस्॰ नेम्स्॰ ल॰ मि॰ ऽजुग्॰ प॰ लस्। योन्॰ तन्॰ दङ्॰ लस्॰ नेम्स्॰ ल॰ योद्॰ मिन्॰ ग्सल् ( ब्सल् ? ) बर्॰ मि॰ ऽग्युर्॰ रो VT.। अत्र भोटभाषानुवादे **किञ्चिदशुद्धमिव प्रतीयते** ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दृष्ट इत्यनेन [1]अर्थापत्तिसमां जातिमुपन्यस्यति, विनापीत्यादिना नीलादिषु भिन्नेष्वपि इन्द्रियभेदाभावदर्शनेन वृक्षचैतन्ये स्वापवद् द्वितीयामु[2]पलब्धिसमां ग्रहणभेदादिति च हेत्वन्तरोपदर्शनात् । आद्याम् अन्यथोक्तमित्यादिना अर्थापत्तिसमां [3]निरस्यति । स्यादेतत्–अनेकान्त इत्यनेन हेतुव्यभिचारो नोच्यते, किं तर्हि ? प्रतिज्ञादोषः । यस्माद् भवता भिन्नेन्द्रियग्राह्यत्वादेवेत्यवधारणेन हेत्वन्तरं नास्तीति प्रतिज्ञायते, तच्च न युज्यते हेत्वन्तरस्यापि सद्भावादित्यत आह–नेत्यादि । अत्र च नानैकान्तिक इति ऐकान्तिकोऽयमव्यभिचारीत्यर्थः ।

सर्वं साध्यमित्यादिना [4]उपलब्धि[समां] द्वितीयां निराकरोति, बुद्धिभेदोऽप्यन्यत्वस्येत्यादिना हेत्वन्तरस्यापि साध्यवृत्तिदर्शनेन [5]सव्यभिचारप्रदर्शनादाद्याम् ।

भेदेऽभेदोऽन्यथा कुत इत्यादिना ग्रहणभेदात् केवलादन्यथा इन्द्रियभेदे [6]ग्रहणभेदे च सति अभेदो नास्त्येवेति यावत् । यत्र चेत्यादिना यदि केवलाद् ग्रहणभेदाद् नीलादिषु भेदः तथा सति यत्रेन्द्रियभेदो [7]ग्रहणभेदश्च स्तस्तत्र सुतरां भेदः सिध्यति, [8]इन्द्रियभेदेऽभेदाशङ्काऽभावादिति दर्शयति ।

---

१ " अर्थापत्तितः प्रतिपक्षसिद्धेरर्थापत्तिसमः । ५ । १ । २१ । अनित्यः शब्दः प्रयत्नानन्तरीयकत्वाद् घटवदिति स्थापिते पक्षेऽर्थापत्त्या प्रतिपक्षं साधयतोऽर्थापत्तिसमः । यदि प्रयत्नानन्तरीयकत्वादनित्यसाधर्म्यादनित्यः शब्द इति अर्थादापद्यते नित्यसाधर्म्यान्नित्य इति । अस्ति चास्य नित्येन साधर्म्यमस्पर्शत्वमिति । " —**न्यायभाष्य.** ५ । १ । २१ ॥ २ " निर्दिष्टकारणाभावेऽप्युपलम्भादुपलब्धिसमः । ५ । १ । २७ ॥ निर्दिष्टस्य प्रयत्नानन्तरीयकत्वस्यानित्यत्वकारणस्याभावेऽपि वायुनोदनाद् वृक्षशाखाभङ्गजस्य शब्दस्यानित्यत्वमुपलभ्यते निर्दिष्टस्य साधनस्याभावेऽपि साध्यधर्मोपलब्ध्या प्रत्यवस्थानमुपलब्धिसमः । " —**न्यायभाष्य.** ५ । १ । २७ ॥ ३ " अस्य [ =अर्थापत्तिसमस्य ] उत्तरम्—अनुक्तस्यार्थापत्तेः पक्षहानेरुपपत्तिरनुक्तत्वादनैकान्तिकत्वाच्चार्थापत्तेः । ५ । १ । २२ । अनुपपाद्य सामर्थ्यमनुक्तमर्थादापद्यत इति ब्रुवतः पक्षहानेरुपपत्तिरनुक्तत्वात्, अनित्यपक्षसिद्धावर्थादापन्नं नित्यपक्षस्य हानिरिति । अनैकान्तिकत्वाच्चार्थापत्तेः । उभयपक्षसमा चेयमर्थापत्तिः यदि नित्यसाधर्म्यादस्पर्शत्वादाकाशवच्च नित्यः शब्दः, अर्थादापन्नमनित्यसाधर्म्यात् प्रयत्नानन्तरीयकत्वादनित्य इति । न चेयं विपर्ययमात्रादेकान्तेनार्थापत्तिः । न खलु वै घनस्य ग्राव्णः पतनमित्यर्थादापद्यते द्रवाणामपां पतनाभाव इति । " —**न्यायभाष्य.** ५ । १ । २२ ॥ ४ " अस्य [ =उपलब्धिसमस्य ] उत्तरम्–कारणान्तरादपि तद्धर्मोपपत्तेरप्रतिषेधः । ५ । १ । २८ । प्रयत्नानन्तरीयकत्वादिति ब्रुवता कारणत उत्पत्तिरभिधीयते, न कार्यस्य कारणनियमः । यदि च कारणान्तरादप्युत्पद्यमानस्य शब्दस्य तदनित्यत्वमुपपद्यते किमत्र प्रतिषिध्यते इति । "–**न्यायभाष्य.** ५ । १ । २८ ॥ ५ मि॰ ऽखुल्° ब° दङ्° ब्चस्° प° ब्स्तन्° प° लस्° दङ्° पोऽे VT. ॥ ६ 'ग्राहकभेदे' इत्यपि पाठोऽत्र भवेत् । ऽज़िन्° ब्येद्° थ° दद्° पर्° VT. ॥ ७ 'ग्राहकभेदश्च' इत्यपि पाठोऽत्र स्यात् । ऽज़िन्° ब्येद्° थ° दद्° प VT. ॥ ८ 'इन्द्रियभेदकृते [ भेदे ] अभेदाशङ्काऽभावादिति दर्शयति' इत्यपि पाठोऽत्र स्यात् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एतेनेति द्रव्ये प्रत्यक्षनिराकरणयुक्त्या गुणादिष्विति आदिशब्दात् कर्मसु निराकृतं प्रत्युक्तम् । कथमित्याह–तदपि हीत्यादि । स्वाश्रयं गुणकर्मणोः स्वसामान्यं गुणत्वं कर्मत्वं च, स्वमाश्रयो यस्य तत् स्वाश्रयम्, तत्सम्बन्धद्वारेण ‘उत्पद्यते’ इत्यनेन सह सम्बन्धः, विशेषणसम्बन्धद्वारेणोत्पद्यत इति यावत् । ततश्च ‘यद् विशेषणापेक्षं तदप्रत्यक्षम्’ इत्यादि पूर्ववत् साधनं वाच्यम् । किञ्च, तदपि चतुष्टयादिसन्निकर्षादेवोत्पद्यते इत्येतद्दर्शितम् । आदिशब्देन त्रयसन्निकर्षाद् द्वयसन्निकर्षाच्च यथासम्भवम् । ततः को दोष इत्याह–यथा सर्वथेत्यादि । तत्र चतुष्टयसन्निकर्षादात्ममनइन्द्रियद्रव्यसन्निकर्षाद् रूपादिषु कर्मसु च । त्रयसन्निकर्षाच्छब्दे, तत्र द्रव्येण सहेन्द्रियस्य सम्बन्धो नास्ति आकाशस्य श्रोत्रत्वात् तत्रैव च शब्दस्य समवेतत्वात् । द्वयसन्निकर्षादात्ममनःसन्निकर्षात् सुखादिषु । एवं “गुणकर्मस्वसन्निकृष्टेषु ज्ञाननिष्पत्तेर्द्रव्यं कारणं [कारण]कारणं च” [वै० सू० ८ । ४] इति यदुक्तं तदप्यपक्षिप्तमिति ।
VT. D. ed. पृ० ५३ a–६१ b । P. ed. पृ० ५९ b–६९ a ।

# अथ सवृत्तिके प्रमाणसमुच्चये

## द्वितीये स्वार्थानुमानपरिच्छेदे वैशेषिकमतपरीक्षा।

निषिद्धे [2]कार्यकारणे ॥ ३० ॥
न संयोगोऽगतौ सिद्धेर्द्विनिष्ठत्वादभेदतः।
न च केनचिदंशेन न संयोगी हुताशनः ॥ ३१ ॥
धूमो वा सर्वथा तेन प्राप्तं धूमात् प्रकाशनम्।
समवायादिषु तथा विरोधिष्वपि सम्भवात् ॥ ३२ ॥
लिङ्गस्यान्येन सामान्यं विशेषा अपि लिङ्गिनः।
प्रकाशकप्रकाश्या न प्रसङ्गोऽन्यत्र सर्वथा ॥ ३३ ॥
अपेक्ष्य देशं कालं च कारणं नाप्रतीतितः।
सम्बन्धस्याविशिष्टत्वाद् द्वैविध्यं नान्यसम्भवात् ॥ ३४ ॥
यद् विरोधि न तल्लिङ्गमसम्बन्धान्न लिङ्गधीः।
लैङ्गिकत्वेन निर्देशाद् न सर्वं लिङ्गमुच्यते ॥ ३५ ॥
सम्बन्धस्मरणं सिद्धं सूत्रे कार्याद्यलक्षितम्।
शेषमव्यञ्जकं प्राप्तमन्यतस्तद्गतेर्वृथा ॥ ३६ ॥

वैशेषिकाणामपि 'अस्येदं कार्यं कारणं सम्बन्ध्येकार्थसमवायि विरोधि चेति लैङ्गिकम्' [ वै० सू० ९। १८ ] इति।

तत्र तावत् [3]पूर्वं [1] [4]निषिद्धे कार्यकारणे। नैयायिकानुमानें[5]निषेधे 'पूर्ववच्छेषवत्' इत्यत्र कारणकार्येऽनुमानस्य न हेतू इत्युक्तम्। सम्बन्धि द्विविधम्—संयोगि समवायि च यथा धूमोऽग्नौ विषाणं गवि। तत्र तावद् न[6] संयोगोऽ-

१ दृश्यतां पृ० १८४ टि० ४ ॥ २ अत्र सम्भवन्तः पाठभेदा वृत्तेष्टिप्पणेषु विलोकनीयाः ॥ ३ पूर्ववत् कारणकार्यनिषेधात् K ॥ ४ निषिद्धं कारणे कार्यम् $\mathrm{PS}^1$। निषिद्धं कारणात् कार्यम् $\mathrm{PSV}^1$। $\mathrm{PS}^2$ मध्येऽयं कारिकांश एव नास्ति। $\mathrm{PSV}^2$ मध्ये तु 'कारणकार्यनिषेधात्' इति गद्यात्मक एवानुवादः। अस्माभिस्तु वैशेषिकाभिमतानां कार्यकारणादिलिङ्गानां निराकरणस्यात्र विवक्षितत्वाद् 'निषिद्धे कार्यकारणे' इत्यनूदितं संस्कृते। एवं च नैयायिकानुमानपरीक्षास्थेन 'त्रिकालविषयं सर्वम्' $\mathrm{PS}^2$ इति कारिकांशेन सह योगात् 'त्रिकालविषयं सर्वं निषिद्धे कार्यकारणे' इति कारिकार्धमप्यत्रोपपद्यते। **एतत्परिशिष्टान्ते पूर्तिरप्यत्र विलोकनीया** ॥ ५ °निषेधावसरे 'पूर्ववच्छेषवत्' इत्यत्र कारणेन कार्यमनुमानस्य न हेतुरित्युक्तम् V ॥ ६ '**न संयोग्यगतौ सिद्धेः**। संयोगानभिज्ञस्यापि' इत्यपि पाठोऽत्र भवेत् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गतौ सिद्धेः, संयोगानभिज्ञानेऽपि अविनाभावमात्रस्मरणादग्निप्रतिपत्तेर्[1]दृष्टत्वात्, ज्ञानकारणत्वेनैव च तस्य ज्ञापकत्वादगृहीतः सम्बन्धोऽनुमेयप्रकाशनस्य निमित्तं भवितुं नार्हति, संयोगस्यानुमानकारणत्वे चाग्निरपि धूमज्ञानस्य कारणं स्याद् द्विनिंष्ठत्वात्, संयोगस्य द्विनिष्ठत्वादुभयत्र प्रकाशकत्वं प्राप्नोति। दृष्टोऽयोगुडाङ्गाराद्यवस्थायां धूमविनाभूतोऽग्निरपि।

[2]अपवादादेकत्र न लिङ्गम्। “[3]असन् सन्दिग्धश्चानपदेशः” [वै० सू० ३।१।११] इत्यपवादोऽस्ति, [4]ततोऽग्निः कारणं न भवति। न हि सोऽवश्यं धूमेन संयोगी, धूमस्त्ववश्यमग्निनेति चेत्, तदपि न, यस्माद् [5]अभेदतः। संयोगो ह्यभिन्नः, स यथैकत्र तथा द्वितीयेऽपीत्येकत्राकारणं न युज्यते। न सम्बन्धोऽसकृद्ग्रहणेनानुमानस्य कारणं यतोऽत्र व्यभिचारित्वमव्यभिचारित्वं च विचार्यते। यस्य त्वविनाभावः सम्बन्धस्तस्य [6]द्वयोरवश्यमेकस्य कारणभावो युज्यते।

**[7]न च केनचिदंशेन न संयोगी हुताशनः।**
**धूमो वा सर्वथा तेन प्राप्तं धूमात् प्रकाशनम्॥**

[8]संयोगसम्बन्धे सति वह्नेर्दीप्तितैक्ष्ण्यादयो विशेषा अपि धूमेन प्रकाश्येरन् सर्वात्मना संयोगित्वात्। [9]एवं धूमस्य यद् द्रव्यत्वादिमात्रग्रहणं तदपि तेनैवात्मना वह्नेर्गमकं स्यात्। [10]न हि द्रव्यत्वादिस्वभावेन असंयोगी। [11]यथा च संयोगे दोषः **समवायादिषु तथा**। [12]तत्रापि गोविषाणयोः शाबलेयत्वादिविशेष-द्रव्यत्वादिसामान्यानां वा समवायाभावो नास्ति। [13]एवमेकार्थसमवायेऽपि वक्तव्यम्।

---

१ संयोगस्य **द्वियोगित्वादुभयस्यापि** प्रकाशकत्वं प्रसज्यते। अयोगुडाङ्गाराद्यवस्थायामग्निरपि धूमेन विना दृष्टः V ॥ २ नन्वपवादादेकत्र न हेतुः। सन्दिग्धोऽनपदेशः...... V ॥ ३ असन् सन्दिग्धश्चेत्यनपदेशोऽयमस्ति ततोऽग्निः कारणं न भवति। K ॥ ४ ‘ततोऽग्नेः कारणत्वं न भवति’ इत्यपि भवेत् पाठः॥ ५ **अभेदतः** [संयोगस्य] इति वाक्यशेषः। संयोगो ह्यभिन्नः V ॥ ६ नोभयम्, [अपि तु] अवश्यमेकमेव कारणमित्युपपद्यते V ॥ ७ कारिकेयं हेतुबिन्दुटीकायामर्चटेन प्रमाणवार्तिकस्ववृत्तेष्टीकायां कर्णकगोमिना चोद्धृता। PS² मध्ये पूर्वार्धमिदं नास्ति, PSV² मध्ये चास्य भोटभाषानुवादो गद्यवद् भासते॥ ८ संयोगसम्बन्धदर्शने हि V ॥ ९ ‘एवं यो धूमस्य द्रव्यत्वादिमात्रं गृह्णाति सोऽपि तेनैवात्मना वह्निं प्रतीयात्’ इत्यपि पाठोऽत्र भवेत्॥ १० स द्रव्यादिभावेन नासंयोगी V ॥ ११ ‘यथा च संयोगिनि दोषः **समवाय्यादिषु तथा**’ इत्यपि पाठोऽत्र भवेत्॥ १२ तत्रापि गवा विषाणी कपिलादिविशेषाश्च द्रव्यत्वादिसामान्येन गम्येरन्। एवमेकार्थसमवायिनि समवायानुपपत्तिर्वक्तव्या V ॥ १३ एवमेकार्थसमवायिन्यपि (?)॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

विरोधिष्वपि सम्भवात्। [1]यत्र भूताभूतेषु लिङ्गलिङ्गिभावः [ तत्र ] [2]अपि परस्परं वक्तव्यम्। एवं तद्विशेषसामान्यानामपि लिङ्गलिङ्गिभावः स्यात्, केनचिदंशेनाविरोधाभावात्। आह च—

[3]लिङ्गस्यान्येन सामान्यं विशेषा अपि लिङ्गिनः।
प्रकाशकप्रकाश्या न, प्रसङ्गोऽन्यत्र सर्वथा॥

इति सङ्ग्रहश्लोकः।

संयोगस्यानुमानकारणत्वेऽनुमेये संयोगिमात्रप्रतीतिप्रसङ्गः, [4]अन्यथा लिङ्गस्य [5]लिङ्गिज्ञानसामर्थ्याभावात्। एवं समवायादिष्वपि वक्तव्यम्।

अत्र च नाग्निसत्ता धूमेन साध्यते, तस्याः प्रतीतत्वात्। यत्र देशे धूमः समीपः स देशोऽग्निमानिति साध्यते, अन्यथा 'अत्र' इति वचनं निरर्थकं स्यात्। 'धूमेऽग्निः, अग्नावुष्णता' इति वचने प्रतिज्ञार्थैकदेशो हेतुः स्यात्। तस्माल्लिङ्गलिङ्गिनोर्नावश्यं संयोगः, [6]किं तर्हि? अविनाभावित्वमेव।

अपेक्ष्य देशं कालं च, तदेवाविनाभावित्वं देशापेक्षया यावति देशे धूमोऽग्न्यविनाभूतः पूर्वमुपलब्धः, कालापेक्षया यावता कालेनारणिनिर्मथनाद्यवस्थायां धूमोऽग्न्यविनाभूतः पूर्वमुपलब्धः। तस्मादग्निधूमयोः संयोगो नानुमानस्य कारणम्।

समवायोऽपि गोविषाणयोर्नानुमानस्य कारणम्, अप्रत्यक्षत्वात्। सम्बन्धः सन्नपि कारणं नाप्रतीतितः। न ह्यनुपलब्धः सम्बन्धोऽभिव्यञ्जक इष्यते। अव्युत्पन्नस्याप्यविनाभावित्वात् प्रतीतिदर्शनात् तदेव कारणम्। एकार्थसमवायि [अपि K] द्विविधम्—कार्यं कार्यान्तरस्य, कारणं कारणान्तरस्य, यथा रूपं स्पर्शस्य पाणिः पादस्य। अत्रापि तदेव वक्तव्यम्—सम्बन्धः सन्नपि न कारणम्, अप्रतीतत्वात्। एकार्थसमवायो हि [10]कस्यचिदपि न प्रत्यक्षः। एकार्थसमवाया-

---

१ यथासम्भवं वक्तव्यम्, यत्र (क्वचिद् ?) अभूतस्य भूतमपि लिङ्गं लिङ्गि च वक्तव्यम्, एवं भूतेऽपि सामान्यविशेषाणां परस्परं लिङ्गलिङ्गित्वं वक्तव्यम्, तस्य केनचिदंशेन विरोधाभावात् V॥ २ क्वचिद् भूताभूतेषु लिङ्गलिङ्गिभावेऽपि (?) K॥ ३ 'लिङ्गस्य **चान्य**सामान्यम्' इत्यपि पाठोऽत्र स्यात्॥ ४ अन्यथा सम्बन्धस्य (?) लिङ्गिनि ज्ञानसामर्थ्याभावात् K॥ ५ लिङ्गिज्ञानोत्पादने सामर्थ्याभावादित्याशयः॥ ६ अपि तु (?)॥ ७ 'अपेक्षते देशकालौ' इत्यपि भवेत्॥ ८ समवायाज्ञानेऽपि...K। समवायसत्त्वेऽपि प्रतीतिरविनाभावित्वोपलब्धेरेवेति तदेव कारणम् V॥ ९ 'पादः पाणेः' इत्यपि भवेत्॥ १० क्वचिदपि न प्रत्यक्षः। एकार्थसमवायद्वयसत्त्वेऽपि अविनाभावादेव प्रतीतिर्दृष्टा V॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ज्ञानेऽपि अविनाभावोपलब्धेः प्रतीतिर्दृष्टा। अत्रापि रूपेण स्पर्शस्येव स्पर्शेनापि रूपस्याभिव्यक्तिः स्यात् सम्बन्धस्याविशिष्टत्वात्, न[1] ह्येकार्थसमवाये विशेषोऽस्ति, व्यभिचारित्वे चोक्तवत् सम्बन्धस्याकारणत्वप्रसङ्गः। यच्चैकार्थसमवायि द्विविधम् [ एव V ] इत्युक्तं तत्र [2]द्वैविध्यं नान्यसम्भवात्। कारणकारणादप्येकार्थसमवायिनि कार्यकार्ये प्रतीतिर्दृष्टा, यथोक्तम्–"अभूदित्यभूतात्" [ वै० सू० १०।८ ] इति। तस्मादेकार्थसमवायि द्विविधमेवेत्यवधारणं न युक्तम्।

विरोधि चतुर्विधम्–अभूतं भूतस्येत्यादि। एषु सर्वत्रापि यद् विरोधि न तल्लिङ्गम्। [3]वाय्वभ्रसंयोगस्य वर्षकर्मणा विरोधः। अत्र च वर्षकर्म न लिङ्गम्, किं तर्हि? तदभावः, वर्षकर्माभाववाय्वभ्रसंयोगयोश्च न विरोधः। एवमन्यत्रापि वक्तव्यम्।

य[4]च्चोक्तम्–अभूतादिप्रतीतिर्लिङ्गं [5]प्रसिद्धिपूर्वकत्वादपदेशस्येति, त[6]त्र लिङ्गम् असम्बन्धान्न लिङ्गधीः। लिङ्ग[7]धियो लिङ्गिना सम्बन्धो नास्ति। अतिप्रसङ्गात् सम्बन्धार्थं[8] च 'अस्येदम्' इत्येतत् सूत्रमित्यस्या लिङ्गत्वं न युज्यते। कुत इति चेत्, लैङ्गिकत्वेन निर्देशात् अनुमेयज्ञानस्य लैङ्गिकत्वे फलाभावः। लिङ्गादर्शनेऽपि स्मरणमात्रे प्रतीतिप्रसङ्गः। तत 'इति'कारनिर्देशात् सम्बन्धस्मरणापेक्षं[9] लिङ्गज्ञानमेव लैङ्गिकम्, न तु तल्लिङ्गम्। य[10]दि कारणीकृत्य लिङ्गोक्तिः, कारणपर्यायो[ऽयं] लिङ्गशब्दस्तस्मात् तथोच्यत इति चेत्, तदपि न, यस्मादत्र न[11] सर्वं लिङ्गमुच्यते। अत्र सर्वस्य लिङ्गस्य नाधिकारः, किं तर्हि? अनुमेयलक्षणभूतस्य, अन्यथा आत्मादिसन्निकर्षोऽप्यत्र वाच्यः स्यात्। लिङ्गज्ञानं न साक्षादनुमानस्य कारणम्, सम्बन्धस्मरणेन व्यवहितत्वाद् न[12] मुख्यं कारणम्। 'प्रसिद्धिपूर्वकत्वाद-

१ न ह्येकार्थसमवायित्वे विशेषोऽस्ति, एकतो व्यभिचारित्वे V ॥ २ '**द्वित्वं नान्यस्य सम्भवात्**' इत्यपि चिन्त्यम् ॥ ३ 'वाय्वभ्रसंयोगवर्षकर्मणोर्विरोधः' इत्यपि भवेत् पाठः ॥ ४ यच्चोच्यते (?) ॥ ५ 'अपदेशस्य प्रसिद्धिपूर्वकत्वात्' इत्यपि भवेत् पाठः। दृश्यतां **वै० सू०** ३।१।९ ॥ ६ तत्र लिङ्गम् V ॥ ७ [ लिङ्ग]धिया सह लिङ्गिनः केनाप्याकारेण [ सम्बन्धो ] नास्ति K ॥ ८ सम्बन्धार्थं सूत्रे 'अस्येदम्' इति वचनम् [ अतः ] अस्या लिङ्गत्वं न युज्यते V ॥ ९ लिङ्गधीरेव लैङ्गिकम्, न सा लिङ्गम् (?) ॥ १० कारणमिति वचनाल्लिङ्गमिति चेत् K ॥ ११ 'सर्वं लिङ्गं न कथ्यते' इति पाठोऽप्यत्र भवेत् ॥ १२ ततः साक्षात् कारणत्वं नास्ति V ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पदेशस्य' [ वै० सू० ३ । १ । ९ ] इति यदुक्तं तस्मात् सम्बन्धस्मरणं सिद्धम्, न तु सम्बन्धिप्रतीतिः सिद्धा, [1]यस्माद् "अप्रसिद्धोऽनपदेशः" [ वै० सू० ३ । १ । १० ] इत्युक्तम्।

यदि [2]सम्बन्धमात्रमेवानुमानस्य कारणं तथा सति [3]सूत्रे कार्याद्यलक्षितम्। [4]यानि शास्त्रे 'कार्यत्वात् कारणतो विकारात्' [ वै० सू० २ । २ । ३२, ३४ ] इति, एवं '[5]सदकारणवन्नित्यम्' [ वै० सू० ४ । १ । १ ] इत्यादीनि नित्यानित्यलिङ्गान्युक्तानि [ तानि ] सूत्रे [6]न लक्षितानि। कार्यत्वादि एतेषामन्यतमद् न सम्भवति। कथं तदसम्भवः? [7]व्यङ्ग्यव्यञ्जकता या कार्यकारणस्वभावा सात्रास्तीति चेत्, यदि व्यञ्जकमात्रं कारणमिष्यते तथा सति शेषमव्यञ्जकं प्राप्तम्, संयोग्यादि यच्छेषं कारणं [8]तदव्यञ्जकं स्यात्, कारणाद् भिन्नत्वात्। किञ्च, अन्यतस्तद्गतेर्वृथा, सम्बन्धान्तरेण च [ एतम् K ] अर्थमधिगम्य 'अस्येदं व्यञ्जकम्' इति मनसा कल्प्यते ततो व्यर्थमेतदनुमानकारणम्। [9]एवं तावद् वैशेषिकानुमानं सदोषमुक्तम्।

## विशालामलवती टीका।

वैशेषिकाणामपीत्यादि। अस्य सम्बन्धः—योगिप्रत्यक्षज्ञानसिद्ध्यभिधाने लिङ्गजत्वं तस्या उक्तम्। ननु लिङ्गजमित्येतत् किमिति चेत्, उच्यते–आलोचिताध्यवसायः आलोचितानामनुगमश्च। तत्र यत् साक्षादर्थेष्वालोचनं यथायं गौरेवायमश्च एवेत्येतत् प्रत्यक्षम्। येऽन्ये आलोच्या एतदनुगमः स लैङ्गिकत्वेनातिप्रसज्यते। तस्य लिङ्गिलिङ्गिनियमाय साङ्केतिकं लक्षणं निर्देश्यम्। सङ्केते सत् साङ्केतिकं सङ्केतादित्यर्थः। तद्यथा—अस्येदमित्यादि। अस्येति लिङ्गमाह, इदमिति अनुमेयम्। यदाऽस्येदं प्रसिद्धमसन्दिग्धं च भवति अस्य ज्ञापने जनने वा समर्थस्य कारणस्य इदं व्यङ्ग्यं निष्पाद्यं वा कार्यमिति अतोऽस्य कारणदर्शनात् कार्यस्याप्राह्यत्वेऽपि अनुव्यवसायो भवति, यथा

१ तथा च यस्माद् V ॥ २ यद्येक एव सम्बन्धोऽनुमानस्य कारणं तथा सति शास्त्रोक्तमेव सूत्रे कार्याद्यलक्षितम् V ॥ ३ सूत्रे कार्याद्यभाषितम् K. VT ॥ ४ यथा शास्त्रे K ॥ ५ सदकारणवत्वान्नित्यम् K। सदकारणवत्त्वात् [ नित्यम् ] V। ( सदकारणवत्तन्नित्यम् ? ) ॥ ६ अनाख्यातानि स्युः K ॥ ७ यैषा व्यङ्ग्यव्यञ्जकतायाः सिद्धिः सैव कार्यकारणभाव इति चेत्, यद्येवं व्यञ्जकमात्रं...V। अत्र विशालामलवत्यां '**व्यङ्ग्यव्यञ्जकतायाः** इति' इति प्रतीक उपलभ्यत इति ध्येयम् ॥ ८ तद् व्यङ्ग्यव्यञ्जकं न स्यात् K ॥ ९ एवं तावद् वैशेषिकानुमानं दुर्विहितम् V ॥ १० अथास्य VT. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दिवाकरकिरणदर्शनाद् घटाभिव्यक्तौ, तन्तून् प्रस्तारितांस्तन्तुवायाधिष्ठितांश्च दृष्ट्वा भाविपटे । एवं यदाऽस्येदं प्रसिद्धमसन्दिग्धं च भवति व्यङ्ग्यस्य निष्पाद्यस्य वा कार्यस्येदं कारणमिति ततोऽस्य कार्यदर्शनादित्यादि यथायोगं वाच्यम् । सम्बन्धि द्विविधम्–संयोगि यथा धूमोऽग्नेः, समवायि यथा विषाणं गोः । एकार्थसमवाय्यपि द्विविधम्–कार्यं कार्यान्तरस्य कारणं कारणान्तरस्य । तत्र कारणस्य एकार्थसमवाय[1] एकार्थानां समवायः, कार्यस्य च एकार्थेषु समवाय इति विग्रहभेदात् । तत्र कार्यात् कार्यान्तरेऽनुमानं यथा रूपात् स्पर्शे, कारणात् कारणान्तरे यथा पादाद् हस्तयोः । विरोधि चतुर्विधम्—अभूतं भूतस्य, यथाऽभूतं वर्षकर्म भूतस्य वाय्वभ्रसंयोगस्य, तस्मिन् सति वर्षकर्मणोऽभावात् । भूतमभूतस्य, तदेव विद्यमानं वर्षकर्म तस्यैव वाय्वभ्रसंयोगस्य । अतिवृत्तत्वमप्रवृत्तत्वं च प्रतिपादयति । भूतं भूतस्य द्रवत्वं सेतुबन्धस्य, द्रवत्वकार्येण स्यन्दनेन विरोधाद् द्रवत्वेन विरोधं दर्शयति । अभूतमभूतस्य अभिनिर्वृत्तायाः श्यामताया घटे पाकजरूपोत्पत्तावभिनिर्वृत्तो घटाग्निसंयोगः ।

कारणकार्येऽनुमानस्य न हेतू इत्युक्तमिति पराभिमते इत्याशयः । ननु जन्यजनकलक्षणे तत्र कार्यकारणे निषिद्धे न व्यङ्ग्यव्यञ्जकलक्षणे इति चेत्, नैष दोषः, व्यङ्ग्यव्यञ्जकभावो हि जन्यजनकभाव एव । तथाहि—सहकारिणोऽभिव्यञ्जकादुपादाना(नो)पेक्षाज्ज्ञानजननयोग्यक्षणान्तरोत्पत्तिरेव घटाद्यभिव्यक्तिः, अन्यथा तत्कृतोपकारनिरपेक्षज्ञानोत्पत्तिप्रसङ्गात् । परो हि मोहादुत्पत्तिरहितामेव नीरूपां घटाद्यभिव्यक्तिं मन्यते । तत्स्वरूपं च नियमेन न प्रतीयते । ज्ञानजननसामर्थ्यमभिव्यक्तिरिति चेत्, तथा सति दुग्धघटाद्येवाभिव्यञ्जकेन क्रियत इति प्राप्नोति, सामर्थ्यस्य तदात्मभूतत्वात् । अर्थान्तरत्वे घटादावनुपकारप्रसङ्गात् । सामर्थ्याज्ज्ञानोत्पत्तेर्घटादीनां नित्यमग्रहणप्रसङ्गः, नाकारणं विषय उपपद्यत इति । तस्यापि तत्र सामर्थ्यमिति चेत्, केवलोऽपि जनयेत् । सहकार्यपेक्षया जनयति, न केवल इति चेत्, अनुपकार्यस्य केयमपेक्षा ? ज्ञानाभिव्यक्तिरिति चेत्, नित्यं घटाद्यग्रहणप्रसङ्ग इत्यादि सर्वं पुनरावर्तते । ततः परपरिकल्पिता अभिव्यक्तिर्नोपपद्यते । तस्मात् स न लिङ्गलिङ्गिभावः । तन्त्वाद्यवयवेभ्योऽन्यदवयवि द्रव्यं पटादि न कल्पनीयम्, ततः स्वभावानुपलब्ध्या सत्त्वस्य व्यक्तीकृतस्य तस्याभाव एव । ततस्तैस्तस्य तेन वा तेषामनुमानं कुतः ? तत्सत्त्वेऽपि कारणादनुमानं न युज्यते व्यभि-

१ "एकार्थसमवाय इति हि द्वेधा–एकस्यार्थस्य समवाय एकत्रार्थे समवाय इति ।" —न्यायवार्तिकतात्पर्यटीका. १ । १ । ५ ।

चारादित्युक्तम्। स्यादेतत्—कारणसामग्र्या कार्यसम्भवोऽनुमीयत इति। अयुक्तमेतत्, प्रत्यक्षस्य निश्चयात्मकत्वाभ्युपगमात् कारणं जनकमेव अभाविप्रतिबन्धम् अहोस्विद्-जनकमेवावश्यंभाविप्रतिबन्धम्? आद्यविकल्पे तत् तस्य रूपं प्रत्यक्षेण निश्चितमिति ततो विशिष्टकार्योत्पत्त्यनुमानमेव भवेत्, न च भवति, कथं कारणात् कार्यं परिच्छिद्य तदर्थे प्रवर्तमानस्य विसंवादो दृश्यते? द्वितीयपक्षे तु 'कारणमेव तन्न भवति' इति निश्चये सति ततः कार्योत्पत्त्यनुमानं कुतः? न हि 'अग्निः शीतस्याकारणम्' इति निश्चये सति केनचिदग्निना शैत्यसमुत्पत्तिरनुमीयत इति। एवं परमतेन कारणकार्येऽनु-मानस्य न हेतू।

**न संयोगोऽगतौ सिद्धेरिति** यद्ग्रहेऽपि यत्रानुमानं तत् तदनुमानस्य न कारणम्, यथाग्निर्जलस्य, अग्निधूमसंयोगाग्रहेऽप्यग्न्यनुमानं भवति इति व्यापकविरोधः। कथं पुनस्तदगतावपि सिद्धिरिति चेत्, आह—दृष्टत्वादित्यादि। संयोगस्य द्विष्ठत्वाद् द्वित्ववत् सर्वाश्रयदर्शनपूर्वकमेव ग्रहणं भवति, अनुमानकाले च सर्वाश्रयादर्शनात् संयोगग्रहणा-सम्भव एव, अथाप्यविनाभावित्वस्मरणाद् धूमेनाग्निरनुमीयते। स्यादेतत्—अयमज्ञात एवानुमानस्य हेतुर्भविष्यतीत्याह—**ज्ञानकारणत्वेनैव** चेत्यादि। स्वविषयज्ञानकारण-त्वेनेत्यर्थः। यतः सर्वं ज्ञापकं स्वविषयं ज्ञानमुत्पादयत् ज्ञेयार्थं ज्ञापयति प्रदीपवत्, अन्यथाऽगृहीतादपि धूमादग्नौ प्रतिपत्तिः स्यात्। **संयोगश्चे**(स्ये ? )त्यादि, यः संयोग-स्याधारः स द्वितीये प्रतियोगिनि प्रतिपत्तेर्हेतुः, यथा धूमः, अग्निरपि तथेति स्वभाव-प्रसङ्गमाह। स्यादेतत्—इष्यत एवैतदित्याह—दृष्ट इत्यादि। ननु धूमोऽप्यवस्था विशेषा-दिषु अग्निविनाभूतो दृष्ट एव, ततोऽनयोः को विशेषो येनैकत्राभिव्यञ्जकत्वप्रसङ्गश्चोद्यते नेतरत्र? अयमाशयः—यद्यपि धूमस्य संयोगित्वमिदानीन्तनं नास्ति तथापि भूतपूर्वम-स्त्येव, निमित्तवतां निमित्ताव्यभिचारात्, उत्पद्यमान एव धूमोऽग्निसंयोगी, अग्निस्तस्य निमित्तम्, अवश्यं च निमित्तानि निमित्तवति न वर्तन्ते। तस्मात् तदवस्थायां कचिदपि भूतपूर्वस्यापि संयोगित्वस्यासम्भव इति। एवं यस्मादग्निः कदाचिद्धूमस्य निमित्तं कदाचिच्च न तस्माद् व्यभिचारित्वात् तस्य धूमं प्रति नाभिव्यञ्जकत्वम्। संयोगस्यानु-मानकारणत्वेष्टौ तु तत् प्राप्नोतीति चोद्यते। अवचादादित्यादि। सन्दिग्धश्रुत्या अनैकान्तिकत्वमाह सन्दिग्धत्वात्। कथं पुनः संयोगित्वस्य तुल्यत्वेऽग्नेरनैकान्तिकत्वं कथं च न धूमस्येति चेत्, आह—न हि सोऽवश्यमित्यादि। अभेदत इति, संयोगो हि प्राप्तिः, तस्यां च भेदो नास्ति। ततश्च यथैकस्य प्राप्तिस्तथा द्वितीयस्यापीत्येकस्मि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ऽग्नावकारणं न युज्यते । स्यादेतत्—संयोगस्य कश्चिदाश्रयो व्यभिचारी यस्तत्र व्यभिचरति कश्चिदव्यभिचारी यो न व्यभिचरति । तत्र योऽस्याश्रयोऽव्यभिचारी स एव लिङ्गमिष्यते, नापरः, ततः संयोगो गृहीत इत्येव नानुमानस्य कारणम्, किं तर्हि? यदाऽयमस्याश्रयो व्यभिचारी अयं त्वव्यभिचारीत्येवमपि व्यभिचार्यव्यभिचार्याश्रयत्वेन विचारणापूर्वकं गृह्यते तत्रैवाव्यभिचारिण्याश्रये गमकत्वं गृह्यते । ततस्तेनैवाव्यभिचारिणाऽनुमीयते इति यथोक्तदोषोऽनास्पद इत्याह–नेत्यादि । संयोगस्य सकृदसकृद्वा ग्राह्यत्वे न कश्चिदात्मातिशय आधीयते येनासकृद् ग्राह्यः स संयोगोऽनुमानस्य कारणं भवेत् । यदि च स गृहीतोऽपि पुनर्व्यभिचार्यव्यभिचार्याश्रयत्वेन ग्रहणमपेक्षते तथा सत्यन्य एवाविनाभावसम्बन्धोऽभ्युपगतः, न संयोगः । ततस्तदभ्युपगमे युगपदेव ग्रहणं प्रमाणीकर्तव्यम् । ततश्चास्य व्यभिचार्यव्यभिचारित्वेन विचारणा कुत इति । यस्याविनाभावित्वं सम्बन्धस्तस्याप्ययं दोषः कुतो न भवतीत्याह—यस्य त्वित्यादि । अत्रश्यवचनं कृतकत्वनाशित्वादावविनाभावित्वस्याप्युभयत्र वृत्तेः । न च केनचिदंशेनेत्यादि । अग्नेर्यद् धूमसंयोगि रूपं तद्धूमगम्यम्, अग्न्यादिरूपवत्, दीप्त्यादिरूपमपि तथा; एवं धूमस्य यदग्निसंयोगि रूपं तदग्नेर्गमकम्, धूमत्वादिरूपवत्, द्रव्यादिरूपमपि तथेति स्वभावप्रसङ्गद्वयमाह । दीप्त्यादिश्रुत्या चात्र तद्वदग्निरूपमेवोच्यते, न गुण-सामान्ये, तयोः संयोगित्वासम्भवात् ।

यथा चेत्यादि यथोक्तदोषं सम्बन्धान्तरेऽप्यतिदिश्य दर्शयति । विरोधिषु सम्भवादिति सम्भववचनेन भूत एव विरोधिन्ययं प्रसङ्गो नाभूते तत्र सामान्यविशेषयोरनुपपत्तेरिति दर्शयति । लिङ्गस्येत्यादि, लिङ्गस्य धूमादेर्यदन्येन सामान्यं द्रव्यत्वादिरूपं ये च दीप्त्यादयो विशेषाः त उभयेऽपि प्रकाशकप्रकाश्या न भवन्ति । अत्र च व्यवहितसम्बन्धो द्रष्टव्यः–लिङ्गस्यान्येन सामान्यं लिङ्गिनश्च विशेषा प्रकाशकप्रकाश्या नेति । छन्दोनुरोधात् तथा पाठः । अन्यत्र वैशेषिकादीनां दर्शने सर्वथा प्रसङ्गः प्रकाशकस्य प्रकाश्यस्य च, संयोगादिसम्बन्धस्याविशिष्टत्वादिति । संयोगिमात्रप्रतीतिप्रसङ्ग इति संयोग्याकारेणानुमेयग्रहणं स्यादित्यर्थः । कुत एतदित्याह–अन्यथेत्यादि । सम्बन्धानुरूप्येण लिङ्गेन लिङ्गी गम्यते । ततः संयोगवशेन लिङ्गेन प्रतिपादितः संयोगिरूपेण गृहीतस्तेनैव रूपेण प्रतीयते, संयोगित्वस्य संयोग्यन्तरापेक्षत्वात् । तथा चोक्तम्–“यदास्येदं संयोगि प्रसिद्धमसन्दिग्धं च भवति ततोऽस्य सम्बन्धिग्रहणादगृहीतेऽपि सम्बन्धिन्यनुव्यवसायो भवति” [ ] इति । स्यादेतत्–अग्नि-

१ चिग्° चर्° खो° न° VT.। सकृदेव (?)॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रूपेणैव संयोगि, ततस्तद्रूपेणापि प्रतीयते, यच्च ' ततोऽस्य ' इत्याद्युक्तं तत्र ' सम्बन्धिनि ' इत्यनेन विशेष एव परामृश्यते, न संयोगप्रत्ययविरूपमात्रमिति चेत्, आह- अत्र च नेत्यादि । अथवा शङ्कामकृत्वा पूर्वपक्षे दोषान्तरमेवानेनाह । यदि धूमेन संयोगिनाग्निसत्ता साध्यते, अग्निधूमसंयोगोऽनुमानाङ्गं स्यात्, न[1] चेयं साध्यते, कुत इत्याह-तस्याः प्रतीतत्वादिति । किं तर्हि साध्यमित्याह—यत्रेत्यादि । कुत इति चेत्, ' अत्रायम् ' इति वचनाद् ' अत्र ' शब्देनाऽत्र देश आश्रयत्वेन प्रतीयते । नन्वाश्रयः सामान्यम् ' अत्र ' इति वचनेन साध्यते, ततस्तत्र विशेषप्रतीतिः कुत इत्याह— अन्यथेत्यादि । एतेन [2]विशेषा[द]र्थान्तरत्वासम्भवं द्योतयति । यत्र ' अत्र ' इत्यस्य पदस्यार्थान्तरासम्भवस्तत्र प्रवृत्त्याश्रयो विवक्ष्यते, यथायं कूप इति वाक्ये, ' अत्राग्निः ' इत्यत्रापि ' अत्र ' इति पदमसम्भवदर्थान्तरम् इति [3]कार्यम् । ननु विशेषणासिद्धिः, धूमस्यैव ' अत्र ' इत्यनेन विवक्षितत्वादिति चेत्, आह-धूमेऽग्निरित्यादि, प्रतिज्ञार्थैकदेशत्वं साध्यधर्मिण एव हेतुत्वेनाभिधानात् । ननु विशेषे प्रतिज्ञैकदेशे सामान्यं हेतुः, ततः कुतोऽयं दोष इति चेत्, अयमाशयः-अग्निधूमयोः संयोगसम्बन्धाभिलाषिणा हेतुरपि विशेषलक्षणात्मक एवाभ्युपगन्तव्यः, न सामान्यम्, अन्यथा द्रव्ययोरेव परस्परं संयोगो न सम्भवेत् । यतोऽयं शास्त्रेऽपीष्टः ततः प्रतिज्ञार्थैकदेशो हेतुः स्यात् । अत्राप्येतद् वक्तव्यमेव-' अत्र चाग्निसत्ता न साध्यते तस्याः प्रतीतत्वात् ' इत्यादि । तस्योत्तरस्य वाच्यत्वे किं यथोक्तदोषान्मुक्तिः । अत्र धूमविशेषेऽप्यग्नौ साध्ये स दोषस्तदवस्थ एव । तस्मादनुत्तरमेतत् । यद्येवं द्रव्ययोरेव परस्परं संयोग इति सिद्धान्तः नन्वेवमग्निरपि विशेष एव स्वलक्षणपर्यायः साध्यत्वेनाभ्युपगन्तव्यः, ततश्च साध्यसाधनयोः स्वलक्षणात्मकत्वात् सर्वो हेतुरसाधारणः स्यात्, दृष्टान्तश्च साध्यसाधनविकल इति चेत्, सत्यमेतत्, तत आह-तस्माल्लिङ्गलिङ्गिनोर्नावश्यं संयोग इति अत्र ' अभ्युपगन्तव्यः ' इति गम्यते । यस्मात् संयोगसम्बन्धे ईदृशो दोषस्तस्माल्लिङ्गलिङ्गिनौ संयोगसम्बन्धिनौ नैवाभ्युपगन्तव्यौ । अवश्यवचनेनावधारणं दर्शयति । किं तर्हि ? अविनाभावित्वमेवेति तत्र दोषाभावात् । ननु च तदपि सदोषमेव, अव्यापकत्वात् । यतस्तत् सर्वदा लिङ्गे न भवति, तथाहि-अग्निशून्यदेशकालयोरपि कदाचिद्धूम उपलभ्यत इति चेत्, आह- अपेक्षते देशकालावित्यादि । यावति प्रदेशे धूमोऽग्न्यभावे न दृष्टस्तदपेक्षयाऽविना-

१ न चात्र साध्यते D. ed. ॥ २ विशेषणस्यार्थान्तरत्वा...( ? ) ॥ ३ कार्यहेतुः ॥ ४ गङ्° लº D. ed. गङ्° दङ्° P. ed. । क्वापि (?) ॥ ५ तत्र निर्दोषत्वात् (?) ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भावित्वं भवति यावता कालेनाऽरणिनिर्मथनाद्यवस्थायाम् 'आदि'शब्देन ततोऽन्यस्यामवस्थायामग्निसन्निधानेऽपि धूमोऽग्निनाऽविनाभूत उपलब्धस्तदपेक्षयाऽविनाभावित्वम्।

समवायोऽपीत्यादि, यः सम्बन्धोऽनुपलब्ध एष नानुमानस्य कारणं यथा कारणकार्यभावोऽप्रसिद्धः कयोश्चित्, समवायोऽप्यप्रसिद्ध इति व्यापकानुपलब्धिमाह। सम्बन्ध इत्यादि दृष्टान्तप्रकाशनम्। नेत्यादि अस्यैव विवरणम्। अव्युत्पन्नस्यापीत्यादि, यस्य समवायिविषया न प्रतीतिस्तस्यापि विषाणादावविनाभावित्वस्मरणाद् गवादिसम्प्रत्ययो दृष्टः, तस्मादविनाभावित्वमेवानुमानस्य कारणम्, तं[1]द्भावाभावयोस्तद्वत्त्वात्, अङ्कुरस्य बीजवत्। अत्रापि तदेवेत्यादिनैकार्थसमवायिनि समवायस्य दोषवत्त्वमाह अत्रापीत्यादिना च योगस्य दोषवत्त्वम्। स्यादेतत्–"असन् सन्दिग्धश्चानपदेशः" [वै० सू० ३। १। ११] इत्यपवादोऽस्ति, ततः स्पर्शाद् वायो रूपं नानुमीयत इत्याह–व्यभिचारित्वे चेत्यादि। कारणकारणादिति, शरीरस्य कारणं शिरः, तस्यापि कारणं स्वावयवो ललाटम्, ततश्च कारणकारणात् कार्यकार्ये शरीरे सम्प्रत्ययो दृष्टः। कथं पुनः शरीरशिरोवयवयोरेकार्थसमवायः, यावता विग्रहभेदादेकार्थसमवायि द्विधा दर्शितम्? एकार्थेन समवाय इति विग्रहान्तराश्रयात्। तथाहि–शिर एकोऽर्थः, तेन च तयोरुभयोरपि समवायः। यथोक्तमिति तद्वचनमेव ज्ञापकमाह। यत्रेदं प्रसिद्धमसन्दिग्धं च भवति 'इमे शिरआदयो न शरीरानारम्भकाः, एतेषां विनाशे च शरीराविनाशो न सम्भवति, शिरआद्यविनाशे तदवयवाश्च न विभक्ताः' इति तत्रेदृशः प्रत्ययो जायते 'अभूच्छरीरं यस्या[2]यंमवयवावयवः' इति। तस्माद् द्विविधमेवेति नावधारयितव्यमिति। ननु दृष्टविनाशात् तत एव मस्तकात् सम्प्रत्ययः, न तदवयवात्, तत एवोक्तम्–अभूतादिति। न, अभावस्य कारणत्वायोगात्, अत्यन्ताभाववत्।

विरोधिनोऽनुमानकारणत्वनिराकरणायाह–यद् विरोधीत्यादि। वाय्वभ्रसंयोगस्य वर्षकर्मणा विरोध इति, तयोः सहानवस्थानात्। अत्र च वर्षकर्म न लिङ्गमिति तद्विरुद्धधर्मसाधनात्, किं तर्हि? तदभाव इति, वाय्वभ्रसंयोगे सति वर्षकर्माभावात्। वर्षकर्माभाववाय्वभ्रसंयोगयोश्च न विरोध इति सहावस्थानात्। स्यादेतत्–वर्षकर्मणो योऽभावः स तस्यैवावस्थविशेषः, ततो वर्षकर्मण एवावस्थाप्राप्तिर्लिङ्गमिति। कथं पुनरभावः सतो विशेषः? तद्विशेषत्वे चाभाव एव न स्यात्, विशेषस्य भावात्मभूतत्वात्,

---

१ 'तद्भावभावयोः' इति भोटभाषानुवादे ॥ २ 'यस्यायमवयवोऽवयवः' इति भोटभाषानुवादे ॥

अर्थान्तरत्वे च स एव दोषः ‘यद् विरोधि न तल्लिङ्गम्’ इत्यनुत्तरमेतत् । एवमन्यत्रापि वक्तव्यमिति, यत्राभूतं लिङ्गं तत्रापि वाय्वभ्रसंयोगाभावस्य वर्षकर्माभावेन विरोधात्, अत्र च वर्षकर्माभावो न लिङ्गम्, किं तर्हि ? वर्षकर्म, वर्षकर्मवाय्वभ्रसंयोगाभावयोश्च न विरोधः । एवं ‘भूतं भूतस्य’ इत्यत्रापि द्रवत्वकर्मणः स्यन्दनस्य सेतुबन्धेन विरोधः, स्यन्दनं च न लिङ्गम्, किं तर्हि तदभावः । एवम् ‘अभूतमभूतस्य’ इत्यत्रापि श्यामताग्निसंयोगयोर्विरोधः, अत्र च न तयोर्लिङ्गलिङ्गिभावः, किं तर्हि ? तन्निवृत्त्योः ।

यच्चोक्तमिति “सदनित्यं द्रव्यवत् कार्यं कारणं सामान्यविशेषवदिति द्रव्यगुणकर्मणामविशेषः” [वै० सू० १ । १ । ७] इति वचनाच्छास्त्रे द्रव्यगुणकर्मणामेव कारणभाव उक्तः, अत्र च ‘अभूतं भूतस्य’ इत्यादिनाऽभावकारणवचनात् कथमभावो भावस्य लिङ्गमिति पृच्छति । अभावो भावस्य लिङ्गमस्माभिर्नोच्यते, किं तर्हि ? अभूतादिप्रतीतिः । कुत इति चेत्, प्रसिद्धिपूर्वकत्वादपदेशस्य [वै० सू० ३ । १ । ८] इति । यस्य ‘धूमोऽग्नेः संयोगी’ इति पूर्वं सम्बन्धग्रहणकाले प्रसिद्धं भवति तस्यैव धूमदर्शनादग्नावनुमानं नेतरस्य । ततो धूमादिप्रतीतिरेव लिङ्गम्, तद्विषये तु लिङ्गत्वमुपचर्यते यथा चन्दनस्य तुलेति । असम्बन्धान्न लिङ्गधीरिति यो येन सहासम्बद्धः स तस्य न लिङ्गम्, यथा घटः पटस्य, लिङ्ग्यपि लिङ्गधियाऽसम्बद्ध इति व्यापकानुपलब्धिमाह । सम्बन्धार्थं चेत्यादि, आत्मनि प्रसिद्धमित्युक्ते परेणोक्तम्–आत्मनि प्रसिद्धं न लिङ्गम्, अन्यत्वात्, अर्थान्तरेणार्थान्तरस्याप्रतिपादनात्, अतिप्रसङ्गात् । तत इदं सूत्रमुपन्यस्तम् । एवमुक्तं भवति–सर्वमर्थान्तरस्य न लिङ्गम्, किं तर्हि ? यदेव कारणकार्यादिसम्बन्धानामन्यतरेण सम्बद्धं तदेवापदेश इति ।

लैङ्गिकत्वेन निर्देशादिति, लैङ्गिकमिति वचनादस्मिन् सूत्रे लिङ्गज्ञानं लैङ्गिकत्वेन निर्दिश्यते, ततस्तस्य लिङ्गत्वप्रतिज्ञानेऽभ्युपगमबाधा । अथानुमेयज्ञानमत्र लैङ्गिकत्वेन निर्देष्टुमभिप्रेतं न लिङ्गज्ञानमिति चेत्, आह—अनुमेयज्ञानस्येत्यादि । यदि लिङ्गज्ञानं लैङ्गिकमिष्यते तदनुमेयज्ञानमत्र विफलं स्यात् । अनुमेयज्ञानस्य लैङ्गिकत्वे तु तदुत्पत्तौ सोऽर्थः प्रतीत इति फलाभावः, ततः सैवाभ्युपगमबाधा । स्यादेतत्–लिङ्गज्ञानं लिङ्गम्, सम्बन्धस्मरणं लैङ्गिकम्, अनुमेयाधिगतिः फलमित्यत आह—स्मरणमात्र इत्यादि । यदि सम्बन्धस्मरणं प्रमाणं तथा सति येन लिङ्गमदृष्टं तस्यापि धूमसम्बन्धस्मरणादग्निप्रतीतिः स्यात्, ‘मात्र’शब्दो धूमदर्शननिरासाय । तेन सहितं सम्बन्धस्मरणं त्वनुमानमिष्यत एव । यदाह–“ तदिदं च साक्षात् परम्परया चानुमितिकारण-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्वादुभयमप्यनुमानम् " [ ] इति। इतिकारनिर्देशादिति, 'विरोधि च' इति सूत्रान्ते इतिकारपाठात् 'अस्येदं कार्यम्' इत्यादि यज्ज्ञानं तदितिना करोति प्रकाशयति। यद्येवं लिङ्गज्ञानस्य लैङ्गिकत्वेऽनवगतविशेषस्यापि लिङ्गदर्शनमात्रादधिगतिः स्यादित्यत आह—सम्बन्धस्मरणापेक्षयेति, सम्बन्धस्मरणापेक्षत्वं तस्य 'प्रसिद्धिपूर्वकत्वादपदेशस्य' [वै० सू० ३।१।९] इत्यतो लभ्यते।

कारणीकृत्येति, लिङ्गशब्दोऽयं कारणपर्यायः धातूनामनेकार्थत्वात् लिङ्ग्यते जन्यते कार्यमनेनेति व्युत्पत्तेः। लिङ्गप्रतीतिश्चानुमेयप्रतीतेः कारणं भवति, ततो यदुक्तम् 'असम्बन्धान्न लिङ्गधीर्लिङ्गम्' इति अस्य सिद्धसाध्यत्वं कारककारणस्य कारणत्वेन विवक्षितत्वादिति चेत्, तदपि नेत्यादिना निराकरोति। अनुमेयलक्षणभूतस्येति ज्ञापकभूतस्येत्यर्थः, अनुमेयं लक्ष्यते ज्ञाप्यते[ऽनेन] इति कृत्वा। अन्यथेति यदि जनकस्यापि लिङ्गस्याधिकार आत्मेन्द्रियमनोर्थसन्निकर्षोऽपि वाच्यः, तेऽप्यनुमेयज्ञानस्य कारणानीति। न तूच्यते। तस्मादत्र जनकस्य नाधिकार इति। स्यादेतत्–अनुमेयज्ञानं प्रति लिङ्गज्ञानस्य साक्षात् कारणत्वं नान्यस्य। ततः साक्षात् कारणत्वाल्लिङ्गज्ञानमेवोच्यते इति चेत्, आह–न साक्षादित्यादि। कथं नेत्याह–सम्बन्धस्मरणेन व्यवहितत्वादिति। सम्बन्धस्मरणं सिद्धमिति, अस्माद् वचनात् सम्बन्धस्मरणं सिद्धं न तु सम्बन्धिधूमादिप्रतीतिः, तथाहि भाष्यात्[1] "यस्य धूमादीनामग्न्यादिभिः सम्बन्धः सिद्धः" [ ] इत्यादि[2]। इत्युक्तमित्यस्मिन्नर्थे ज्ञापकमाह। यतस्तत्रैवोक्तम्—"प्रसिद्धिपूर्वक एवापदेश इति कथं प्रतीयत इति चेत्, उच्यते–अर्थान्तरभावे सति यस्मादप्रसिद्धोऽनपदेशः। कथम्? यस्य धूमादीनामग्न्यादिभिः सह सम्बन्धोऽप्रसिद्धस्तं प्रति धूमादयोऽनपदेशः" [ ] इति। तस्माल्लिङ्गज्ञानस्य लैङ्गिकत्वे एतदज्ञापकम्।

सूत्रे कार्याद्यभाषितमिति शास्त्रे 'कार्यत्वात्[3] कारणतो[4] विकारात् संयोगाद्[5] विभागाच्छब्दाच्च शब्दनिष्पत्तेः शब्दोऽनित्यः' इति कार्यत्वादयः शब्दानित्यत्वे हेतव उक्ताः। एवं 'सदकारणवन्नित्यम्[6]' इति नित्यत्वसाधनाय सदकारणवत्त्वमुक्तम्। ते च कार्यत्वादयो लिङ्गत्वेन नाख्याता इति वैकल्यं लक्षणस्य। तत्र स्यादेतत्–तेषामपि कार्यत्वादीनामन्तर्भाव इति चेत्, आह–एतेषामित्यादि, एतेषामनित्यत्वादिलिङ्गानाम्

१ बृशद्° ऽग्रेल्° लस् VT. । भाष्ये (?) ॥ २ इत्यादिना D. ed. ॥ ३ वै० सू० २।२।३२ ॥ ४ वै० सू० २।२।३४ ॥ ५ वै० सू० २।२।३६ ॥ ६ वै० सू० ४।१।१ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अन्यतमदिति एकमपीत्यर्थः । ननु कार्यत्वं सद्कारणत्वं चैकार्थसमवायित्वान्तर्भूतम् एकस्मिन्नर्थे शब्दादौ कार्यत्वानित्यत्वयोः आत्मादौ च नित्यत्वसद्कारणत्वयोः समवायादिति चेत्, नैतदस्ति, एकार्थसमवायि हि कार्यं कार्यान्तरस्य कारणं कारणान्तरस्येत्युक्तम्, अत्र च कार्यकारणभावासम्भवः । व्यङ्ग्यव्यञ्जकताया इति, अनित्यत्वं व्यङ्ग्यत्वात् कार्यम्, कार्यत्वं तु व्यञ्जकत्वात् कारणमिति । एवमन्यत्रापि वेदितव्यम् । शेषमव्यञ्जकं प्राप्तमिति, अन्यथा भेदेन निर्देश एव न स्यात्, स चास्ति । ततो व्यङ्ग्यव्यञ्जकत्वेनात्र कार्यकारणत्वमभिप्रेतमिति नावगन्तव्यम् ।

अन्यतरस्तद्गतेर्वृथेति, वृथा निष्प्रयोजनम्, अन्यत इत्यविनाभावात्, अविनाभावित्वेन धूमादिलिङ्गादनुमेयमधिगम्य 'अस्येदं व्यञ्जकम्' इति मनसा कल्प्यते ततो व्यर्थमेतदनुमानकारणं कल्प्यत इति शेषः । अथवा प्रतिपाद्यत इति प्रकृतमत्रापि सम्बध्यते, परेण निष्प्रयोजनमेवैतदनुमानकारणं प्रतिपाद्यत इत्यर्थः ।[1] अन्ये पुनरेवं वदन्ति–अविनाभाव एव सम्बन्धोऽनुमानस्य कारणं शास्त्रेऽत्र निर्दिश्यते, अनुमानभेदप्रदर्शनार्थं तु कार्यकारणभावादिसम्बन्ध उपात्तः, ततश्च सर्वदोषाभाव इति । तदयुक्तम्, कारणस्य लिङ्गत्वेन निर्देशात् तत्र चाविनाभावाभावात्[2] सम्भवानुमानस्य च पराभिप्रायेणासम्भवादिति ।–VT.D.ed. पृ० ११०a–११७b । P.ed. पृ० १२४a–१३३b ॥

---

१ तुलना—"शास्त्रे कार्यादिग्रहणं निदर्शनार्थं कृतं नावधारणार्थम् । कस्मात्? व्यतिरेकदर्शनात् । तद्यथा अध्वर्युरों श्रावयन् व्यवहितस्य हेतुर्लिङ्गम्; चन्द्रोदयः समुद्रवृद्धेः कुमुदविकाशस्य च, शरदि जलप्रसादोऽगस्त्योदयस्येत्येवमादि । तत् सर्वम् 'अस्येदम्' इति सम्बन्धमात्रवचनात् सिद्धम् ।" **प्रशस्तपादभाष्य**० पृ० १०४ ॥ २ दृश्यतां पृ० १९० पं० १–८ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## अथ सवृत्तिके प्रमाणसमुच्चये

### तृतीये परार्थानुमानपरिच्छेदे वैशेषिकमतपरीक्षा ।

*[1]समुदाय्येव धर्मः स्याद् न साध्यौ धर्मधर्मिणौ ॥ ५४ ॥
विशेषः साध्यवद्धर्मः प्राप्तोऽन्यस्याप्यनिश्चितः ।
आकाशाद्यस्तितासिद्धौ प्रयोगो नोपपद्यते ॥ ५५ ॥

वैशेषिकाणामपि " तद्वद्धर्मस्य हेतुः [ ] अभिधानमिति वर्तते । [2]अत्र च [3]तच्छब्देन यदि साध्याभिधानं सम्बध्यते तेन साध्यमेव तद्वद् भवति, [4]तच्च समुदायो धर्मो धर्मी वा स्यात् ? यदि समुदायस्तर्हि [5]समुदाय्येव[6] धर्मः स्यात्, शब्दोऽनित्य इत्यत्र समुदायेऽनित्यत्वं धर्म इत्यनित्याभिधानं हेतुः स्यात्, न हि समुदाये धर्मान्तरमस्ति । " विषाणी तस्मादश्वः " [ वै० सू० ३ । १ । १२ ] इति साध्येऽत्रापि विषाणित्वं धर्मत्वाद्धेतुः स्यात् । अथ धर्मः, तत्र कृतकत्वादि न सम्भवति । अथ धर्मी, तन्न, तस्य सिद्धत्वात् । अनित्यत्वेन [7]साध्य इति चेत्, न, [8]समुदायार्थस्य साध्यत्वात् । ' अनित्यत्वस्य शब्दः, शब्दस्यानित्यत्वम्, शब्दोऽनित्यः ' [9]इत्येते समुदायार्था व्यवच्छेदफलत्वात् । एवमत्र समुदायार्थ एव साध्यः सम्भवति, न साध्यौ धर्मधर्मिणौ [10]*तौ साध्यौ न सम्भवतः सदोषत्वात् । नापि समुदायः पूर्वोक्तदोषत्वात् * ।

अथ गुणभूतमपि साध्यं तच्छब्देन सम्बध्यते, तत्र समुदायेन धर्मिणा वान्यस्तद्वान् नास्ति यस्य तद्वतो धर्मः स्यादिति धर्मोऽनित्य[त्व]मेव [11]साध्यमवश्यमभ्युपगन्तव्यम् । ततः शब्द एव तद्वानिति तस्य यो धर्मः स

---

१ ' **समूहस्यैव धर्मः स्यात्** ' इत्यपि भवेत् पाठः ॥ २ ' अत्रापि ' इत्यपि भवेदत्र पाठः ॥ ३ तदिति शब्देन साध्याभिधानमभिसम्बध्यते तेन साध्यमेव तद्वदित्युक्तं भवति V ॥ ४ ' तच्च किं समुदाय उत धर्म आहोस्विद् धर्मी ' इत्यपि भवेत् पाठः ॥ ५ ' **समूहस्यैव धर्मः स्यात्** ' इत्यपि पाठो भवेत् ॥ ६ समूह (?) एव धर्मः स्यात्, अत्र शब्दोऽनित्य इति समुदायेऽनित्यत्वं धर्म इति तदभिधानं हेतुः स्यात्, न हि समुदायस्य धर्मान्तरमस्ति । विषाणित्वादश्व इत्यत्रापि साध्ये [ विषाणित्वं ] समूहस्यैव धर्म इति हेतुः स्यात् । अथ धर्मः, तस्य कृतकत्वादि न सम्भवति V ॥ ७ ' **साध्यते** ' इत्यपि पाठः स्यात् ॥ ८ समुदायार्थत्वात् । K ॥ ९ ' इत्येतेषां समुदायोऽर्थः ' इत्यपि भवेत् पाठः ॥ १० * असम्भवः सदोषत्वात् * K ॥ ११ ' साध्यत्वेनावश्यमभ्युपगन्तव्यः ' इत्यपि भवेत् पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हेतु[1]रिति चेत्, तत्रापि [2]साधारणविशिष्टयोः [3]विशेषः साध्यवद्धर्मः प्राप्तः *[4]साध्यवत एव धर्म इत्यवधारणात्* । न हि साध्यवतो धर्म एवेत्यवधारणे किमपि प्रयोजनम्, [5]धर्मिणि प्रसङ्गाभावात् । ततः ' साध्यवत एव धर्मः ' इति सामीप्यात् [6]तत्र प्राप्नोति । तथा च शब्दो[ऽ]नित्यः श्रावणत्वादित्यपि हेतुः स्यात् । साध्यधर्मेऽपि तुल्यमिति चेत्, न, तस्य ' अन्यत्र द्वेधा वर्तते ' इति विशेषणात् । [7]असाधारणस्त्वन्यत्र न वर्तते इति न तुल्यम् ।

अनित्यत्वमात्रसाध्यत्वे [8]च शब्दात् अन्यस्यापि तद्वतो घटादेर्धर्माभिधानस्य हेतुभूतत्वाच्चाक्षुषत्वाभिधानमपि हेतुः स्यात् । किञ्च, अनिश्चितः, [9]अनिश्चित इति संशयहेतुर्व्यभिचारी, सोऽपि हेतुः स्यात्, यथा[ऽ?]नित्योऽमूर्तत्वादिति । तन्मात्रमपि विकल्पनीयम् । सर्वथापि न युज्यते । तस्मात् तद्वत्साधर्म्याव्यभिचारीति वक्तव्यम् । *[10]तथा [11]सति तद्वत्साधर्म्यस्य साध्यत्वाद् धर्मान्तरं परिहृतं भवति [12]श्रावणत्वं च* । अव्यभिचारिवचनादवधारणाच्च व्यभिचारिधर्माभिधानं परिहृतम् । [13]यथापूर्वोक्तदोषः

**[14]आकाशाद्यस्तितासिद्धौ प्रयोगो नोपपद्यते ।**

तत्र प्रतिज्ञावतः साध्यवतो वा धर्मोऽसिद्धः, धर्मिणोऽसिद्धत्वात् । तस्मात् प्रयोगोऽपि [15]असम्बन्धाद्धेतुर्नोपपद्यते ।

❀ ❀ ❀

---

१ इति चेत् V नास्ति ॥ २ ' साधारणविशिष्टयोः सद्भावे ' इत्यपि K अनुसारेण भवेत् पाठः । ' साधारणो विशेषश्च साध्यवद्धर्मः स्यात् ' V अनुसारेण पाठो भाति ॥ ३ ' विशिष्टः ' इत्यपि पाठो भवेत् ॥ ४ * * एतदन्तर्गतः पाठो VT. मध्य एव दृश्यते ॥ ५ ' धर्मिणोऽप्रसक्तत्वात् ' इत्यपि पाठश्चिन्त्यः ॥ ६ तद्धर्मः प्राप्नोति V ॥ ७ ' असाधारणस्य त्वन्यत्रावृत्तेर्न तुल्यम् ' इति ' असाधारणस्त्वन्यत्रावर्तमानत्वाद् न तुल्यः ' इति वा पाठोऽप्यत्र भवेत् ॥ ८ **च** V नास्ति ॥ ९ अनिश्चितश्च संशयहेतुर्व्यभिचारी, स हेतुः स्यात् K ॥ १० ** ' तथा सति तद्वत्साधर्म्यस्य साध्यत्वाद् अधर्मस्य श्रावणत्वस्य च परिहारः K । तथा सति तद्धर्मसाधर्म्याद् धर्मान्तरं परिहृतं भवति । श्रावणत्वं V । तथा सति धर्मान्तरं परिहृतं भवति VT. ॥ ११ ' एवं हि ' इत्यपि पाठोऽत्र स्यात् ॥ १२ श्रावणत्वं व्यभिचारिवचनं च ' अव्यभिचारि ' इत्यवधारणात् V । VT. मध्ये तु ' धर्मान्तर 'शब्देनैव श्रावणत्वस्य संग्रहः कृतो भाति । अतस्तदनुसारेण **श्रावणत्व**पदमनावश्यकमत्र भाति ॥ **१३** पूर्वत्र यथोक्तो दोषः V । पूर्वोक्ते यथोक्तो दोषः K । (**यथापूर्वोक्तवद् दोषः ?**) ॥ १४ ' **गगनाद्यस्तितासिद्धौ** ' इत्यपि भवेत् पाठः ॥ १५ असम्बन्धान्न हेतुः । K ॥

अ[1]भावो वा विरुध्येत विपरीतं [2]न्यूनाभिधा ॥ ६३½ ॥

वैशेषिकाणां त्रिविधो हेत्वाभासः–"अप्रसिद्धोऽनपदेशः, असन् सन्दिग्धश्च" [ वै० सू० ३ । १ । १०, ११ ] इति । अप्रसिद्धस्तावद् न हेत्वाभासः, किं तर्हि ? दृष्टान्तस्य अभावो वा अप्रसिद्धार्थत्वं वा हेत्वर्थेन । 'वा'शब्दो विकल्पार्थः । एवं हि स दृष्टान्तेऽप्रसिद्धः । अथापि साध्य एवाप्रसिद्ध उच्यते त[3]था सति हेत्वर्थो विरु[4]ध्येत* 'प्रसिद्धिपूर्वकत्वादपदेशस्य' [ वै० सू० ३ । १ । ११ ] इत्यत्र सम्बन्धकाले प्रसिद्ध इत्युच्यते ।

असन्नपि नासन् । सन्दिग्धोऽपि न सन्दिग्धः । वि[5]षाणित्वं हि *प्र[6]सिद्धत्वात्* प्रसिद्धं कृत्वा तत्रोदाह्रियते–यदि विषाणी तस्मादश्वो विषाणी [तस्माद्] गौरिति च [ वै० सू० ३ । १ । १२ ] । अथापि असतो हेतुरसन् सन्देहस्य हेतुः सन्दिग्ध इति चेत्, अ[7]सतस्तावन्न हेतुरसन्मात्रस्याप्रतीतेः । न हि तत्राश्वाभावमात्रं ज्ञायते, किं तर्हि ? विपरीतम्, अ[8]नश्वज्ञानं तत्र गौरित्यर्थे, नाभावज्ञानम् । तस्मादयं विपरीतसाधनाद्[9] विरुद्धः ।

सन्देहहेतोश्च सन्दिग्धाभिधाने न्यूनाभिधा । 'विषाणित्वाद् गौः' इत्ययमेव न सन्देहहेतुः, किं तर्हि ? असाधारणोऽपि, यथा षट्सु पदार्थेषु श्रावणत्वम्, तद्धि सर्वत्राभावाद् अ[10]नेकविषयसंशयहेतुः । ये[11] आहुः–विशेष उभयत्र दृष्टत्वाद्दूर्ध्वत्वादिवत् सामान्यमेवेति, तदयुक्तम्, न हि यतो व्यावृत्तिस्तदा[12]भासः संशय उपपद्यते मा भूदेकद्रव्यवत्त्वात् पृथिव्यादिषु संशय इति । त[13]स्मादयं सर्वतो

---

१ अभावो वा प्रसिद्धत्वात् PS² ॥ २ 'न्यूनं वचः' इत्यपि पाठोऽत्र स्यात् ॥ ३ तथा सति प्रसिद्धिपूर्वकत्वादपदेशस्य हेत्वर्थो विरुध्येत । अत्र सम्बन्धकाले प्रसिद्ध उच्यते K ॥ ४ ** अयं PS¹ अनुसारेण कारिकांशः ॥ ५ प्रसिद्धत्वाद् विषाणित्वमत्रोदाह्रियते K ॥ ६ ** अयं PS² अनुसारेण कारिकांशः ॥ ७ 'अभावस्य' इत्यपि पाठोऽत्र स्यात्र ॥ ८ तत्र विषाणित्वादनश्वज्ञानं जायते, न तज्ज्ञानम्, तस्मादयं विपर्ययसाधनाद् विरुद्ध एव V ॥ ९ तुलना–"यो ह्यनुमेयेऽविद्यमानोऽपि तत्समानजातीये सर्वस्मिन् नास्ति तद्विपरीते चास्ति स **विपरीतसाधनाद् विरुद्धः** यथा यस्माद्विषाणी तस्मादश्व इति ।"—**प्रशस्तपादभाष्य** पृ० ११७ ॥ १० अनेकविषये संशयकारणम् K ॥ ११ "ननु चायं विशेषः संशयहेतुरभिहितः शास्त्रे-तुल्यजातीयेष्वर्थान्तरभूतेषु विशेषस्योभयथा दृष्टत्वात् [ वै० सू० २ । २ । २६ ] इति । न, अन्यार्थत्वात् । शब्दे विशेषदर्शनात् संशयानुत्पत्तिरित्युक्ते नायं द्रव्यादीनामन्यतमस्य विशेषः स्याच्छ्रावणत्वम्, किन्तु **सामान्यमेव** सम्पद्यते । कस्मात् ? तुल्यजातीयेष्वर्थान्तरभूतेषु द्रव्यादिभेदानामेकैकशो विशेषस्योभयथा दृष्टत्वादित्युक्तम्, न संशयकारणम्, अन्यथा षट्स्वपि पदार्थेषु संशयप्रसङ्गात् । तस्मात् सामान्यप्रत्ययादेव संशयः ।"—**प्रशस्तपादभाष्य**. पृ० १२०–१२१ । "समानानेकधर्मोपपत्तेर्विप्रतिपत्ते-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्यावृत्त्यसम्भवात् सर्वाभासस्य [संशयस्य V] हेतुरसाधारणत्वादन्य एव

रुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः [न्याय० सू० १।१।२३]।...अनेकधर्मोपपत्तेरिति। समानजातीयमसमानजातीयं चानेकम्। तस्यानेकस्य धर्मोपपत्तेः–विशेषस्योभयथा दृष्टत्वात्। समानजातीयेभ्योऽसमानजातीयेभ्यश्चार्था विशिष्यन्ते गन्धवत्त्वात् पृथिवी अबादिभ्यो विशिष्यते गुणकर्मभ्यश्च। अस्ति च शब्दे विभागजन्यत्वं विशेषः। तस्मिन् द्रव्यं गुणः कर्म वेति सन्देहः विशेषस्योभयथा दृष्टत्वात् किं द्रव्यस्य सतो विशेष आहोस्विद् गुणस्य सत इति अथ कर्मणः सत इति।"—**न्यायभाष्य.** १।१।२३। "अनेकधर्मोपपत्तेः संशय इति। अनेकस्यानेकश्च धर्म इति केचित्। अनेकस्य धर्मोऽनेकधर्मः। अनेकस्य द्रव्यगुणकर्मलक्षणस्य संयोगजत्वं धर्मः, अनेकश्च धर्मः संयोगजत्वनिर्गुणत्वक्षणिकत्वानि शब्दे। तदेवमनेकधर्मोपपत्तेः संशय इति केचित्। तदयुक्तम्, समानधर्मोपपत्तेरित्यनेनैव चरितार्थत्वात्।...अथानेकधर्मशब्दस्य कोऽर्थः? असाधरणो धर्म इति। कथं पुनरसाधारणो धर्मोऽनेकधर्म इत्यनेन समासपदेनाभिधीयते? समानासमानजातीयविशेषकत्वात्। समानजातीयमसमानजातीयं चानेकम्, तस्माद्विशेषो विशेषो धर्मः। अनेकस्माद्विशेषोऽनेकधर्मः, तस्य वानेकस्य धर्मो यथास्वं सोऽयमनेकधर्म इति।...यथा शब्दस्य विभागजत्वं सामान्यविशेषसमवायेभ्य शब्दस्य सदादिना विशेषेण निर्भक्तस्य। तस्मिन् द्रव्यं कर्म गुण इति विभागजत्वात् संशयः। न हि द्रव्यगुणकर्मणामन्यतमं विभागाज्जायमानं दृष्टम्। सर्वत्रासम्भवाद् विभागजत्वं संशयं करोति सर्वतो व्यावृत्तेरिति।...तदेवं विभागजत्वं विभागजविभागासमवायिकारणत्वं वा नर्ते शब्दात् सम्भवतीति सर्वतो व्यावृत्तेः संशयहेतुः। तुल्यजातीयेष्वर्थान्तरभूतेषु च विशेषस्योभयथा दृष्टत्वादिति।–" **न्यायवार्तिक.** १।१।२३। यतोऽनेकस्मात् समानासमानजातीयादेव स्वाश्रयं व्यावर्तयति अतोऽनेकापादानकव्यावृत्तिहेतुत्वाल्लक्षणयाऽनेक इत्युच्यते।...समानजातीयमसमानजातीयं चानेकम्, तस्य धर्मो निवर्तकतया।...... स्यादेतत्–यद् येन सहचरितं दृष्टं तत् क्वचिद्दृश्यमानं तत् स्मारयत् तद्विरुद्धेनापि सम्बन्धादनिश्चाययत् संशयहेतुर्भवति, यथा समानो धर्मः। असाधारणस्तु धर्मो विभागजत्वं न ऋते शब्दात् क्वचित् पृथिव्यादौ वा उत्क्षेपणादौ गन्धादौ वा दृष्ट इति कथं स्मारयेत्, अस्मारयन् कथं संशयं जनयेत् इत्यत आह—विभागजत्वं संशयं करोति सर्वतो व्यावृत्तेरिति। अयमर्थः—यद्यपि विभागजत्वं न द्रव्यादौ कचिद् दृष्टम्, तथापि तद्व्यतिरेकः प्रत्येकं द्रव्यादौ दृष्ट इति विभागजत्वेन सदाद्यविशेषवान् शब्दो द्रव्यकर्मभ्यां व्यावर्तमानः किं गुणः, गुणकर्मभ्यां व्यावर्तमानः किं द्रव्यम्, गुणद्रव्याभ्यां व्यावर्तमानः किं कर्म? इति व्यतिरेकमुखेण तत् तत् स्मारयन् असाधारणो धर्मो भवति संशयकारणमिति।...... ननु सहचरितो दृष्टः स्मारयन् विशेषः संशयहेतुर्भवति न तु यो व्यावृत्तः तेनासाहचर्यादिति शङ्कामपनेतुं भाष्यकारीयमुत्तरमाह—तुल्यजातीयेष्विति। यद्यपि व्यतिरेकमुखेणासाधारणः शक्तः स्मारयितुं तथापि भाष्योक्तमप्युक्तम्। यत् खलु सदादिरूपसम्पन्नं विशेषवत् तत् समानजातीयेभ्योऽसमानजातीयेभ्यश्च व्यावृत्तं यथा पृथिवी द्रव्यमबादिभ्यो द्रव्यान्तरेभ्यो गुणकर्मभ्यश्च विजातीयेभ्यो गन्धवत्त्वेन व्यावृत्तं द्रव्यजातीयम्, एवं रूपत्वेन रूपं गुणः, उत्क्षेपणत्वेनोत्क्षेपणं कर्म। तथाविधः शब्दः सदादिरूपसम्पन्नो विभागजत्वेन समानासमानजातीयेभ्यो विशिष्यते तस्माद् द्रव्यं गुणः कर्म वेति संशय इति।......असाधारणो हि धर्मो व्यतिरेकमुखेण संशयहेतुः। स चानेकस्माद्व्यावृत्त्या सिध्यति।... अनेकस्माद्व्यावृत्तो**ऽनेकधर्म** इति विग्रहेण निर्वर्ण्यत इति।" —**न्यायवार्तिकतात्पर्यटीका.** १।१।२३॥ १२ °स्ततसंशय उपपद्यते K॥ १३ तस्मात् सर्वथा (सर्वत्र?) संशयहेतुरन्योऽसाधारण एव नोक्तः V॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नोक्तः । एवं विरुद्धा[1]नैकान्तिकोऽनेको नोक्तः यथा किं पृथिव्यादिभिः [2]संहतस्य[3] शरीरस्यारम्भ आहोस्वित् स्वस्वजातीयारम्भ इति संशयः पञ्चानां लिङ्गोपलब्धेर्विजातीयारम्भनिषेधाच्च । एतेन संशयसूत्रवैकल्य[4]म[5]पि उक्तम् । अत्र च सामान्यप्रत्यक्षत्वेऽपि [6]कुन्दशौक्ल्याद् रूपत्व-गुणत्वा-ऽऽश्रितत्व-निर्गुणत्वादिषु निश्चयो दृष्टः, न संशयः, [7]तस्मादव्यवच्छेदहेतुः सामान्यं [8]तत् प्रत्यक्षत्वे संशयकारणमिति नोक्तम्, तस्माद् न्यूनत्वम् । यदि च [9]असतो हेतुरसन् सन्देहस्य हेतुः सन्दिग्धः [ तथापि ] यः साध्येऽसन् सन्दिग्धश्च स नोक्तः, [10]तथा चात्यन्तं न्यूनोक्तिः–[11]यथाऽनित्यत्वे साध्ये शब्दे चाक्षुषत्वमनपदेशः, धूमा[12]दित्वेनाग्न्यादौ साध्ये [13]क्वचिद्देशे सन्देहः । एवं वैशेषिकाणां हेत्वा[14]भासो दुर्विहितः । सप्रतिरूपो हेतुरुक्तः ।

## [ इति ] प्रमाणसमुच्चये तृतीयः परार्थानुमानपरिच्छेदः ।

### विशालामलवती टीका ।

तद्वद्धर्मस्य हेतुरिति । तदस्मिन्नस्तीति तद्वान्, तद्वतो धर्मस्तद्वद्धर्मः । सम्बन्धित्वमात्रस्य हेतुत्वे प्रसक्ते तद्व्यवच्छेदायाह–अभिधानमिति वर्तत इति । ‘ साध्याभिधानं प्रतिज्ञा ’ इति प्रकृतम् । ततोऽयं वाक्यार्थः–तद्वद्धर्माभिधानं हेतुरिति । यदि साध्याभिधानं सम्बध्यते इति तस्य प्रधानत्वात् तेन च साध्यमेव तद्वदिति सम्बन्धिशब्दत्वादभिधानाभिधेयमेव तेन तद्वद् भवति । तथाहि–पुत्रवानित्युक्ते पितैव तद्वान् भवति । नन्वाकाशमपि तेन तद्वद् भवति तस्य तत्समवायित्वादिति चेत्, सत्यम्, तथापि

---

१ एवं विरुद्धैकान्तिक एवानेको यथा...K ॥ २ सम्भूय शरीरस्यारम्भ उच्यते आहोस्वित् स्वस्वजातीयस्येति संशयः V ॥ ३ अत्र K मध्ये ‘ **लुस्° पऽ** ’–इति पाठः, किन्तु ‘**ऽदुस्° पऽ**’ इति पाठोऽत्र शुद्धो भाति ॥ ४ वैकल्यम् (?) इत्युक्तम् V ॥ ५ मपि पुनरुक्तम् K ॥ ६ कुन्दशौक्ल्यरूपत्वगुणत्वा...K । उत्पलशौक्ल्याद् गुणत्वा...V ॥ ७ “ अव्यवच्छेदहेतोरिति वक्तव्यम् । यदिदं समानधर्मोपपत्तेरिति पदमेतस्मिन्नव्यवच्छेदहेतोः समानस्य धर्मस्योपपत्तेरिति वक्तव्यम् । न हि केवला समानधर्मोपपत्तिः संशयकारणं भवति अन्यथा कृतकत्वादिनापि संशयः स्यात्, समानं कृतकं सर्वानित्यानामिति । व्यवच्छेदहेतुत्वान्न भवति । ”—**न्यायवार्तिक** १।१।२३ ॥ ८ तत्प्रत्यक्षत्वे संशय इति नोच्यते V ॥ ९ ‘ अभावस्य ’ इत्यपि पाठः स्यादत्र ॥ १० एवं न्यूनोक्तिः V ॥ ११ ‘ यथानित्यत्वसाधने ’ इति ‘ यथानित्यत्वसिद्धौ ’ इति वा पाठोऽपि स्यादत्र ॥ १२ धूमादित्वेनाग्नौ साध्ये K । धूमादित्वेनाग्न्यादिसाधने V । VT अनुसारेण ‘ **धूमादित्वस्य** ’इति पाठः प्रतीयते ॥ १३ क्वचिद्देशेऽर्थे संशयः K ॥ १४ हेत्वाभासोऽपि सदोष उक्तः । परार्थानुमाननिरूपणम् । तृतीयः परिच्छेदः K ॥

शास्त्रेणाकाशधर्म[1]कार्यत्वादीनामपि [2]पदकारणत्वोपगमादाकाशस्यापि विधानं कृतमेवेत्याशयः। न हि समुदाये धर्मान्तरमस्तीति, [3]समुदायो हि समुदयमात्रं बुद्धिपरामृष्टमेव, प्रासादमालावत्। तस्य समुदायितोऽभिन्नत्वात् कुतः कृतकत्वादिर्धर्मः? [4]समुदायी एव यो धर्मः स तदेकदेशत्वात् 'तस्य' इति व्यपदेष्टुं शक्यते, यथा गृहस्य गवाक्षः। तस्मात् समुदायी एव हेतुः प्राप्नोति, स च प्रतिज्ञार्थैकदेशत्वादसिद्धः। ननु समुदायस्य धर्मान्तरं मास्तु, तदेकदेशस्य धर्मिणः शब्दादेः कृतकत्वादिर्धर्मः[5] सम्भवति, ततश्च तस्यैवाभिधानं हेतुर्भविष्यतीति चेत्, आह–विषाणी तस्मादश्व इत्यादि, यो दृश्यो विषाणी पिण्डोऽसावश्वः विषाणित्वादित्यत्र साध्यधर्मेणाश्वत्वेन विशिष्टस्य पिण्डस्य धर्मिणो धर्मो विषाणित्वमिति स्वशास्त्रोक्तो हेत्वाभासो हेतुः स्यात्। तत्र कृतकत्वादि न सम्भवतीति धर्माणां धर्मिपरतन्त्रत्वात्। अनित्यत्वादिधर्मे कृतकत्वादिधर्मा नोपपद्यन्ते। तस्य सिद्धत्वादिति, सिद्धस्य साध्यत्वानुपपत्तेर्लक्षणस्य निर्विषयत्वं स्यात्। धर्मेऽप्ययं समानो दोष इति तत्रापि वक्तव्यम्। अनित्यत्वेन साध्य इति चेदिति अनित्यत्वेन विशिष्टस्य साध्यत्वात्। व्यवच्छेदफलत्वादिति, शब्दशब्दः सर्वावस्थायाः शब्दं परिगृह्य वर्तते, एवमनित्यशब्दः सर्वं शब्दाद्यनित्यं वस्तूपगृह्य। तयोः परस्परं व्यवच्छेदः, अनित्यशब्देन शब्दस्यावस्थान्तरव्यवच्छेदात्, शब्दशब्देन चानित्यत्वस्याश्रयान्तरव्यवच्छेदात्। तस्मात परस्परव्यवच्छेदेन संसृष्टत्वात् समुदायस्यैव साध्यत्वं भवति।

गुणभूतमपीति 'अभिधान'विशेषणत्वात् साध्यं गुणभूतम्, तथा च विवक्षावशात् सामर्थ्ये सति 'शब्दा विवक्षामनुरुन्धते' इति तच्छब्देन साध्यमेव परामृश्यते। समुदायेन धर्मिणा वान्यस्तद्वान्नास्तीति, धर्मिसमुदाययोः स्वतन्त्रत्वात्। ननु समुदायिनः तद्वान्नास्ति, ततः किमेवमिति चेत्, नैतदेवम्, अत्र धर्मः समुदायेन तद्वानाहोस्विद् धर्मी? यदि धर्मोऽनित्यत्वादिः यदभिधानं हेतुभूतं [6]स धर्मो नास्त्येव। अथ धर्मी, तत्र धर्मिमात्रे साध्ये यो दोषः स प्राप्नोत्येव। तस्मात् 'समुदायेन धर्मिणा वान्यस्तद्वान् नास्तीत्यत्र [7]यथोक्तदोषो न वर्तते स नास्तीत्यभिप्राय इत्यनवद्यम्।

विशेषः साध्यवद्धर्मः प्राप्त इति। साध्यवत एवेत्यवधारणादित्यभिप्रायं प्रका-

---

१ वै० सू० २।२।३२–३७॥ २ अनित्यकारणत्वोपगमात् (?)॥ ३ छोग्स्° पड़ि° नि° VT. समुदायस्य हि (?)॥ ४ छोग्स्° प° चन्° खो° नड़ि° छोस्° गङ्° यिन्° प° VT.=समुदायिन एव यो धर्मः (?)॥ ५ छोग्स्° प° चन्° लस्° VT.=समुदायितः [अन्यः?]॥ ६ देऽि° छोस्° VT.=[स] तद्धर्मो (?)॥ ७ यत्रोक्त° (?)॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शयति । किं कारणमेवमवधार्यत इत्याह–नेत्यादि । धर्मिणि प्रसङ्गाभावादिति, साध्यवति धर्मिणि धर्मी न सम्भवति, तस्य स्वतन्त्रत्वात् । सामीप्यात्, अन्यासन्निकृष्टत्वात् तत्सामीप्यम् । श्रावणत्वादित्यपि हेतुः स्यादिति अपिशब्दोऽवधारणार्थः गर्हार्थो वा । नन्वपक्षधर्मव्यावृत्त्यर्थं तद्धर्मवचनम्, तथा च 'तद्धत एव' इत्यवधारणाभावान्नासाधारणस्य हेतुत्वप्रसङ्ग इति चेत्, अयमाशयः—अपक्षधर्मस्याप्रसक्तत्वात् तद्व्यावर्तनाय प्रयासो निरर्थकः, यस्मादसम्बद्धार्थस्य स्वयमेव 'अस्येदं कार्यं कारणम्' [ वै० सू० ९ । १८ ] इत्यादिना प्रागेव हेतुत्वं निराकृतमिति । साध्यधर्मेऽपीत्यादि, तत्रावश्यमेवमवधारयितव्यं 'साध्यस्यैव धर्मः' इत्यादि सर्वं वक्तव्यम् । न, तस्येत्यादि, साध्यधर्मोऽन्यत्र द्वेधा वर्तत इति विशेष्यते, तत्र यदि साध्यस्यैव धर्म इत्यवधार्यते [तर्हि] विशेषणानुपपत्तिः । तस्मात् 'साध्यस्य धर्म एव' इत्यवधारयितव्यमिति यद्यप्यसाधारणोऽपि धर्म एव तथापि तस्य हेतुत्वं न प्रसज्यते, अन्यत्र वृत्त्यभावात् । यदाह–असाधारण इत्यादि । पुनरप्ययं किमर्थमुपन्यासः, यावता अपक्षधर्मव्यावर्तनार्थमेव तत्र साध्यधर्म उक्तः, यदाह–'पक्षस्य धर्म एवेत्यवधारणात्' [ ] इति चेत्, ननु पक्षधर्म एवेत्यधिष्ठितं कृत्वा वचनान्न दोषः ।

अनित्यत्वमात्रेत्यादि, यस्यानित्यत्वमात्रं साध्यं तस्य घटादयोऽपि तद्वन्त इति तद्धर्मश्चाक्षुषत्वमपि हेतुः स्यात् । अथाधिकरणभेदकृतरूपभेदाश्रयणेन घटादिगतस्यानित्यत्वस्यासाध्यत्वान्नायं प्रसङ्ग इति चेत्, तथा सति श्रावणत्वमेव हेतुः स्यात् । शब्दानित्यत्वस्य साध्यत्वे च समुदायार्थः स्यात् । अनिश्चित इति, निश्चितं निश्चयः, न विद्यते निश्चितमत्रेत्यनिश्चितः । पर्यायान्तरेणास्यार्थं प्रकाशयति–संशयहेतुरिति । संशयहेतुरिति किमिति चेत्, व्यभिचारीति । तन्मात्रमपीति, 'तच्छब्देन साध्यमपि समुदायो धर्मो धर्मी वा स्यात्, अवधारणमपि तद्वत एव धर्म उत तद्वतो धर्म एव' इत्येतावन्तो विकल्पाः । तस्मादित्यादि, अनित्यत्वादिधर्मवता घटादिना यत् साधर्म्यं साध्यं तदव्यभिचार्यभिधानं हेतुरिति । साध्यमिति तत् कुत इति चेत्, प्रत्यासत्तेः । तथा

१ '**साध्यधर्मो यतो हेतु**स्तदाभासाश्च भूयसा' [ ३ । ७ ] इति साध्यधर्मस्य हेतुत्वं **दिङ्नागेन प्रमाणसमुच्चये**ऽभिहितम् । अतः पूर्वपक्षी अत्राक्षिपति—**साध्यधर्मेऽपी**त्यादिना । एतच्च **दिङ्नागो न तस्ये**त्यादिना समाधत्ते । '**सपक्षे सन्नसन् द्वेधा** पक्षधर्मः पुनस्त्रिधा । प्रत्येकमसपक्षेऽपि सदसद्द्विविधत्वतः ॥ [ ३ । ८ ]........तत्र यः सन् सजातीये द्वेधा चासंस्तदत्यये । स हेतुः......॥ [ ३ । ३४ ]' इति '**अन्यत्र** सपक्षे **द्वेधा** सन्नसंश्च' इति हेतुविशेषणाभिधानान्नायं दोष इति **दिङ्नाग**स्यात्राशयः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सति धर्मान्तरं परिहृतं भवतीति चाक्षुषत्वं श्रावणत्वं च परिहृतं भवति, तस्य तद्वता साध्यसाधर्म्यं नास्तीति। अवधारणादिति तद्वतैव साधर्म्यस्य इत्यवधारणात्। आकाशाद्यसिद्धतासिद्धौ इति 'आदि'शब्देनात्मादयो ग्राह्याः। तत्रेत्याकाशादिसिद्धौ [1]प्रतिज्ञावतः साध्यवतो वेति तच्छब्देन यदि अभिधानं परामृश्यते यदि वा साध्यमुभयथापि प्रयोगो नोपपद्यते। —VT. D. ed. पृ० १९०B—१९३A। P. ed. पृ० २१७A-२१९A।

वैशेषिकाणामित्यादि। तत्राप्रसिद्धो लिङ्गलिङ्गिनोः सम्बन्धस्याप्रसिद्धत्वात्, यथाग्निधूमयोः सम्बन्धः सन्नपि यस्य कार्यकारणलक्षणोऽसिद्धस्तं प्रति धूमोऽनपदेशोऽहेतुरित्यर्थः। असन् संयोगादिसम्बन्धाभावादसन् यथा विषाणी तस्मादश्व इति। यदश्वविषाणयोरनन्यत्वे सिद्धे 'विषाणी विद्धः' इत्युच्यते किमत्र ज्ञायते? यदि 'विषाणी तस्मादश्वः' इति वक्ति, वक्तव्यं तदसद्वचनमिति, न हि अश्वविषाणयोः कश्चिदपि सम्बन्धोऽस्तीति। सन्दिग्धो यः सन्नप्यनिश्चितः, यथा विषाणी विद्यत इत्युक्ते किमत्र ज्ञायते यदि 'विषाणी तस्माद् गौः' इति वक्ति, वक्तव्यं तत् सन्दिग्धवचनमिति। कस्मात्? महिषादिष्वपि विषाणमस्तीति। अप्रसिद्धस्तावदित्यादि, लिङ्गलिङ्गिनोः सम्बन्धस्याप्रसिद्धौ दृष्टान्ताश्रयौ द्वौ दोषौ सम्भवतः–दृष्टान्तस्याभावो वाऽप्रसिद्धार्थत्वं वा हेत्वर्थेन। तत आह–वाशब्दो विकल्पार्थ इति। तत्र यदा तावद् दृष्टान्तधर्मिण एव स्वरूपाप्रसिद्धेः सम्बन्धो न प्रतीयते तदा दृष्टान्तस्याभावः, धर्म्यसिद्धेः। अथ धर्मिसिद्धावपि तत्र पूर्वं लिङ्गस्यादृष्टत्वात् सम्बन्धस्याप्रसिद्धत्वं तदा हेत्वर्थेनाप्रसिद्धार्थत्वं साधनवैकल्यमित्यर्थः। कस्मात् पुनर्दृष्टान्ताभासो न तु हेत्वाभास इत्याह–एवं हीत्यादि। आभ्यां प्रकाराभ्यां यस्माद् दृष्टान्तेऽप्रसिद्धस्तस्मादयं दृष्टान्तदोषः, न हेत्वाभासः।

अथापीत्यादि। साध्यधर्मिणि [ असन् ] सन् वा चाक्षुषत्वादितुल्योऽप्रसिद्धशब्देनोच्यते न दृष्टान्ते इति चेत्, तथा सति हेत्वर्थो विरुध्येत। कुतः पुनर्हेत्वर्थो विरुध्यत इत्याह–प्रसिद्धिपूर्वकत्वादपदेशस्येति। यः पूर्वं सम्बन्धकाले प्रसिद्धो विज्ञातः स एवापदेशो नान्य इत्यर्थोऽभिमतः। तथाहि–यद्यपदपि वर्षकर्म हेतुरिष्यते तथा सति द्रव्यगुणकर्मणामेव कारणत्वमिति योऽभ्युपगमस्तस्य [2]हानिरिति परिहार उक्तः। अभूतं न लिङ्गम्, किं तर्हि? अभूतादिप्रतीतिः। हेतुः क इति चेत्, प्रसिद्धिपूर्वकत्वादपदेशस्येति उपलब्धिपूर्वकत्वादित्यर्थः। यस्य धूमादिभिरग्न्यादयः

१ प्रतिज्ञावान् साध्यवान् वेति VT.॥ २ दृश्यतां पृ० १९४ पं० ७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सम्बद्धा विरोधिनोऽविरोधिनो वा प्रसिद्धास्तस्य धूमादयोऽपदेशः। प्रसिद्धिपूर्वक एवापदेश इति कथं प्रतीयत इति चेत्, पू[5]र्वशब्दप्रयोगाच्च सम्बन्धकालसिद्धत्वमेवानेनाभिधीयते, अन्यथा प्रसिद्धत्वादित्येवाभिधीयेत।

प्रसिद्धं कृत्वेति, तत्र दृश्यमाने पिण्डे विषाणित्वमसत् सन्दिग्धं वा कृत्वा नोदाह्रियते, किं तर्हि? प्रसिद्धमेव। कुत एतदिति चेत्, 'यदि विषाणी' इत्यनुवादात् पक्षधर्माभ्युपगम एवमुच्यते, साध्यधर्मेऽश्वे गवि च तस्याप्रसिद्धत्वमनै[1]कान्तिकत्वं च, न धर्मिणि पिण्डे। अथापि अभावस्य हेतुरिति असतो ज्ञानस्य हेतुरसन् सन्देहस्य हेतुः सन्दिग्धः कारणे कार्योपचारात्, न तु हेतोर्धर्मिण्यभावात् सन्दिग्धत्वाच्च।

न्यूनाभिधेति वैकल्यमाह। 'विषाणी तस्माद् गौः' इति साधारणानैकान्तिकस्यैवोदाहरणम्, उदाहरणदर्शनाच्च तादृशस्यैव भावस्य प्रतीतिः स्यात्, न त्वशेषस्यानैकान्तिकस्य, असाधारणस्य विरुद्धाव्यभिचारिणश्च ततोऽत्यन्तं विलक्षणत्वात् कुतः प्रतीतिः? यथेत्यादिनाऽसाधारणस्य तावदनुपादानमुदाहरणेन दर्शयति। षट्सु पदार्थेष्विति 'संशयकारणम्' इति वर्तते। कुतः षट्स्वपि संशयकारणमिति चेत्, सर्वत्राभावादिति सर्वत्रादर्शनादित्यर्थः। भावव्यपदेशो भवत्यस्मादिति दर्शनं भावः, तन्निषेधेनादर्शनमभाव उच्यते। ननु चानुक्तोऽपि 'सन्देहहेतुः सन्दिग्धः' इति लक्षणात् प्रतीयते इति चेत्, असदेतत्, 'सन्देहहेतुः' इत्येतत् सन्दिग्धहेतुलक्षणं न कल्पनीयम्, तस्यैवापरिज्ञानात्।

य आहुरिति वैशेषिक[2] एव कश्चित्। विशेषयति व्यावर्तयतीति विशेष उभयत्र दृष्टत्वादिति साध्यापेक्षया तुल्यजातीयेषु इतरेषु च सम्बन्धित्वेन दृष्टत्वात्। ऊर्ध्वत्वादिवदिति, य[3]थोर्ध्वत्वं स्थाणौ पुरुषे च सम्बन्धिन्यनुवृत्तिद्वारेणास्त्येवं श्रावणत्वं द्रव्यादिपदार्थे सम्बन्धिनि व्या[4]वृत्तिद्वारेण। ततश्च 'यदि विषाणी तस्माद् गौः' इत्यनेनोदाहरणेनासाधारण उपात्त इत्याशयः। तदयुक्तमिति यदि व्यावृत्तिरुभयथा भवेत् तद्द्वारेण सामान्यं स्यात्, सैव तु न संभवति। कुत इति चेत्, नेत्यादि। कस्माद् यतो व्यावृत्तिस्तदाभासः संशयो नोपपद्यत इति चेत्, आह-मा भूदित्यादि। एकद्रव्यवत्त्वं पृथिव्यादिभ्यो व्यावृत्तं न च तदाकारेण संशयं जनयति—किमेकद्रव्यवत्त्वात् पृथिवी आहोस्विज्जलमाहोस्वित् तेज इति। तदनेन यद् यतो व्यावर्तते तत् तत्र तदाभासस्य सन्देहस्य न हेतुः, यथैकद्रव्यवत्त्वं पृथिव्यादिषु, श्रावणत्वमपि षड्भ्यः पदार्थेभ्यो भवन्मतेन व्यावृत्तमिति व्यापकविरुद्धप्रसङ्गमाह। तथा च नेति यद् यत्र संशयस्य

१ °कान्तिकत्वं परिहृतम् D. ed.। अयमपपाठ इति ध्येयम्॥ २ वैशेषिका एव केचित् (?)॥
३ यथोर्ध्वत्वं स्थाणुपुरुषसम्बन्धि अनुवृत्तिद्वारेणैवं श्रावणत्वं द्रव्यादिपदार्थसम्बन्धि व्यावृत्तिद्वारेण (?)।
४ दृश्यतां पृ॰ १९९ टि॰ ११॥ ५ प्रतीकोयं मूले न दृश्यते॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

कारणं तत् ततो न व्यावर्तते यथा स्थाणुपुरुषयोरूर्ध्वत्वम् श्रावणत्वमपि षट्सु पदार्थेषु संशयस्य कारणमिति विपर्ययेणापि व्यापकविरुद्धोपलब्धिरेव। तस्मादित्यादि, द्रव्यादीनामन्यतमेन शब्देनावश्यं भाव्यम्, अन्यथा तस्य भावत्वमेव न स्यात् पदार्थान्तरानभ्युपगमात्। तस्माद् द्रव्यादीनामेवान्यतमस्य कस्यचिदयं धर्म इति तद्धर्मसम्भवद्वारेण संशयकारणम्, न तद्व्यावृत्तिद्वारेणेति साधारणादन्यः, स च लक्षणादुदाहरणाच्च नोक्त इति न्यूनोक्तिः।

विरुद्धैकान्तिक इति परस्परविरुद्धार्थसाधनाद् विरुद्धश्चासावैकान्तिकश्चेति विरुद्धैकान्तिकः, अवयवद्वारेण समुदाये वर्तमानयोः समासः लोहितसारङ्गवत्। विरुद्धानैकान्तिक इति क्वचित् पाठः। तत्र विरुद्धः पूर्ववत्, अनैकान्तिकः सन्दिग्धत्वात्। विरुद्धानैकान्तिक इत्यभिहिते पुनरनेकवचनं विरुद्धहेतुतो विशेषणार्थम्। अन्ये त्वाहुः–सन्दिग्धहेत्वधिकारात् सामर्थ्यप्राप्तस्यैवानेकत्वस्य अनेक इत्यनुवादः सुखप्रतिपत्त्यर्थमिति। पञ्चानां लिङ्गोपलब्धेश्चेति, यस्य यत्र लिङ्गमुपलभ्यते तत् तस्यारम्भकं यथा घटस्य पृथिवी, शरीरेऽपि महाभूतानि धृति-संग्रह-पक्ति-कम्पा-ऽवकाशदानलिङ्गवन्त्युपलभ्यन्ते इति स्वभावः। विजातीयारम्भनिषेधादिति, यद् यतो विजातीयं तत् तस्यानारम्भकं यथा तैजसा अणवः पार्थिवस्यावयविनः, शरीरमपि भूतेभ्यो विजातीयमिति व्यापकविरुद्धः। अयं च संशयहेतुः शास्त्रे दृष्ट एव लक्षणादुदाहरणाच्च नोक्त इति वैकल्यम्।

एतेनेति असाधारणविरुद्धाव्यभिचारिणोरुदाहरणासङ्ग्रहेण 'सामान्यप्रत्यक्षाद् विशेषाप्रत्यक्षाद् विशेषस्मृतेश्च संशयः' [वै० सू० २। २। १९] इति सूत्रस्याप्यनयोः संशयहेत्वोरसाधारणविरुद्धाव्यभिचारिणोरसङ्ग्रहादव्यापकत्वम्। अत्र चेत्यस्मिन् संशयसूत्रे संशयहेतुलक्षणस्यातिव्यापकत्वमाह। यस्मात् कुन्दशौक्ल्यं सामान्यम्, तत्प्रत्यक्षत्वेऽपि रूपादिषु निश्चयो दृष्टः, न संशयः। यथा लक्षणं तथा तस्यापि संशयहेतुत्वमेव प्राप्नोति। तस्माद् यद् अव्यवच्छेदहेतुः सामान्यं तत्प्रत्यक्षत्वे संशयो भवतीति विशेष्य वक्तव्यम्। न तूक्तम्। तस्माद् वैकल्यम्। अव्यवच्छेदहेतुरिति व्यभिचारीत्यर्थः। कथं पुनस्तत् तेषां सामान्यं यावता शुक्लत्वं तद्विशेष एवेति चेत्, नैष दोषः। अनेकसम्बन्धित्वात् तदपि सामान्यसादृश्येन सामान्यम्। अत्र च सामान्यपदार्थ एव सामान्यश्रुत्या न विवक्षितः, यतो गुणदर्शनादपि संशय उपजायते, ततोऽनेकसम्बन्ध्येवात्र संशयकारणमुच्यते। क्वचिद् देशे इति सर्वत्र धूमादित्वस्य सन्देहासम्भवं दर्शयति।
—VT. D. ed. पृ० २१०a–२१२b। P. ed. पृ० २३८b–२४१b।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## अथ सवृत्तिके प्रमाणसमुच्चये
### चतुर्थे दृष्टान्तपरिच्छेदे वैशेषिकमतपरीक्षा ।

**स्वदृष्टान्तप्रसङ्गो वा [1]न वा वाक्यैकदेशता ॥ २० ॥**
**[2]अन्वयस्यानभिधानाद् दृष्टान्तप्रतिरूपकः ।**
**[3]साधनत्वोपमार्थौ च स्वतन्त्रत्वे निरर्थकौ ॥ २१ ॥**

वैशेषिकाणाम् " उभयप्रसिद्धो दृष्टान्तः " [ ] इति । [4]अत्रापि

**स्वदृष्टान्तप्रसङ्गो वा न वा वाक्यैकदेशता ।**

यत्रोभयं प्रसिद्धमिति यदि प्रतिज्ञाहेतू तात्राकाशे प्रसिद्धौ तद्गुणत्वादित्याकाशं सर्वत्र दृष्टान्तः स्यात् । अथ साध्यतद्धर्मौ यत्र [5]प्रसिद्धाविति चेत् [6]तथा सति वाक्यावयवत्वं न युज्यते ।

**अन्वयस्यानभिधानाद् दृष्टान्तप्रतिरूपकः ।**

यत्र हेतोः साध्येनान्वयो न प्रदर्श्यते स [7]दृष्टान्ताभासः पूर्ववत् । उभयथापि दृष्टान्तो न युज्यते ।

**साधनत्वोपमार्थौ च स्वतन्त्रत्वे निरर्थकौ ।**

[8]यदि च दृष्टान्तः स्वतन्त्रो न हेत्वर्थैकदेश इत्युच्यते तथापि [9]साधनत्वं न सम्भवत्युपमार्थश्च नास्ति यथापूर्वोक्तवत् ।

**[ इति ] प्रमाणसमुच्चये चतुर्थः परिच्छेदः ।**

**विशालामलवती टीका ।**

उभयप्रसिद्ध इति उभयं प्रसिद्धं निश्चितं यत्र स उभयप्रसिद्धः । उभयं हेतु-प्रतिज्ञे तदर्थौ वा । स्वदृष्टान्तप्रसङ्गो वेति प्रथमे पक्षे, न च वाक्यैकदेशतेति द्वितीये । एवमुभयथाप्यभ्युपगमहानिः । तद्गुणत्वादिति प्रतिज्ञाहेत्वोः शब्दात्मकत्वात् ' शब्दश्चाकाशगुणः ' इति समयात् । तद्धर्माविति साध्यसाधनधर्मावनित्यकृतकत्वादी ।

---

१ म च VT. ॥ २ ' अन्वयानभिधानाच्च दृष्टान्तप्रतिरूपता ' इत्यपि भवेत् पाठः ॥ ३ ' साधनं चोपमार्थश्च ' इत्यपि भवेत् पाठः ॥ ४ तत्रापि V । ' अत्र च ' इत्यपि पाठः स्यादत्र ॥ ५ प्रसिद्धौ स एवेति चेत् V ॥ ६ तथापि वाक्यावयवत्वं नोपपद्यते V ॥ ७ दृष्टान्ताभास उभय-दृष्टान्तः पूर्ववदिति योज्यम् V ॥ ८ यदि दृष्टान्तः V ॥ ९ हेतुत्वमुपमार्थश्च न सम्भवतः K ॥ १० प्रमाणसमुच्चये दृष्टान्ततदाभासनिरूपणं चतुर्थः परिच्छेदः V ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यत्र प्रसिद्धावित्यर्थे घटादौ । वाक्यावयवत्वं न युज्यत इति । यथोक्तम्—" सह विवक्षा हि भेदे सति अभेदे वृत्तानां भवति " [ ] इति । अर्थशब्दयोश्चा-भेदे वृत्तत्वं नास्ति । अन्वयानभिधानादित्यादि यथास्माकं हेतोरविनाभावित्वमुदा-हरणेन प्रदर्श्यते नैवं वैशेषिकाणाम् । ततश्च दृष्टान्ताभासः पूर्ववदिति, यथा पूर्वमुक्तं " विपरीतान्वयो द्वेधा तदाभासोऽप्यनन्वयः " [ प्र० समु० ४ । १२ ] इति एवमत्रापि वक्तव्यम् । उभयथापि न युज्यत इति यदि हेतुप्रतिज्ञे उभयवचनेन गृह्येते यदि च तदर्थौ । साधनत्वोपमार्थौ च स्वतन्त्रत्वे निरर्थकाविति । साध्यसंसिद्ध्यर्थ-मर्थ्यत इत्यर्थः साध्यसाधनसमर्थं स्वरूपमुच्यते । नास्त्यर्थोऽनयोरित्यनर्थकौ साध्य-साधनसमर्थस्वरूपौ न सम्भवत इत्यर्थः । इममेवार्थं वृत्त्या प्रकाशयति–साधनत्वं न सम्भवति उपमार्थश्च नास्तीति । युक्तिस्तु कस्यचित् साधनत्वं न सम्भवति साधन-सामर्थ्यरहितत्वात् । उपमार्थः कथम्? यादृशः परेण साध्यानुग्रहोऽभिमतस्तादृशो न सम्भवतीत्याशयः । यथापूर्वोक्तवदिति—

" उदाहरणसाधर्म्यं केवलं तैरुदीर्यते ।

साध्यसाधनता नोक्ता तथा चौपम्यमात्रता ॥ " [प्र० समु० ४ । ८] इति ।

एवं साधनत्वाभाव उक्तः । दृष्टान्ताभावोऽपि—

सहेतोः साध्यमात्रस्य तद्विशेषस्य वा मितौ ।

दृष्टान्तस्यानवस्था स्याद् व्यावृत्तिश्च विपक्षतः ॥ [ प्र० समु० ४ । १० ]

इति चतुर्थः परिच्छेदः । —VT. D. ed. पृ० २३६b—२३७b P. ed. पृ. २६८ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# अथ पूर्तिः[1]।

## सवृत्तिके प्रमाणसमुच्चये

### प्रथमे प्रत्यक्षपरिच्छेदे नैयायिकप्रत्यक्षपरीक्षा।

[2]इन्द्रियार्थोद्भवे नास्ति व्यपदेश्यादिसम्भवः[3]।
सान्तरग्रहणं न स्यात् प्राप्तौ ज्ञानेऽधिकस्य च ॥ १७ ॥

अधिष्ठानाद् बहिर्नाक्षं न शक्तिर्विषयेक्षणे।
न सुखादि प्रमेयं वा मनो वास्तीन्द्रियान्तरम् ॥ १८ ॥

अनिषेधादुपात्तं चेदन्येन्द्रियरुतं वृथा।
निश्चितेऽर्थे फलाभावो विशेषणे न भेदतः ॥ १९ ॥

तत्रापि नोभयं तत् किं न विशेष्येऽपि सज्यते।
अज्ञानादि न सर्वत्र निवृत्तिर्नासती फलम् ॥ २० ॥

नैयायिकानाम् "इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम्" [न्यायसू० १।१।४] इति। [4]अत्र च विशेषणानि न युज्यन्ते।

इन्द्रियार्थोद्भवे नास्ति व्यपदेश्यादिसम्भवः।

विशेषणं [5]व्यभिचारसम्भवविषये क्रियते। न चास्तीन्द्रियबुद्धौ व्यपदेश्यविषयत्वे सम्भवः, अनुमानविषयत्वाद् व्यपदेश्यस्य। अव्यपदेश्यत्वेऽपि न व्यभिचारः, [6]इन्द्रियबुद्धिर्व्यपदेष्टुं न शक्यते। ततो [7]विशेषणं न कर्तव्यम्।

---

१ वैशेषिकप्रत्यक्षपरीक्षायां दिङ्नागेन पृ० १७० पं० ७ इत्यत्र पृ० १७३ पं० १६ इत्यत्र च नैयायिकप्रत्यक्षपरीक्षा निर्दिष्टा। एवं पृ० १८४ पं० १८ इत्यत्र नैयायिकानुमानपरीक्षा निर्दिष्टा। अत्रोऽत्रोपयोगित्वाद् नैयायिकप्रत्यक्षपरीक्षा नैयायिकानुमानपरीक्षा चात्र क्रमेणोपन्यस्यते ॥ २ इतः प्राक्तन्यः षोडश कारिकाः **स्वत्रृत्त्या विशालामलवत्या** च सह भोटभाषान्तरतः संस्कृतेऽस्माभिरनूदिता **द्वादशारस्य नयचक्रस्य** प्रथमे विभागे टिप्पणेषु **भोटपरिशिष्टे** मुद्रिता इति जिज्ञासुभिस्तत्रैव विलोकनीयाः पृ० ९७-११८ ॥ ३ उद्धृतमेतत् **प्रमाणवार्तिकालङ्कारे** पृ० ३३८ ॥ ४ अत्रापि (?) ॥ ५ व्यभिचारसम्भवसद्भावे K ॥ ६ इन्द्रियबुद्धिः सर्वा [व्यपदेष्टुं ?] न शक्यते K ॥ ७ विशेषणवचनं PSV ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्यभिचारिविषयत्वेऽपि न, [1]मनोभ्रान्तिविषयत्वाद् व्यभिचारिणः[2]*। व्यवसायो निश्चयः। सोऽकल्पिते सामान्यादिमति गवादावदर्शनान्न सम्भवति। अथाऽयथार्थादिज्ञानव्यावृत्त्यर्थमुच्यते तथापि विशेषणं न युक्तम्, अव्यभिचारादपि। सर्वा हीन्द्रियबुद्धिः स्वार्थमात्रग्राहिणी। एतेन [3]उक्तविकल्पोऽपि प्रत्याख्यातो यदुक्तं 'व्यवसायात्मकं ज्ञानं व्यवसायफलम्' इति। न हि साक्षादयथार्थादिज्ञानफलत्वमिन्द्रियबुद्धौ सम्भवति।

अथाप्यव्यपदेश्यत्वादिवचनं तस्य ज्ञानस्य स्वरूपप्रदर्शनायेति चेत्, [तद् V] न, प्रत्यक्षलक्षणस्याभिधेयत्वात् अस्य चेन्द्रियार्थसन्निकर्षेणैव सिद्धेः। ज्ञानस्वरूपस्य [4]प्रदर्श्यत्वे च गुणत्व-द्रव्यानारम्भकत्व-निष्क्रियत्वा-ऽऽका[5]शाद्यविषयत्वस्यापि प्रदर्श्यत्वादतिप्रसङ्गः।

सर्वत्रापि सन्निकर्षोत्पन्नप्रत्यक्षेष्टौ रूपशब्दयोः [6]सान्तरग्रहणं न स्यात् प्राप्तौ ज्ञानेऽधिकस्य च। [7]न हीन्द्रियनिरन्तरे विषये गन्धादौ सान्तरवद् ग्रहणं दृष्टम्। नेन्द्रियाधिकग्रहणं युक्तम्।

बहिर्वर्तित्वादुपपद्यत एव। इन्द्रियद्वयस्याधिष्ठानाद् बहिर्वृत्तिः, ततस्तद्विषये उपपन्नं सान्तराधिकग्रहणमिति चेत्, तदप्ययुक्तम्, यस्माद् अधिष्ठानाद्

१ उद्धृतमेतत् प्रमाणवार्तिकालङ्कारे पृ० २५३, ३३८॥ २ * एतत्पर्यन्ताया: **प्रमाणसमुच्चयवृत्ते**र्विशालामलवती टीका जिज्ञासुभि**र्नयचक्रस्य** प्रथमे विभागे टिप्पणेषु भोटपरिशिष्टे विलोकनीया पृ० ११८-११९॥ ३ उक्तविकल्पेऽपि प्रत्याख्यातम् PSV। (**भाष्य**विकल्पोऽपि प्रत्याख्यातः?)॥ ४ प्रदर्श्यत्वेऽपि (?)॥ ५ °काशादिज्ञेयाविषयत्वस्यापि V॥ ६ "यथोक्तं दिङ्नागेन—**सान्तरग्रहणं न स्यात् प्राप्तौ ज्ञानेऽधिकस्य च**। बहिर्वर्तित्वादिन्द्रियस्योपपन्नं सान्तरग्रहणमिति चेत्, अत उक्तम्-**अधिष्ठानाद् बहिर्नाक्षम्**, किन्तु अधिष्ठानदेश एवेन्द्रियम्। कुतः? **तच्चिकित्सादियोगतः। सत्यपि च बहिर्भावे न शक्तिर्विषयेक्षणे। यदि च स्यात् तदा पश्येदप्युन्मील्य निमीलनात्**। यदि च स्यात्, उन्मील्य निमीलितनयनोऽपि रूपं पश्येत्, उन्मीलनादस्ति बहिरिन्द्रियमिति।" —**न्यायवार्तिकतात्पर्यटीका**. १।१।४॥ ७ "किञ्च, यदि प्राप्यकारि चक्षुः स्यात् सान्तराधिकग्रहणं न प्राप्नोति। **न हीन्द्रियनिरन्तरे विषये गन्धादौ सान्तरग्रहणं दृष्टम्, नाप्यधिकग्रहणम्**। अथ मतं बहिरधिष्ठानाद् वृत्तिरिन्द्रियस्य, अत उपपन्नं सान्तराधिकग्रहणमिति, तदयुक्तम्, यस्माद् न बहिरधिष्ठानादिन्द्रियम्, तत्र चिकित्सादेर्दर्शनात्, अन्यथाधिष्ठानपिधानेऽपि ग्रहणप्रसङ्गः।" —**तत्त्वार्थराजवार्तिक**. १।१९॥ ८ बर्° दङ्° ब्चस्° प° यिन्° प° ब्शिन्° दु° ऽजिन्° प° मूथोङ्° मेद्° किय। दुबङ्° पो° ल्हग्° पर्° ऽजिन्° प° नि° रिगस्° प° म° यिन्° नो PSV॥

बहिर्नाक्षं सिद्धमिति वाक्यशेषः, इन्द्रियमधिष्ठानदेश एव तिष्ठति तत्र चिकित्सादिप्रयोगात्, तस्मादिन्द्रियादेव [1]व्यवच्छिन्नेऽर्थे ग्रहणम् ।

[2]सत्यपि च बहिःसञ्चारे न शक्तिर्विषयेक्षणे, अन्यथा पिहिताधिष्ठानस्यापि विषयग्रहणं स्यात् । [3]ततश्चक्षुःश्रोत्रयोरधिष्ठानान्तःस्थि[4]तयोरेवासन्निकृष्टविषयेक्षणात् [5]सान्तरग्रहणमधिकग्रहणं च युज्यते ।

पञ्चानामिन्द्रियत्वे [6]न सुखादि प्रमेयं वा । 'वा' इति वचनं 'वा'-शब्दात् [7]प्रमाणान्तरोपादानं स्यादिति । [8]यदिदं लिङ्गाद्यभावे स्वकीयसुखदुःखेच्छाद्वेषप्रयत्नेषु ग्रहणं तदप्रमाणमिति [9]सुखादीनां प्रमेयत्वं न स्यात् । [10]तस्य वा प्रमाणत्वे [11]प्रमाणान्तरमेवोपसङ्ख्यातव्यम् ।

**मनो वाऽस्तीन्द्रियान्तरम्** । अथवा मनस एवेन्द्रियत्वमभिधातव्यं तत्सन्निकर्षोत्पन्नस्य प्रत्यक्षत्वसाधनार्थम् । [12]**अनिषेधादुपात्तं चेत्** । अथापि परमताप्रतिषेधेन सिद्धौ मनस इन्द्रियत्वाप्रतिषेधादुपात्तमेव [ तद् ] इति चेत्, परमते मनस इन्द्रियभावोऽभीतस्तथा सति **अन्येन्द्रियरुतं वृथा** । यदि परेण पठितस्य मनसोऽप्रतिषेधादिन्द्रियत्वं ततो घ्राणादीन्द्रियमुच्यते इति निर्देशो वृथा स्यात्, अप्रतिषेधादेव तस्य सिद्धत्वात् ।

[13]ज्ञानस्य च प्रमाणत्वेऽर्थान्तरफलत्वादिनो निश्चितेऽर्थे फलाभावः । निश्चयात्मकं हि ज्ञानं प्रमाणम्, तत्प्रमाणोत्पत्तावर्थस्याधिगतत्वात् फलाभावः स्यात् ।

---

१ व्यवच्छिन्नोऽर्थो गृह्यते (?) ॥ २ इन्द्रियस्य सत्यपि PSV ॥ ३ 'ततश्चक्षुःश्रोत्राभ्याम-धिष्ठानान्तःस्थिताभ्यामेव' इत्यपि पाठोऽत्र स्यात् ॥ ४ °स्थितिरेव प्राप्नोति विषयेक्षणात् V ॥ ५ सान्तरमधिकग्रहणं च PSV । ( सान्तराधिकग्रहणं ? ) ॥ ६ "तदिदमुक्तं **दिङ्नागेन**—'**न सुखादिप्रमेयं वा मनो वास्तीन्द्रियान्तरम्** ।' न च तत् सम्भवति घ्राणादिसूत्रेण विभागपरेण निषेधादिति भावः ।"—**न्यायवार्तिकतात्पर्यटीका.** १।१।४॥ ७ प्रमाणसङ्ख्यान्तरोपादानम् K ॥ ८ गङ्° ऽदि° ल्तर् PSV । ( यदेवं ? यद्येवं ? ) ॥ ९ सुखादयः प्रमेया एव न स्युः (?) ॥ १० तत्र वा इति वचनेन प्रमाणान्तरमेव लक्षितं भवति V ॥ ११ 'प्रमाणान्तरत्वमुपसङ्ख्यातव्यम्' इत्यपि पाठोऽत्र स्यात् ॥ १२ "मनसश्चेन्द्रियभावान्न वाच्यं लक्षणान्तरमिति । तन्त्रान्तरसमाचाराच्चैतत् प्रत्येतव्यमिति । परमतमप्रतिषिद्धमनुमतमिति हि तन्त्रयुक्तिः ।"—**न्यायभाष्य.** १।१।४। "तन्त्रान्तरे मन इन्द्रियमिति पठ्यते । तच्चेह न प्रतिषिद्धम् । अप्रतिषेधादुपात्तं तदिति । न, शेषाभिधानवैयर्थ्यदोषात् ।"—**न्यायवार्तिक.** १।१।४। "तन्त्रान्तरेति । तन्त्र्यते व्युत्पाद्यतेऽनेन तत्त्वमिति तन्त्रं शास्त्रम्...तद् दूषितं **दिङ्नागेन—अनिषेधादुपात्तं चेदन्येन्द्रियरुतं वृथा** ।"—**न्यायवार्तिकतात्पर्यटीका.** १।१।४॥ १३ ज्ञानस्यैव K ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[ नु[1] PSV ] **विशेषणज्ञानं प्रमाणम्** । यत् सामान्यादिविशेषणज्ञानं तत् प्रमाणं यद् द्रव्यादिविशेष्यज्ञानं तत् फलमिति चेत्, **तद् विशेषणे[2] न भेदतः** । भिन्नं विशेषणं विशेष्यं[3] भिन्नम्, *अन्यविषयस्य[4] प्रमाणस्यान्यत्र फलं च न युक्तम्*, विषयान्तरे प्रमाणभावोऽन्यत्र च फलभावो न युज्यते, न हि खवादिविषयया छिदिक्रियया पलाशे छिदिर्दृष्टा । [ अथ PSV ] विशेष्यज्ञानकारणत्वात् तद्विषयत्वमप्यस्तीति चेत्, न, अतिप्रसङ्गात् । तथा सति सर्वकारकसंकरः[5] स्यात्, विशेष्यज्ञानकारणत्वेन तत्करणत्वात् । तस्माद्[6] यस्य कर्मणि व्यापार उच्यते तस्यैव तत् फलं युज्यते ।

किञ्च, **तत्रापि[7] न**, तत्र विशेषणेऽधिगन्तव्ये फलं नास्ति प्रमाणं वा नास्ति । **उभयं[8] तत् किम्?** अथापि तदेव विशेषणज्ञानं प्रमाणं प्रमेयं चोभयमपि भवति, यथा स्वात्मसंवित्तिमात्रं प्रमेयमपि भवति ग्राहकमपि भवतीति चेत्, न, **विशेष्येऽपि सज्यते** । तथा सति विशेष्यज्ञानमपि प्रमाणं प्रमेयं चोभयं प्राप्नोति । यद्यर्थान्तरत्वेऽपि ज्ञानज्ञेययोः प्रमाणं[10] प्रमेयं भवति, स्वसंवित्तौ[11] ज्ञानस्यात्मवत् तस्यैव वस्तुन उभयथा भावाद् विशेषणज्ञानमात्मना तुल्यमिति[12] उभयं न युज्यते ।

एवं तर्हि ज्ञेयाधिगतौ या अज्ञान-संशय-विपर्ययज्ञाननिवृत्तिः[13] सा फलं भविष्यति, तदप्ययुक्तम्, **अज्ञानादि न सर्वत्र** । सर्वत्र तावदज्ञानादेर्भाव-[14]नियमो नास्ति, क्वचिदाभोगमात्रेण ज्ञानोत्पत्तेः ।

**अज्ञानादेः सद्भावेऽपि निवृत्तिर्नासती फलम्** । निवृत्तिरित्यज्ञानाद्यभावे क्रियते, साऽसती न फलम्, सा प्रमितिर्भवितुं नार्हति । एवं तावन्नैयायिकानां प्रत्यक्षमयुक्तम् । PSV[1] C. ed. D. ed. पृ० १७b–१९a, N. ed. पृ० १७a–१९a । PSV[2] N. ed. पृ० १००b–१०२b ॥

---

१ नत्° ते° PSV ॥ २ ‘भेदतो न विशेषणे’ इत्यपि पाठश्चिन्त्यः ॥ ३ विशेष्याद् भिन्नम् K ॥ ४ * * एतदन्तर्गतः पाठो विशालामलवत्यामेव प्रतीकरूपेण धृतो विलोक्यते ॥ ५ सर्वं कारकमेकं स्यात् V ॥ ६ तस्माद् यस्मिन् कर्मणो व्यापार उच्यते तत्रैव तत्फलत्वं युज्यते PSV ॥ ७ तत्र नास्ति PSV ॥ ८ द्वयं (?) ॥ ९ चेत् V ॥ १० प्रमाणप्रमेयत्वं भवति PSV ॥ ११ स्वात्मसंवित्तिज्ञानवदिति तदेव वस्तूभयमपि भवति । विशेषणज्ञानमात्मना तुल्यमित्युभयं न युज्यते V ॥ १२ ऽतुल्यमिति (?) ॥ १३ °ज्ञानेभ्यो निवृत्तिः PSV ॥ १४ तावदज्ञानादौ भावविषयनियमो नास्ति K ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## विशालामलवती टीका।

नैयायिकानामिति प्रसिद्धेरव्यवहिततन्मतोपक्षेपाच्च आक्षपादानामिति गम्यते। इन्द्रियार्थसन्निकर्षोत्पन्नमित्यादि......। इन्द्रियार्थोद्भव इति, उद्भवत्यस्मादित्युद्भवः, इन्द्रियार्थादुद्भवोऽस्येतीन्द्रियार्थोद्भवम्। इन्द्रियार्थवचनं तत्सन्निकर्षोपलक्षणार्थम्। नास्ति व्यपदेश्यादिसम्भव इति। ...विशेषणमित्यादि...। न चास्तीन्द्रियबुद्धा-विति....। अनुमानविषयत्वादित्यादि....। अव्यपदेश्यत्वेऽपि न व्यभिचार इति। कुत इत्याह—इन्द्रियबुद्धिरित्यादि। सर्वं ज्ञानमव्यपदेश्यस्वरूपमेवेति अव्यपदेश्यत्वे व्यभिचारो नास्त्येव।....व्यभिचारविषयत्वेऽपि न ‘सम्भवोऽस्ति’ इत्यनुवर्तते। मनोभ्रान्तिविषयत्वादित्यादि....। व्यवसाय इत्यादि विशेषणासम्भवमाह। सोऽकल्पित इत्यादि।....अथेत्यादि। अयथार्थज्ञानं विपरीतज्ञानम्, आदिशब्देन संशयज्ञानं ग्राह्यम्। अयथार्थादिज्ञानव्यावृत्तये व्यवसायात्मकमित्युच्यते।...अव्यभिचारादपीति। अपिशब्दादिन्द्रियबुद्धावयथार्थत्वसम्भवादपि। कुतोऽसम्भव इति चेत्, सर्वा हीत्यादि। मात्रशब्दोऽयथार्थग्रहणनिराकरणार्थः।....एतेनेत्यादि। प्रत्याख्यातः परिहृतः। व्यवसायफलमिति व्यवसायः फलमस्येति विग्रहः। कथं प्रत्याख्यात इत्याह—सत्त्वे नेत्यादि।.... अथापीत्यादि....। तन्नेत्यादिना एतदाह। अस्य चेत्यादि...। ज्ञानस्वरूपस्य प्रदर्श्यत्वे चेत्यादि।.... सर्वत्रापीत्यादि लक्षणस्याव्यापकत्वमाह... सान्तरग्रहणमित्यादि...। अधिकग्रहणम्...नेत्यादि।...रूपवचनमत्रेन्द्रियविषयोपलक्षणार्थम्। बहिर्वर्तित्वादित्यादिना....। तत्र चिकित्सादिप्रयोगादित्युपपत्तिः। तस्मादिन्द्रियादेवेति निपातो भिन्नक्रमो ‘व्यवच्छिन्न एव’ इत्येवं द्रष्टव्यः। कुतः? यस्माद् अधिष्ठानादपि व्यवच्छिन्नोऽर्थ इति गृह्यते न केवलादिन्द्रियात्....। सत्यपीत्यादि। अन्यथेत्यादिना......। पञ्चानामिन्द्रियत्वे इति....। न सुखादि प्रमेयं वेति...। यदित्यादि। स्ववचनं परकीयेषु....। तस्य चेति....। अनिषेधादिति...। केषुचिदस्तीति साङ्ख्यादिषु। अन्येन्द्रियरुतं वृथेति घ्राणादीनामिन्द्रियत्वस्य तत एव सिद्धेस्तद्वचनं निरर्थकं स्यात्, ततः पूर्वमपि वचनादन्येषामिन्द्रियत्वं गम्यते। नाभिमतमिति। केचिद् ‘घ्राणरसनचक्षुस्त्वक्श्रोत्राणीन्द्रियाणि भूतेभ्यः’ [न्यायसू० १।१।१२] इत्यत्रानेकेषामिन्द्रियत्वं न साध्यते, किं तर्हि? इन्द्रियत्वेन प्रसिद्धानामेव भौतिकत्वम्, अभौतिकं च मनः तदनुदिश्यत इत्याहुः। एतदपि न, इन्द्रियसङ्ख्यास्वरूपान्तरनिराकरणाय ‘घ्राणादीनि भूतेभ्यः’ इत्येतावतापि भौतिकत्वस्य सिद्धेरिन्द्रियवचनं निरर्थकं स्यात्। ज्ञानस्य चेत्यादि। इन्द्रिय-सन्निकर्षयोः प्रमाणत्वे फलाभावो न स्यात् ज्ञानस्य फलत्वात्...इत्याशयः। निश्चयात्मकं हीत्यादि।... विशेषणज्ञान-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मित्यादिना...प्रमाणात् फलं भिन्नं दर्शयति। विशेषणे न भेदत इत्यादेरयमर्थः—या यतोऽन्यविषया क्रिया तस्यास्तत्र फलं न भवति... अन्यविषयस्य प्रमाणस्येति हेतुः, ....अन्यत्र फलं च न युक्तमिति प्रमाणस्य फलम्। विषयान्तरे इत्यादि दृष्टान्तः। विशेष्यज्ञानकारणत्वादित्यसिद्धत्वमाह।...न, अतिप्रसङ्गादिति। यः प्रमाता यद् गवादि कर्म...एतत् सर्वमपि विशेष्यज्ञानकारणत्वाद् विशेषणज्ञानवत् करणं प्रसज्यत इत्यर्थः। तस्मादित्यादि। अत्र द्वौ तच्छब्दौ। तत्र द्वितीयस्य सम्बन्धी यच्छब्दः 'यस्य' इति षष्ठ्यन्तः श्रूयते। प्रथमस्य तु यत्तदोर्नित्यसम्बन्धादश्रूयमाणोऽपि अनुमीयते।...ततोऽयमर्थो भवति–यस्य ज्ञानस्य यस्मिन् ज्ञेये कर्मणि व्यापार उपदर्श्यते कारकान्तरेणाव्यवहितो व्यापारः प्रतीयते तस्यैव ज्ञेयस्य कर्मणस्तद् ज्ञानं प्रमाणमिति। ...ननु...कथं 'तस्यैव कर्मणस्तत् प्रमाणम्' इत्युच्यत इति चेत्, नायं दोषः, नैवेयं सम्बन्धलक्षणा षष्ठी, किं तर्हि? कृद्योगलक्षणा।....तत्रापीत्यादि। ननु विशेषणेऽधिगन्तव्ये विशेष्यज्ञानं फलमुच्यते। तत्र 'फलं नास्ति' इति कुत उच्यते इति चेत्, नायं दोषः, अपिशब्दोऽवधारणार्थः। तत्रैव विशेषणेऽधिगन्तव्ये इत्यर्थः।...उभयं तत् किमिति तदुत्तरम्। अत्र चैकस्योभयरूपत्वविरोधपरिहाराय यथेत्यादिना दृष्टान्तः। यस्माद् योगिनां योगसमाधावात्मदर्शिनां तद् ग्राह्यमपि भवति ग्राहकमपि। अर्थान्तरफलवादे एतदनिष्टं तथा सति प्रसज्यत इत्याह–यद्यर्थान्तरत्वेऽपीत्यादि। स्वसंवित्तौ हि ज्ञानस्येत्यादि। अनेनैतद् दर्शयति—आत्मौपम्येनार्थान्तरस्य प्रमेयत्वे विशेषणज्ञानमुभयाकारं न सिध्यति दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यात्। अपि तु स्वसंवित्तावेव ज्ञानस्य वस्तु उभयं भवति। स्वसंवित्तौ च ज्ञानस्योभयथापि प्रमाणं प्रमेयं चास्माभिरिष्यत एव। तच्च भवता आत्मोदाहरणेन ग्राह्यते। एवं तर्हीत्यादिना यथा दीपस्य तमोनिवृत्तिः फलमर्थान्तरमेवमज्ञानादिनिवृत्तिः फलं भविष्यतीति दर्शयति विषयभेदोऽप्यत्र नास्तीत्युपन्यासः। न सर्वत्रेति फलव्यवस्थाया अव्यापकत्वमाह। कुत एतन्न सर्वत्रेत्याह—क्वचिदित्यादि। आभोगमात्रेण मनसिकारमात्रेण। यत्र यस्य प्रयत्नमात्रेण ज्ञानं जायते तस्य तत्राज्ञानं नास्ति, यथा कस्यचित् प्रज्ञावतः क्वचिच्छिल्पे, लौकिकज्ञानमपि कस्मिंश्चिज्ज्ञेये प्रयत्नमात्रेण जायत इति व्यापकविरुद्धमाह। निवृत्तिर्नासती फलमिति अज्ञानाद्यभावोऽज्ञानादिनिवृत्तिः। अभावे च कोऽपि व्यापारो नास्ति, अनुपाख्येयत्वात्। अक्रियमाणा च प्रमितिर्भवितुं नार्हति, प्रमाणस्य फलं भवितुं नार्हतीत्यर्थः, यदसत् तन्न प्रमाणस्य फलम्, अत्यन्ताभाववत्, निवृत्तिरप्यसतीति विरुद्धव्याप्तः। दीपस्यापि न तमोनिवृत्तिमात्रं फलम्, अपि तु घटादिप्रकाशनम्, तस्मात् तदवस्थः, प्रमाणफलाभावदोष इति।" —VT.D. ed. पृ० ४३b–५३a। P. ed. पृ० ४९a–५९b॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# अथ सवृत्तिके प्रमाणसमुच्चये

## द्वितीये स्वार्थानुमानपरिच्छेदे नैयायिकानुमानपरीक्षा ।

**[1]सम्बन्धो नेन्द्रियग्राह्यो नेवः सर्वत्र सम्भवात् ।**
**न मतुब् व्यभिचारित्वाद् [2]इवो वा शेषवत्यपि ॥ २८ ॥**
**[3]मतुपा चेदव्युत्पत्तौ [4]न सम्बन्धान्तराद् गतिः ।**
**सामान्याद् दृष्टमप्येवं [5]फलमन्यन्न लभ्यते ॥ २९ ॥**
**लिङ्गज्ञानं प्रमाणं चेद् [6]व्यपदेशो न सिध्यति ।**
**[7]सर्वं त्रिकालविषयम्**

नैयायिकानामपि "तत्पूर्वकं त्रिविधमनुमानं पूर्ववच्छेषवत् सामान्यतो दृष्टं च" [ न्यायसू० १ । १ । ५ ] इति ।

तत्र प्रत्यक्षपूर्वकं [ तावद् V ] न युज्यते, यस्मात् **सम्बन्धो नेन्द्रियग्राह्यः** । न हि लिङ्गलिङ्गिनोः सम्बन्ध इन्द्रियज्ञानस्य विषयो [8]यतस्तत्पूर्वक-

---

१ सम्बन्धो नेन्द्रियग्राह्यः । पूर्ववदिति । नेवः सर्वत्र सम्भवात् $PS^1$ $PSV^1$ इति त्रयः पादास्तथापि '**पूर्ववदिति**' इत्यस्य पादत्वं कथमपि न सम्भवतीत्यनादृतमस्माभिः ॥ २ शेषवत्यपीवः VT. । शेषवत्यपीवक्रिया $PS^2$ $PSV^2$, एतत्पाठाङ्गीकरणे तु '**व्यभिचाराद् मतुब् नास्ति शेषवत्यपीवक्रिया ।**' इति कारिकार्धं ज्ञेयम् ॥ ३ न सम्बन्धान्तराद् गतिः । शेषवतो भावात् । न सम्बन्धान्तराद् गतिः $PS^1$ । न सम्बन्धान्तराद् गतिः । शेषवतो न भवति । न सम्बन्धान्तराद् गतिः $PSV^1$ ॥ ४ '**न स्याद् बन्धान्तराद् गतिः**' इत्यपि भवेदत्र पाठः ॥ ५ '**लभ्यते न फलान्तरम्**' इत्यपि पाठः स्यादत्र । 'फलान्यत्वं न लभ्यते' $PS^1$ ॥ ६ विभागश्च न सिध्यति $PS^1$ $PSV^1$ ॥ ७ $PS^1$ $PSV^1$ मध्येऽयं पादो नास्ति । इतः परं **निषिद्धे कार्यकारणे** इति चतुर्थः पादः । दृश्यतां पृ० १८४ पं० ३, १८, टि० ४ ॥ ८ न च सर्वत्र लिङ्गलिङ्गिनौ प्रत्यक्षौ यतस्तत्पूर्वकमनुमानमिति स्यात् । यथो(च्चे)क्तं पूर्ववदिति अत्र पूर्वेण तुल्यं पूर्ववदिति इवशब्दो भवति आहोस्वित् पूर्वमत्रास्तीति तद्वदिति मतुप्छब्दो भवति । ततः किं भवति ? **नेवः सर्वत्र सम्भवात्** । सर्वमिति अनुमानेन सम्बन्धग्रहणेऽनुभूतवत् पश्चादपि लिङ्गनानुमेयं गृह्यते । तदेकं पूर्ववदिति न वक्तव्यम् । सम्बन्धान्तराच्चेदं पूर्ववदिति गृह्यते । तदप्रदर्शनादप्रदर्शितमेवानुमानम् । इवशब्दो न युज्यते । **न मतुब् व्यभिचारित्वात्** ॥ मतुप्कारयोगे पूर्वमत्रास्तीति कार्यं पूर्ववत्, तद्विषयं ज्ञानमपि पूर्ववत् । कारणात् कार्यज्ञानं तर्हि व्यभिचारान्न प्रमाणम् । कारणे सत्यपि प्रतिबन्धसम्भवात् कारणान्तरासामग्रीसम्भवाच्च कार्यानुत्पत्तिः सम्भवति । एवं तावत् पूर्ववद् न युज्यते । **इवो वा शेषवत्यपि** । शेषवदित्यपि यदि इवः क्रियते शेषेण प्रत्यक्षेण तुल्यविषयं ज्ञानं तदपि शेषवदिति तदपि व्यभिचारान्न प्रमाणम् । न ह्यवश्यं तुल्यरूपमात्रेण रसस्तुल्यो भवति । एवं शेषवदितीवशब्दोऽपि न युज्यते V ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मनुमानं स्यात्। न च सर्वत्र लिङ्गलिङ्गिनौ प्रत्यक्षौ स्तः।

पूर्ववदिति यदुक्तं तदत्र न युज्यते, यस्मात् पूर्वेण तुल्यं पूर्ववदिति इवो भवति आहोस्वित् पूर्वमस्यास्तीति मतुब् भवति? ततः किमिति चेत्, नेवः सर्वत्र सम्भवात्। सर्वस्मिन्ननुमाने सम्बन्धकालेऽनुभूतमिव पश्चाल्लिङ्गेन गृह्यते, तस्मादेकमेव पूर्ववदिति न वक्तव्यम्। सम्बन्धान्तरेण चेदं पूर्ववद् गृह्यते, तदनिर्देशादनुमानमनिर्दिष्टम्। एवं तावद् इवो न युज्यते।

न[1] मतुब् व्यभिचारित्वात्। यदि मतुप् क्रियते पूर्वं कारणमस्य कार्यस्यास्तीति पूर्ववत्, तद्विषयं ज्ञानमपि पूर्ववत्, कारणात् कार्यज्ञानमिति यत् तदपि व्यभिचाराद् न प्रमाणम्। कारणे सत्यपि प्रतिबन्धात् कारणान्तराभावाच्च कार्यं नोत्पद्यते। एवं तावत् 'पूर्ववत्' न युज्यते।

इवो वा शेषवत्यपि। शेषवत्यपि[2] यदि इवः क्रियते शेषेण प्रत्यक्षेण तुल्यो विषयो यस्यास्ति तज्ज्ञानं शेषवदिति तदपि व्यभिचारान्न प्रमाणम्। न ह्यवश्यं तुल्यरूपाद् रसादि तुल्यं भवति। एवं शेषवत्यपीवो न युज्यते।

मतुपा चेदव्युत्पत्तौ न सम्बन्धान्तराद्[3] गतिः।

यदि मतुप् [ क्रियते ] शेषं कार्यमत्रास्तीति शेषवत् कारणम्, तद्विषयं ज्ञानमपि शेषवत्। तथा सति कार्यत्वाग्रहणेऽविनाभावित्वसम्बन्धग्रहणादनुमानं न स्यात्। तच्च दृष्टम्। एवं यत् कृतकादिभिरनित्याद्यनुमानं तदपि न स्यात्। पूर्वेषु यथोक्तानुमानेष्वपि 'अव्युत्पत्तौ न[4] सम्बन्धान्तराद् गतिः' इति वक्तव्यम्, अन्ते[5] निर्देशात्। कारणत्वादीनां च सम्बन्धित्वेऽनुमेये कार्यत्वाद्याकारज्ञानोत्पत्तिः प्रसज्यते, सम्बन्धमात्रद्वारेण लिङ्गाल्लिङ्गि[6]ज्ञानोत्पत्तेः सर्वाकारं च ग्रहणं स्यात्, सर्वात्मना कारणकार्यत्वात्।

---

१ दृश्यतां पृ० २१५ टि० २॥ २ यत् कारणं शेषयोगेन शेषवत् तज्ज्ञानमपि शेषवत् तथापि कार्यग्रहणेऽविनाभावसम्बन्धं गृहीत्वा कारणानुमानं न स्यात्। तच्च दृष्टम्। एवं कृतकादेरनित्याद्यनुमानमपि [ न ] स्यात्। पूर्वं यथोक्तानुमानेष्वपि सम्बन्धाव्युत्पत्तौ 'न सम्बन्धान्तराद् गतिः' इति वक्तव्यम्, उत्तरत्र निर्देशात्। कारणत्वादेः सम्बन्धित्वेन कार्याद्याकारज्ञानोत्पत्तिरनुमाने प्रसज्यते। सम्बन्धित्वमात्रद्वारेण लिङ्गेन लिङ्गिज्ञानोत्पत्तिः। सर्वाकारं च सर्वात्मना कारणकार्यग्रहणात्। एवं पूर्ववच्छेषवच्च न युज्यते V॥ ३ दृश्यतां पृ० २१५ टि० ४, ५॥ ४ PS[1] PSV[1] मध्ये कारिकांशत्वमस्य, दृश्यतां पृ० २१५ टि० ३, ४॥ ५ थ° मर्° K। पिय° म° ल°=उत्तरत्र V. VT.॥ ६ तॆग्स्° दङ्° तॆग्स्° चन्° ग्यि°=लिङ्गलिङ्गि° PSV॥

यथा पूर्ववच्छेषवच्च न युक्तं तथा सामान्याद् दृष्टमप्येवम् । तदपि कारणकार्यसम्बन्धादेवातिपरोक्षभूते विषयेऽनुमापकत्वात् ।

सर्वत्राप्यनुमेयज्ञानस्य प्रमाणत्वात् प्रमेये फलमन्यन्न लभ्यते । न हि निष्फलं प्रमाणं युक्तम् , करणस्य कर्मणि व्यापारेण फलवत्त्वात् ।

लिङ्गज्ञानं प्रमाणं चेत् । स्यादेतत्–लिङ्गज्ञानं प्रमाणमनुमेयज्ञानं फलमिति । तदपि न [युक्तम् , तच्च V] विषयभेदात् । 'न हि विषयान्तरे प्रमाणं भवति, अन्यत्र फलं भवति' इति पूर्वमुक्तम् । लिङ्गज्ञानस्य प्रमाणत्वे व्यपदेशो न सिध्यति । योऽनुमाने पूर्ववच्छेषवदिति[6] लिङ्गिनो व्यपदेशः स न सिध्यति, अनुमानस्य लिङ्गविषयत्वात् ।

यच्च 'पूर्ववद् [अनुमानम् V] एव त्रिविधं त्रैकाल्यग्रहणात्' इत्यवधारणं तद् [अपि V] न युक्तम् , यस्मात् सर्वं त्रिकालविषयम् । सर्वमनुमानं त्रिकालमुच्यते । तत्र 'इव'कारेण सम्बन्धनिर्देशाभावात् त्रिविधमनुमानमिति न युज्यते । PSV[1] C. ed. D. ed. N. ed. पृ० ३२b–३३b । PSV[2] N. ed. पृ० ११७a–११८b ॥

## विशालामलवती टीका ।

नैयायिकानामपीत्यादि ।....तत्पूर्वकमित्यादि...। यस्य पूर्वं प्रत्यक्षेण लिङ्गिलिङ्गिनौ प्रसिद्धौ तत्सम्बन्धो वा तस्यैवोत्तरकालं लिङ्गमात्रदर्शनेन लिङ्गी अनुमेय इति तत् प्रत्यक्षपूर्वकं भवति । पूर्वेण तुल्यं पूर्ववत् । यथा सम्बन्धकाले प्रत्यक्षेण वस्तु

---

१ 'तच्च' इत्यपि पाठोऽत्र भवेत् । दे° यङ्° PSV. VT. । तदपि कारणकार्यसम्बन्धादेवातिपरोक्षभूतस्य कर्मणो मानमुच्यते इति V ॥ २ दृश्यतां पृ० २१५ टि० ५ ॥ ३ कारकस्य कर्मणि व्यापारेण फलवत्त्वात् V ॥ ४ 'विषयान्तरे प्रमाणभावोऽन्यत्र फलभावो नास्तीति पूर्वमुक्तम्' इत्यपि पाठः स्यात् ॥ ५ दृश्यतां पृ० २१५ टि० ६ ॥ ६ लिङ्गस्य व्यपदेशोऽयं न सिध्यति K । लिङ्गिनो विभागः स न सिध्यति V ॥ ७ सर्वमनुमानं त्रिकालविषयं वर्तते 'त्रिकालम्' इति वचनात् V । दृश्यतां पृ० २१५ टि० ७ ॥ ८ तत्र 'इवः' इति पक्षे सम्बन्धनिर्देशाभात् त्रिविधमनुमानं न युज्यते V ॥ ९ अतः परं PSV[1] मध्ये 'दे° ल° दे° ल्त° बुडि° जेंस्° सु° द्पग्° क्यङ्° ब्कग्° प° यिन्° नो '=' तत्र इवोऽप्यनुमाने निषिद्धः' इति 'तत्र इवानुमानमपि निषिद्धम्' इति वाऽधिकः पाठो दृश्यते । विशालामलवत्यां तु 'तत्रेवोऽपि नास्ति' इति 'तत्र चेवो न विद्यते' इति वा प्रतीकरूपः पाठो दृश्यते, अतः 'तत्र चेवो न विद्यते, तत्र इवकारेण सम्बन्धनिर्देशाभावात् त्रिविधमनुमानमिति न युज्यते' ईदृशः पाठोऽप्यत्र सम्भवेदिति भाति ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रतिपन्नं तथैवोत्तरकालं लिङ्गदर्शनादपि तत्र ज्ञानमुपजायते, तस्मात् तत् पूर्ववद् भवति। शेषेण प्रत्यक्षेण तुल्यं शेषवद् वस्तु, तद्विषयं ज्ञानमपि शेषवत्। यथा एकं फलं रसद्वारेण प्रत्यक्षीकृत्य शेषाण्यपीदृग्रसानि प्रत्यक्षरसतुल्यत्वात् तद्वदित्यनुमानम्...। अथवा पूर्वं कारणं तदस्मिन्नप्यस्तीति पूर्ववत् कार्यम्, तद्विषयं ज्ञानमपि पूर्ववद् यत् कारणात् कार्यानुमानम्। शेषं कार्यं तदस्मिन्नस्तीति शेषवत् कारणम्, तद्विषयं ज्ञानमपि शेषवद् यत् कार्यात् कारणानुमानम्। सामान्यतोदृष्टं यदन्यसादृश्यादन्यस्यात्यन्तपरोक्षभूतस्य कर्मणो ज्ञानम्। यथा चैत्रस्य गतिपूर्विकां देशान्तरप्राप्तिमुपलभ्य तत्तुल्यत्वेनादित्यस्यापि गतिपूर्विका अस्ताचलप्राप्तिरनुमीयते। विस्तरेण निर्देशादेव त्रिविधत्वसिद्धौ त्रिविधमिति वचनं पूर्ववदनुमानस्यैकस्य त्रिकालविषयत्वेन त्रिविधत्वज्ञापनार्थम्। तत्र नदीपूराद् वृष्टिरित्यतीतेऽनुमानम्। पिपीलिकाण्डसञ्चाराद् भविष्यति वृष्टिरित्यनागते। केकायितादयं मयूर इति वर्तमाने। अत्र मतुपा पूर्ववत्त्वं न सम्भवतीति योज्यम्। सम्बन्धो नेन्द्रियग्राह्य इति भूतगुणवत् सम्बन्धिभ्यो भेदेनाप्रतिभासनादित्याशयः। न च सर्वत्रेति...। नेवः सर्वत्र सम्भवादीति....। सम्बन्धान्तरेण चेदमिति सम्बन्धान्तरं सम्बन्धविशेषोऽविनाभावः, तत्सामर्थ्येन पूर्ववदर्थः प्रतीयते, तन्निर्देशाभावादनुमानमनिर्दिष्टमेव।

नन्वयं मतुब् अस्तु, यथोक्तदोषश्च न भवति, न हि सर्वमनुमानं कारणात् कार्यविषयम्। सम्बन्धश्चात्र निर्दिष्ट एव कार्यकारणभावस्य प्रदर्शितत्वादिति चेत्, तत आह–न मतुब् व्यभिचारित्वादिति....।[2]शेषवत्यपीव इत्यादिनात्रापि तमनन्तरोक्तमेव दोषमाह। न ह्यवश्यमित्यादि। तुल्यरूपादीनां तुल्यरसोत्पत्तेर्नियोगोऽयं नास्ति। एतावत्तु स्यात्–तादृग्रूपाण्येततुल्यकारणान्येतादृग्रसानीति स्यात, न तु तुल्यरूपमात्रादनुमानं व्यभिचारात्। मतुपा चेदव्युत्पत्तौ [3]नेत्यादि। अव्युत्पत्तिरगतिः। किमिति चेत्, यतः कार्यात् कारणानुमानमिदं कार्यत्वस्य तस्मात् कार्यरूपेणैवाप्रतीतौ लिङ्गस्यानुमेये कारणेऽविनाभावित्वग्रहणात् प्रतीतिर्न स्यात्, सा च दृष्टा।........ एवं कृतकादिभिरिति मतुप्पक्षेऽव्यापकत्वमाह। कृतकत्वादीनामनित्यत्वादिभिः कार्यकारणभावो नास्तीति।... ...पूर्ववत्यपीति पूर्ववदित्यत्र इवपक्षे विषाणादिलिङ्गेन गवाद्यर्थानुमाने समवायसम्बन्धः।........गवाद्यर्थानुमानं न स्यात्। तच्च दृष्टम्।........ धूमादग्न्यनुमाने संयोगसम्बन्धः। तस्य चाग्रहणे प्रतीतिर्न स्यात्। सा च दृष्टा।........ मतुप्प्रत्ययपक्षेऽभ्रादीनां वृष्ट्यादिभिः सह कार्यकारणभावसम्बन्धः। शेषवत्यपीवपक्षे रूपस्य

१ 'व्यभिचाराद् मतुब् नास्ति' इत्यपि भवेत् पाठः। दृश्यतां पृ० २१६ टि० २॥ २ दृश्यतां पृ० २१५ टि० २॥ ३ न स्यादित्यादि VT। दृश्यतां पृ० २१५ टि० ४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रसं प्रति नैकार्थसमवाय इत्येते यथोक्तसम्बन्धाः। अन्ते निर्देशादिति, शेषवति मतुप्पक्षो विचारणाया अ[2]न्तः, तत्रास्य निर्दिष्टत्वात्। कारणत्वादीनां च सम्बन्धित्व इति कारणादीनां कार्यत्वादिभिः सह लिङ्गलिङ्गिभावसम्बन्ध इष्यमाणे कारणत्वादेः कार्यत्वादिमात्रापेक्षत्वात् तत्र लिङ्गिनि कार्यत्वद्याकारमेव ज्ञानं स्यात्, न वृष्ट्याद्याकारम्। कुत इत्याह—सम्बन्धमात्रद्वारेणेत्यादि। सम्बन्धाभावे लिङ्गालिङ्गिज्ञानं न जायते, लिङ्गं च यथा येन सह सम्बद्धं तथैव तद् गमयति नान्यथा मा भूदतिप्रसङ्ग इति कारणत्वादिनाऽभ्रादयः कार्यत्वादिना वृष्ट्यादिभिः सम्बद्धा इति तन्मात्रं प्रतीयेत। स्यादेतत्—सर्वात्मना तेषां कार्यकारणभावादयः सम्बन्धाः, नांशेन, तस्मान्नायं प्रसङ्ग …इत्याह—सर्वाकारं च ग्रहणमित्यादि…। सामान्याद् दृष्टमप्येवमिति। कुत इत्याह—तदपीत्यादि। ननु पूर्वेभ्यस्तस्य को विशेष इत्याह—अतिपरोक्षभूत इति। सर्वत्रापीति पूर्ववदादिष्वपि। पूर्ववच्छेषवदिति वादिना अनुमेयज्ञानं प्रमाणमुच्यते। सैव चार्थाधिगतिः। फलान्तरं च नास्ति। ततोऽभ्युपगमहानिः।……स्यादेतत्—फलाभ्युपगमो नास्त्येवेत्याह-नेत्यादि। यत् करणं तत् कर्मणि व्यापारफलवत्, कुठारवत्, अनुमानमपि तथेति स्वभावः। सिद्धसाधनत्वमाशङ्क्याह-लिङ्गज्ञानमित्यादि। व्यपदेशो न सिध्यति इति। यस्मादनुमेयमेव पूर्ववच्छेषवच्च मुख्यम्, ज्ञानं तूपचारात् तद्विषयत्वात् तथा व्यपदिश्यते इति कीर्तने यत एवमयं व्यपदेशो भवति। लिङ्गज्ञानं च न तद्विषयम्, लिङ्गस्य पूर्ववच्छेषवत्त्वेन शास्त्रेऽपङ्क्तीर्तनादित्यभ्युपगमहानिः। यच्चेत्यादिनाप्यभ्युपगमहानिमेवाह। तथाहि तत्रैवोक्तम्-"एकैकस्यापि त्रैविध्यज्ञापनार्थं त्रिविधम्" [ ] इति। को हेतुरिति चेत्, अयमेव त्रैकाल्यग्रहणादिति। एवञ्च मतुप्पक्षेऽनुपपन्नमेव, कारणात् कार्यस्यानागतस्यैव ग्रहणात्। शेषवत्यपि न, अनागतस्यानुमानासम्भवात्, कारणात् पूर्वं कार्यस्य सम्भवाभावात्। पक्षिलेनोक्तम्-'द्रव्यादिपदार्थप्रतिवेधाच्छब्दे गुणत्वसंसाधनं शेषवत्' इति। अत्र च सम्बन्धस्यानिर्देशात् तस्यानुमानत्वमेव दुर्लभम्, का कथा त्रैविध्यस्य? … …त्रत्रैशोऽपि नास्तीति पूर्ववदनुमाने स्वसम्बन्धनिर्देश एव नास्ति, तस्मादनुमानत्वमनिर्दिष्टमिति कुतोऽस्य त्रैविध्यम्। पूर्वेण तुल्यमिति प्रकारमात्रदर्शनान्न निर्देशः, स्मरणादिष्वपि पूर्ववद् ग्रहणात्। एवं शेषेण प्रत्यक्षेण तुल्यमित्यत्रापि सम्बन्धनिर्देशो नास्त्येवेति।"—D. ed. पृ० १०६a–११०a, P. ed. पृ० ११९b–१२४a॥

---

१ पृ० २१६ टि० ५॥ २ भिन्न° म° स्ते=उत्तरः (?)॥ ३ दे° ल° नि° त्त° बु° यङ्° म° थिन्° नो° शेन्° D. ed.। दे° ल° नि° ऽत्र° बु° यङ्° म° थिन्° नो° शेन्° P. ed.॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥ ॐ अर्हं सद्गुरुभ्यो नमः ॥

# अष्टमं परिशिष्टम् ।

वैक्रमे चतुर्दशे पञ्चदशे च शतके स्थितिमद्भिर्न्यायकन्दलीपञ्जिकादिग्रन्थप्रणेतृभिर्जैनाचार्यैः राजशेखरसूरिभिर्विरचिते वाराणसेयश्रीयशोविजयजैनग्रन्थमालायां प्रकाशिते षड्दर्शनसमुच्चये नैयायिकवैशेषिकयोः समानं यल्लिङ्गदेवतादिस्वरूपं वर्णितं तदत्रैतिह्योपयोगित्वादुद्ध्रियते—

"अथ यौगमतं ब्रूमः शैवमित्यपराभिधम् ।
ते दण्डधारिणः प्रौढकौपीनपरिधायिनः ॥ ८४ ॥

---

१ चतुर्विंशतिप्रबन्धाभिधानो ग्रन्थो राजशेखरेण १४०५ विक्रमाब्दे रचितः ॥ २ A Third Report of Operations in Search of Sanskrit Mss. in the Bombay Circle, April 1884–March 1886, Extra Number of the Journal of the Bombay Branch of the Royal Asiatic Society 1887 इत्यत्र Peter Peterson महाशयेन **खंभात**[Cambay]नगरे पार्श्वचन्द्रगच्छीयस्य (?) जैनमुनेः कल्याणचन्द्रस्य ग्रन्थालये संगृहीतानां विशिष्टानां २४ ग्रन्थानां सूचिः [ List of the more important paper Mss. preserved in the Library of the late Kalyāṇachandra, Cambay, pp. 243–284 ] प्रदत्ता तेषां चाद्यान्त्यभागा अपि तत्रोद्धृताः। तत्र पृ० २७२–२७६ मध्ये तेन राजशेखरकृताया **न्याय**कन्दलीपञ्जिकाया आद्यान्त्यभागावुद्धृतौ ताविहाप्युपयोगित्वादुद्ध्रियेते–

"20……**श्री**धरकृताया **न्याय**कन्दल्याः पञ्जिका। [कर्ता] राजशेखरः। Folios 1 to 70. Dated Samvat 1480=A. D. 1424.

Begins: ॐ **नमः सर्वज्ञाय** ॥

**अनन्तदर्शनज्ञानसु[ख]वीर्यमयात्मने। जिनाय तस्मै कस्मैचित् परस्मै रहसे नमः ॥ १ ॥**

**श्रीमज्जिनप्रभविभोरधिगत्य न्यायकन्दलीं किञ्चित्। तस्यां विवृतिलवमहं करवै स्वपरोपकाराय ॥ २ ॥**

इह किल पूर्वमजिह्मब्रह्माभ्यासदूरीकृतप्रमादाय मुनये **कणादाय** स्वयमीश्वर **उलूक**रूपधारी प्रत्यक्षीभूय द्रव्यगुणकर्मसामान्यविशेषसमवायलक्षणं पदार्थषट्कमुपदिदेश। तदनु स महर्षिर्लोकानुकम्पया षट्पदार्थरहस्यप्रपञ्चनपराणि सूत्राणि रचयाञ्चकार। तेषु सूत्रेषु **प्रशस्तकरदेवो** भाष्यं सकृद्गुणनमात्रेण महोग्रदष्टकविषापहारदृष्टलोकोत्तरवैभवं चकार। तत्र चतस्रो वृत्तयो निर्वृत्ताः। एकां **व्योमवती**नाम्नीं वृत्तिं व्योमशिवाचार्यो जुगुम्फ। द्वितीयां तु **न्याय**कन्दल्यभिधानां श्रीधराचार्यः संददर्भ। तृतीयां **किर**णावलीनाम्नीमुदयनाचार्यस्ततान। चतुर्थीं तु **ली**लावतीति ख्यातां **श्री**वत्साचार्यो बबन्ध। चतस्रोऽपि गम्भीरार्थाः। तत्रेमां न्यायकन्दलीं प्रारभमाणः **श्रीधर**देवः शिष्टसमयपरिपालनायेश्वरविष्णुब्रह्मलक्षणामिष्टदैवतत्रयीमेकेनाद्यश्लोकेन प्रणिदधानः प्राह। स चायम्—

**अनादिनिधनं देवं जगत्कारणमीश्वरम्। प्रपद्ये सत्यसंकल्पं नित्यविज्ञानविग्रहम् ॥ १ ॥**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Ends: इति समवायपदार्थः समर्थितस्तत्समर्थनायां च समर्थितेयं भट्टश्रीश्रीधरविरचित-न्यायकन्दलीवृत्तिरिति ॥

अथ भट्टश्रीधरो ग्रन्थप्रशस्तिं प्रस्तौति—सुवर्गेत्यादिपद्यैः । अक्षीणनिजपक्षेष्विति । अक्षीणनिजप्रतीतेषु विद्वत्सु इति यावत् । अच्छुकेति । अंभोकेत्यपि पाठः । षट्पदार्थहितामिति । तर्कपक्षे षड्भ्यः पदार्थेभ्यो द्रव्यगुणकर्मसामान्यविशेषसमवायेभ्यो हितां । द्वितीयपक्षे षट्पदार्थं भ्रमरार्थं हिताम् । श्रीपाण्डुदासेति कायस्थस्याख्या । उपार्यं करोतीति, अत्रत्यं जलं तैरेवार्थैः शब्दपरावर्त्तनेन स्वग्रन्थान्तर्निक्षिपति ततश्च मयेदं रचितमिति वक्तीत्यर्थः । पञ्चानामिति ब्रह्महत्यासुरापानस्तेयगुर्वङ्गनागमनतत्संसर्गाख्यानामिति

**न्याय**कन्दलीप्रशस्तिः ।

**श्रीप्रश्नवाहनकुले कोटिकनामनि गणे जगद्वन्द्ये । श्रीमध्यमशाखायां वंशे श्रीस्थूलिभद्रमुनेः ॥ १ ॥**
**गच्छे हर्षपुरीये श्रीमज्जयसिंहसूरिवरशिष्यः । षष्ठाष्टमतीव्रतपाः षड्विकृतित्यागसाहसिकः ॥ २ ॥**
**देव्याश्चक्रेश्वर्याः प्रतिपन्नः सुतः श्रुताब्धिगोविन्दः । श्रीअभयसूरिरभवन्निःसंगः सिद्धबहुविद्यः ॥ ३ ॥**
**त्रिभिर्विशेषकम् ।**

**परःसहस्रान् भूदेवान् यक्षं कडमडं च यः । प्रबोध्य मेडतपुरे वीरचैत्यमचीकरत् ॥ ४ ॥**
**श्रीगूर्जरेश्वरो दृष्ट्वा तीव्रं मलपरीषहम् । श्रीकर्णो विरुदं यस्य मलधारीत्यघोषयत् ॥ ५ ॥**
**नाथं सुराष्ट्रराष्ट्रस्य खेंगारं प्रतिबोध्य यः । उज्जयन्ततीर्थपथं खिलीभूतमवीवहत् ॥ ६ ॥**
**यस्योपदेशान्निर्मुच्य चतस्रश्चपलेक्षणाः । प्रद्युम्नो राजसचिवश्चारित्रं प्रत्यपद्यत ॥ ७ ॥**
**श्रीहेमचंद्र इत्यासीत्सूरिर्भूरिगुणः स तु । ग्रन्थलक्षविनिर्माता निर्ग्रन्थानां विशेषकः ॥ ८ ॥**
**प्रतिबोध्य सिद्धभूधवमुद्दण्डैः कनकदण्डकलसैर्यैः । उत्तंसितवान् परितः स्वदेशपरदेशचैत्यानि ॥ ९ ॥**
**प्रतिवर्षं जीवरक्षामशीत्यहमशीत्यहम् । यस्योपदेशात् सिद्धेशस्ताम्रपत्रेष्वलीलिखत् ॥ १० ॥**
**श्रीश्रीचन्द्रमुनीन्द्रो विबुधेन्दुमुनिश्च तस्य वंश्यौ द्वौ । यौ लाटदेशमुद्रामुज्झित्वा जगृहतुर्दीक्षाम् ॥११॥**
**श्रीचन्द्रसूरिशिष्यः श्रीमुनिचन्द्रः प्रभुः शुचिचरित्रः । चौलुक्यमानलनृपं वाग्मी प्रव्राजयामास ॥ १२ ॥**
**तत्क्रमिको देवप्रभसूरिः किल पाण्डवायनचरित्रम् । श्रीधर्मसारशास्त्रं च निर्ममे सुकविकुलतिलकः ॥१३॥**
**तदीयसिंहासनसार्वभौमप्रसूरीश्वरः श्रीनरचन्द्रनामा । सरस्वतीलब्धवरप्रसादस्त्रैविद्यमुष्टिन्धयधीर्बभूव ॥१४॥**
**टिप्पनमनर्घराघवशास्त्रे किल टिप्पनं च कन्दल्याम् । सारं ज्योतिषमदभ्रः प्राकृतदीपिकामपि च ॥१५॥**
**तस्य गुरोः प्रियशिष्यः प्रभुर्नरेन्द्रप्रभः प्रभावाढ्यः । योऽलङ्कारमहोदधिमकरोत् काकुत्स्थकेलिं च ॥१६॥**

**राजानः प्रतिबोधिताः कति कति ग्रन्थाः स्वयं निर्मिताः**
**वादीन्द्राः कति निर्जिताः कति तपांस्युग्राणि तप्तानि च ।**
**श्रीमद्धर्षपुरीयगच्छमुकुटैः श्रीसूरिसुत्रामभि—**
**स्तच्छिष्यैर्मुनिभिश्च वेत्ति नवरं वागीश्वरी तन्म(न्मि)तिम् ॥ १७ ॥**

**नरचन्द्रसूरिवंशे सूरिः श्रीपद्मदेव इत्यासीत् । सूरिः श्रीश्रीतिलकस्तस्य मृगेन्द्रासने जयति ॥ १८ ॥**
**तच्चरणरेणुकणिकाभूषितभालस्थलोऽत्र कन्दल्याम् । श्रीराजशेखरोऽयं सूरिः श्रीपञ्जिकामतनोत् ॥१९॥**
**पूज्यश्रीतिलकाभिधानसुगुरोः सामर्थ्यमेतद् ध्रुवं मादृशोऽपि यदत्र सभ्यपुरतो धत्ते वचश्चापलम् ।**
**यद्डिम्भा अपि शुद्धसंस्कृतगिरः कश्मीरदेशोद्भवा वाग्देव्याः स खलु प्रभावविभवस्तत्र स्थितायाश्चिरात् ॥२०॥**
**यदत्र दोषकालुष्यं जातं मे मतिमान्द्यतः । तत् क्षालयन्तु सन्तः स्वबुद्धिगङ्गाम्बुधारया ॥ २१ ॥"**

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

कम्बलिकाप्रावरणा जटापटलशालिनः।
भस्मोद्धूलनकर्तारो नीरसाहारसेविनः ॥ ८५ ॥
दोर्मूले तुम्बकभृतः प्रायेण वनवासिनः।
आतिथ्यकर्मनिरताः कन्दमूलफलाशनाः ॥ ८६ ॥
सस्त्रीका अथ निस्त्रीका निस्त्रीकास्तेषु चोत्तमाः।
पञ्चाग्निसाधनपरा बाणलिङ्गधराः करे ॥ ८७ ॥
विधाय दन्तपवनं प्रक्षाल्यांह्रिकराननम्।
स्पृशन्ति भस्मनाङ्गं त्रिस्त्रिः शिवध्यानतत्पराः ॥ ८८ ॥
यजमानो वन्दमानो वक्ति तेषां कृताञ्जलिः।
ॐ नमः शिवायेत्येवं शिवाय नम इत्यसौ ॥ ८९ ॥
तेषां च शङ्करो देवः सृष्टिसंहारकारकः।
तस्यावताराः सारा ये तेऽष्टादश तदर्चिताः ॥ ९० ॥
तेषां नामान्यथ ब्रूमो नकुलीशोऽथ कौशिकः।
गार्ग्यो मैत्र्यः कौरुषश्च ईशानः षष्ठ उच्यते ॥ ९१ ॥
सप्तमः[१] पारगार्ग्यस्तु कपिलाण्डमनुष्यकौ।
अपरकुशिकोऽत्रिश्च पिङ्गलाक्षोऽथ पुष्पकः ॥ ९२ ॥
बृहदाचार्योऽगस्तिश्च सन्तानः षोडशः स्मृतः।
राशीकरः सप्तदशो विद्यागुरुस्थापरः ॥ ९३ ॥
एतेऽष्टादश तीर्थेशास्तैः सेव्यन्ते पदे पदे।
पूजनं प्रणिधानं च तेषां ज्ञेयं तदागमात् ॥ ९४ ॥
अक्षपादो गुरुस्तेषां तेन ते ह्याक्षपादकाः।
उत्तमां संयमावस्थां प्राप्ता नग्ना भ्रमन्ति ते ॥ ९५ ॥
अयमेषां विशेषस्तु यत् प्रजल्पन्ति पर्षदि ॥ १०२ ॥
शैवीं दीक्षां द्वादशाब्दीं सेवित्वा योऽपि मुञ्चति।
दासीदासोऽपि भवति सोऽपि निर्वाणमृच्छति ॥ १०३ ॥
एतेषु निर्विकारा ये मीमांसां दर्शयन्ति ते।
तत्र पद्यमिदं चास्ति मोक्षमार्गप्ररूपकम् ॥ १०४ ॥

१ 'सप्तमोऽपरगार्गिश्च' इति पाठान्तरम्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न स्वर्धुनी न फणिनो न कपालदाम
नेन्दोः कला न गिरिजा न जटा न भस्म।
यत्रास्ति नान्यदपि किञ्चिदुपास्महे तद्
रूपं पुराणमुनिशीलितमीश्वरस्य ॥ १०५ ॥
स एव योगिनां सेव्यो योऽर्वाचीनस्तु योगभाक्।
स ध्यायमानो राज्यादिसुखलुब्धैर्निषेव्यते ॥ १०६ ॥

उक्तं च तैः स्वयोगशास्त्रे—

वीतरागं स्मरन् योगी वीतरागत्वमश्नुते।
सरागं ध्यायतः पुंसः सरागत्वं तु निश्चितम् ॥ १०७ ॥
येन येन हि भावेन युज्यते यन्त्रवाहकः।
तेन तन्मयतां याति विश्वरूपो मणिर्यथा ॥ १०८ ॥
श्रुतानुसारतः प्रोक्तं नैयायिकमतं मया।
एतेषामेव शास्त्रेभ्यस्तांस्तान् भावान् विदुर्बुधाः ॥ १०९ ॥
एतेषां यजमानस्तु सुताराहृदयेश्वरः।
सत्यवादी हरिश्चन्द्रो रामलक्ष्मणपूर्वजः[1] ॥ ११० ॥
भरटानां व्रतादाने वर्णव्यक्तिर्न काचन।
यस्य पुनः शिवे भक्तिर्व्रती स भरटो भवेत् ॥ १११ ॥
अमीषां सर्वतीर्थेषु भरटा एव पूजकाः।
शेषा नमस्कारकराः सोऽपि कार्यो न सन्मुखः(खैः ?) ॥ ११२ ॥
अथ वैशेषिकं[2] ब्रूमः पाशुपतान्यनामकम्।
लिङ्गादि यौगवत् तेषां ते ते तीर्थकरा अपि ॥ ११३ ॥......
यौगे वैशेषिके तन्त्रे प्रायः साधारणी क्रिया।
आचार्यः[3] शङ्कर इति नाम प्रागभिधापरम् ॥ १२३ ॥
अमीषां तर्कशास्त्राणि षट् सहस्राणि कन्दली।
श्रीधराचार्यरचिता, प्रशस्तकरभाष्यकम् ॥ १२४ ॥
तत्र(तु) सप्तशतीमानं, सूत्रं तु त्रिशतीमितम्।
व्योमशिवाचार्यकृता टीका व्योममतिर्मता ॥ १२५ ॥

१ 'पूर्वजाः' इति पाठान्तरम् ॥ २ "द्रव्यगुणकर्मसामान्यविशेषसमवायाख्याः षट् पदार्थाः पारमार्थिकाः सन्तीत्याहुराक्षपादादयः। अक्षपादशिष्यत्वादाक्षपादा नैयायिकाः। कणादशिष्यास्तु वैशेषिकाः काणादा उच्यन्ते।"—**तत्त्वसंग्रहपञ्जिका**, पृ० १८५ ॥ ३ आचार्यस्य **कर** इति (?) ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सा स्यान्नव सहस्राणि, परा तु किरणावली।
सा तूदयनसन्दब्धा उद्देशात् षट्सहस्रिका ॥ १२६ ॥
श्रीवत्साचार्यरचिता टीका लीलावती मता।
सापि स्यात् षट् सहस्राणि, एकं त्वात्रेयतन्त्रकम् ॥ १२७ ॥
तत्तु सम्प्रति व्युच्छिन्नं शिष्या मन्दोद्यमा यतः।
आचारव्यवहारौ च प्रायश्चित्तं च ते विदुः ॥ १२८ ॥
शिवेनोलूकरूपेण कणादस्य मुनेः परः।
मतमेतत् प्रकथितं तत औलूक्यमुच्यते ॥ १२९ ॥
अक्षपादेन ऋषिणा रचितत्वात्तु यौगिकम्
आक्षपादमिति ख्यातं प्रायस्तुल्यं मतद्वयम् ॥ १३० ॥"

—राजशेखरसूरिविरचितः षड्दर्शनसमुच्चयः पृ० ८-११.

---

१ **हरिभद्र**सूरिरचितषड्दर्शनसमुच्चयस्य बृहद्वृत्तौ बाहुल्येनैतदेवोपजीव्य **गुणरत्न**सूरिभिर्नैयायिकवैशेषिकाणां समानं लिङ्गदेवतादिस्वरूपं वर्णितम्। तद्यथा—

"अथादौ नैयायिकानां यौगापराभिधानानां लिङ्गादिव्यक्तिरुच्यते। ते च दण्डधराः प्रौढकौपीनपरिधानाः कम्बलिकाप्रावृता जटाधारिणो भस्मोद्धूलनपरा यज्ञोपवीतिनो जलाधारपात्रकरा नीरसाहाराः प्रायो वनवासिनो द्रोर्मूले तुम्बकं बिभ्राणाः कन्दमूलफलाशिन आतिथ्यकर्मनिरताः सस्त्रीका निःस्त्रीकाश्च, निःस्त्रीकास्तेषूत्तमाः। ते च पञ्चाग्निसाधनपराः करे जटादौ च प्राणलिङ्गधराश्चापि भवन्ति। उत्तमां संयमावस्थां प्राप्तास्तु नग्ना भ्रमन्ति। एते प्रातर्दन्तपादादिशौचं विधाय शिवं ध्यायन्तो भस्मनाऽङ्गं त्रिस्त्रिः स्पृशन्ति। यजमानो वन्दमानः कृताञ्जलिर्वक्ति 'ॐ नमः शिवाय' इति। गुरुस्तथैव 'शिवाय नमः' इति प्रतिवक्ति। ते च संसद्येवं वदन्ति—

शैवीं दीक्षां द्वादशाब्दीं सेवित्वा योऽपि मुञ्चति।
दासीदासोऽपि भवति सोऽपि निर्वाणमृच्छति ॥

तेषामीश्वरो देवः सर्वज्ञः सृष्टिसंहारादिकृत्। तस्य चाष्टादशावतारा अमी—[1]नकुलीशोष्य(शोऽथ ?) कौशिकः[2] [3]गार्ग्यः [4]मैत्र्योऽकौरुषः[5] ईशानः[6] [7]पारगार्ग्यः [8]कपिलाण्डो [9]मनुष्यकः [10]कुशिकोऽत्रिः[11] पिङ्गलः[21] [13]पुष्पको [14]बृहदार्योऽगस्तिः[15] [16]सन्तानो [17]राशीकरो [18]विद्यागुरुश्च। एते तेषां तीर्थेशाः पूजनीयाः। एतेषां पूजाप्रणिधानविधिस्तु तदागमाद् वेदितव्यः। तेषां सर्वतीर्थेषु भरटा एव पूजकाः। देवानां नमस्कारो न सन्मुखैः कार्यः। तेषु ये निर्विकारास्ते स्वमीमांसागतमिदं पद्यं दर्शयन्ति—

**न स्वर्धुनी न फणिनो न कपालदाम नेन्दोः कला न गिरिजा न जटा न भस्म।**
**यत्रान्यदेव च न किञ्चिदुपास्महे तद् रूपं पुराणमुनिशीलितमीश्वरस्य ॥**

स एव योगिनां सेव्यो ह्यर्वाचीनस्तु भोगभाक्।
स ध्यायमानो राज्यादिसुखलुब्धैर्निषेव्यते ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥ ॐ अर्हं सद्गुरुभ्यो नमः ॥

# नवमं परिशिष्टम् ।

## चन्द्रानन्दविरचितवृत्तौ विद्यमानानामवतरणानामकारादिक्रमेण सङ्ग्रहः ।


| | पृष्ठम् |
|---|---|
| अग्निहोत्रं जुहुयात् स्वर्गकामः [ मैत्रायण्युपनिषत् ६ । ३६ ] | ४५ |
| अधोऽम्बूनि नयति | २ |
| अशरीरं वाव सन्तं प्रियाप्रिये न स्पृशतः [ छान्दोग्योपनिषत् ८ । १२ । १ ] | १ |
| ‘ एवंविधप्रसिद्धसम्बन्धस्यार्थैकदेशमसन्दिग्धं पश्यतः शेषानुव्यवसायो यः स लिङ्गदर्शनात् सञ्जायमानो लैङ्गिकम् ’ इति वृत्तिकारः | ६९ |


---

उक्तं च तैः स्वयोगशास्त्रे—

**वीतरागं स्मरन् योगी वीतरागत्वमश्नुते । सरागं ध्यायतस्तस्य सरागत्वं तु निश्चितम् ॥**
**येन येन हि भावेन युज्यते यन्त्रवाहकः । तेन तन्मयतां याति विश्वरूपो मणिर्यथा ॥** इति ।

एतत् सर्वं लिङ्गदेवादिस्वरूपं **वैशेषिकमते**ऽप्यवसातव्यम्, यतो नैयायिकवैशेषिकाणां हि मिथः प्रमाणतत्त्वानां सङ्ख्याभेदे सत्यप्यन्योन्यं तत्त्वानामन्तर्भावेऽल्पीयानेव भेदो जायते। तेनैतेषां प्रायो मततुल्यता । उभयेऽप्येते तपस्विनोऽभिधीयन्ते । ते च शैवादिभेदेन चतुर्धा भवन्ति । तदुक्तम्—

**आधा(चा?)रभस्मकौपीनजटायज्ञोपवीतिनः । स्वस्वाचारादिभेदेन चतुर्धा स्युस्तपस्विनः॥**
**शैवाः पाशुपताश्चैव महाव्रतधरास्तथा । तुर्याः कालमुखा मुख्या भेदा एते तपस्विनाम् ॥**

तेषामन्तर्भेदा भरटभक्तलैङ्गिकतापसादयो भवन्ति । भरटादीनां व्रतग्रहणे ब्राह्मणादिवर्णनियमो नास्ति । यस्य तु शिवे भक्तिः स व्रती भरटादिर्भवेत् । परं शास्त्रेषु नैयायिकाः सदा शिवभक्तत्वाच्छैवा इत्युच्यन्ते, वैशेषिकास्तु पाशुपता इति । तेन नैयायिकशासनं शैवमाख्यायते, वैशेषिकदर्शनं च पाशुपतमिति । इदं मया यथाश्रुतं यथादृष्टं चात्राभिदधे । तत्तद्विशेषस्तु तद्ग्रन्थेभ्यो विज्ञेयः [ पृ० २०–२१ ]। ......मुनिविशेषस्य कापोतीं वृत्तिमनुष्ठितवतो रथ्यानिपतितांस्तण्डुलकणानादायादाय कृताहारस्याहारनिमित्तात् कणाद इति संज्ञाऽजनि । तस्य कणादस्य पुरः शिवेनोलूकरूपेण मतमेतत् प्रकाशितं तत औलूक्यं प्रोच्यते, पशुपतिभक्तत्वेन पाशुपतं चोच्यते । कणादस्य शिष्यत्वेन वैशेषिका काणादा भण्यन्ते । आचार्यस्य च प्रागभिधानीपरिकर(नात् परं **कर** ?) इति नाम समाम्नायते [ पृ० १०७ ]।......षट्पदार्थी कणादकृता, तद्भाष्यं **प्रशस्तकरकृतम्**, तट्टीका **कन्दली** श्रीधराचार्यीया, **किरणावली** उदयनसन्दृब्धा, **व्योममति**र्व्योमशिवाचार्यविरचिता, **लीलावतीतर्कः श्रीवत्साचार्यीयः**, **आत्रेयतन्त्रं** चेत्यादयो वैशेषिकतर्काः [ पृ० ११४ ]। ” इति **हरिभद्रसूरि**प्रणीतषड्दर्शनसमुच्चयस्य [ जैन आत्मानंद सभा, भावनगर, इत्यतः प्रकाशितायाम् ] **गुणरत्नसूरि**कृतायां बृहद्वृत्तौ । १४६६ विक्रमाब्दे **गुणरत्नसूरि**भिः **क्रियारत्नसमुच्चया**ख्यो ग्रन्थो विरचित इति तदानीं तेषामस्तित्वमासीदिति ध्येयम् ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

कृतिकास्वादधीत [ तैत्तिरीयब्राह्मणम् १।१।२ ] ४८

कृष्णमालभेत ३

ग्रामकामो यजेत [ ताण्ड्यमहाब्राह्मणम् १७।१०।३७, १८।१।१३, १८।५।७ ] ३१

चन्द्रमा मनसो जातः [ ऋग्वेद १०।९० १३ ] ३६

ता अग्निं गर्भं दधिरे विरूपाः [ यजुर्वेदः, मैत्रायणी संहिता[1] २।१३।३ ] ४१

तेभ्यस्त्रयो वेदा अजायन्त २३

त्रिः प्रथमामन्वाह [ ऐतरेयब्राह्मणम् ३।३ ] २३

देवदत्तस्य रूपरसगन्धस्पर्शप्रत्यया एकानेकनिमित्ताः, 'मया' इति प्रत्ययेन प्रतिसन्धानात्, कृतसङ्केतानां बहूनामेकस्मिन् नर्तकीभ्रूक्षेपे युगपदनेकप्रत्ययवत् [ न्यायवार्तिकम् १।१।१० ] इति उद्द्योतकरः २९

देवस्य त्वेति निर्वपति ४८

द्विरयमाम्नातः २३

प्राङ्मुखोऽन्नानि भुञ्जीत ४८

'यथा अभिनयादेरर्थं प्रतिपद्यन्ते लौकेका एवं शब्दोऽर्थस्य सङ्केतवशेन व्यञ्जकत्वात् कारणम्' इति वृत्तिकारः ७०

वसन्ते ब्राह्मणोऽग्नीनादधीत [ तैत्तिरीयब्राह्मणम् १।१।२ ] ४८

व्रीहीनवहन्ति ३

समे यजेत ३

स्वर्गकामो यजेत [ ताण्ड्यमहाब्राह्मणम् १६।३।३, १६।१२।६ ] ३१

हीनादादेयमादौ तु तदभावे समादपि।<br>
असम्भवे त्वाददीत विशिष्टादपि धार्मिकात्॥ [ महाभारतम् १२।१४१।४० ] ४७

---

१ तैत्तिरीयसंहिता ५।६।११॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# अथ वृद्धिपत्रकम् ।

अस्मिन् ग्रन्थे [1]O. P. PS. मध्ये ये सूत्रपाठभेदास्ते तत्र तत्र टिप्पनेषूपदर्शिताः । तथाप्यस्मदनवधानाद् येऽवशिष्टाः प्रमार्जनीया वा पाठभेदास्तेऽत्रोपदर्श्यन्ते । कतिपयानां सूत्राणां ग्रन्थान्तरेषूद्धृतेन सूत्रपाठेन सह तुलना चात्रोपदर्शयिष्यते ।

**विशिष्टा अवशिष्टा वा O.P.PS. सूत्रपाठभेदाः**

......सङ्ख्याः परिमाणानि...PS. ।....सङ्ख्या[2] परिमाणानि......O. P. १ । १ । ५ ।—असमवायात् सामान्यं कार्यं[3] कर्म न विद्यते PS., असमवायात् सामान्यं कर्म कार्यं न विद्यते O.P. १ । १ । २४ ।—'सामान्यविशेषाभावेन च १ । २ । १५' PS. मध्ये नास्ति ।—त्रपुसीसलोहरजतसुवर्णानां च तैजसानाममग्निसंयोगाद् द्रवताद्भिः सामान्यम् २ । १ । ७ PS. । अचाक्षुषत्वान्न प्रत्यक्षस्य गुणस्य सतोऽपवर्गः कर्मभिः साधर्म्यम् PS., [4]अचाक्षुषत्वाच्च न कर्म गुणस्य सतोऽपवर्गः कर्मभिः साधर्म्यम् P. २ । २ । २८–९ । अत्र 'अचाक्षुषत्वाच्च प्रत्यक्षस्य न कर्म' इत्येकं सूत्रमपरं तु 'गुणस्य सतोऽपवर्गः कर्मभिः साधर्म्यम्' इति सूत्रद्वयं चन्द्रानन्दरचित-

---

१ Oriental Instituteस्थः शारदालिप्यां लिखितश्चन्द्रानन्दरचितवृत्तेरादर्शोऽत्र O. इति ज्ञेयः । मुनिराजश्रीपुण्यविजयमहोदयसकाशाल्लब्ध आदर्शे प्रारम्भे यः केवलो वैशेषिकसूत्रपाठः स PS. ज्ञेयः, यस्तु चन्द्रानन्दरचितवृत्त्यन्तर्गतः सूत्रपाठः सोऽत्र P. वेदितव्यः । दृश्यतां प्रस्तावना पृ० १ ॥ २ अयं पाठ आदरणीयो भाति, दृश्यतां तत्त्वसंग्रहपञ्जिका. पृ० २११, न्यायकुमुदचन्द्रः पृ० २७३ ॥ ३ मि. वृत्तावुपस्कारे चायमेव पाठः ॥ ४ अचाक्षुषत्वान्न कर्म...O. ॥ ५ मि. उ. अनुसारेणाप्ययं पाठः समर्थ्यते, दृश्यतां पृ० २१ टि० २ । तुलना—"आकाशस्य गुणः शब्द इति कणभुङ्मतम्, एकद्रव्यवत्त्वाद्, एकेनाश्रयद्रव्येण द्रव्यवत्त्वमेकद्रव्यवत्त्वम्, अथवा एकं च तद् द्रव्यं चेत्येकद्रव्यम्, तदस्याश्रयोऽस्तीत्येकद्रव्यवान्, तद्भाव एकद्रव्यवत्त्वं, तस्मा**देकद्रव्यवत्त्वान्न द्रव्यम्, न च कर्माचाक्षुषप्रत्यक्षत्वात्**, अतः परिशेषाद् गुणः, स च क्षणिकः प्रागूर्ध्वं चोच्चारणात् **सत्त्वे लिङ्गाभावात्**, कारणसामग्र्याः प्रागभूतात्मलाभात्, शब्दाभिव्यञ्जकवस्त्वभावात्, सति चाभिव्यञ्जके **कारणतो विकारो** न स्यात्, नहि घटस्य प्रदीपादिदिव्यमण्यभिव्यञ्जकसन्निधाने परिमाणानुविधानं दृष्टम्, तावानेव हि घटोऽभिव्यञ्जकभेदे सत्यपि, अयं तु अल्पमध्यादिभेद उपलभ्यते, तथा भेर्यादिसंयोगान्निष्पत्तेर्वेणुपर्वविभागाच्छब्दाच्च शब्दनिष्पत्तेः वीचिसन्तानवत्, न चायं विशेषगुणः स्पर्शवतां द्रव्याणां भूजलानलानिलानामकारणगुणपूर्वत्वात्, यथा शुचौ शङ्खे कारणगुणपूर्वं धवलं रूपमालक्ष्यते, विनष्टेऽपि तस्मिन् जलजे तथालक्षणमेव रूपं शकलेषु गृह्यते, न त्वेवं भेर्यादिशब्दाः प्रध्वस्तेषु भेर्यादिषु तदवयवेषूपलभ्यन्ते, शरीरे वा सामश्लोकादिशब्दाः शरीरावयवेषु वोपलक्ष्यन्ते, तस्मान्न कारणगुणपूर्वः शब्दः, तथा यदि स्पर्शवतो गुणः स्यात् शब्दस्ततो यावत् तानि स्पर्शद्रव्याणि तावद् भवेद् रूपादिवत्, न चैवमुपपद्यते, तस्माद-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृत्त्यनुसारेण भवेत् । [1]नयचक्रवृत्तावत्रैकमेव सूत्रमुद्धृतं तथापि तदनुसारेण 'अचाक्षुषत्वान्न' इत्येकं सूत्रमपरं तु 'प्रत्यक्षस्य गुणस्य सतोऽपवर्गः कर्मभिः साधर्म्यम्' इति सूत्रद्वयमप्यत्र सम्भाव्यते ।—नित्यवैधर्म्यम् PS. २ । २ । ३१ ।

दोषात् PS. २ । २ । ३५, मि. । चन्द्रानन्दरचितवृत्तावत्र "अभिव्यक्तौ तु दोषात्" इति पाठः, तत्र PS. अनुसारेणास्माभिः 'अभिव्यक्तौ तु' इत्यंशो वृत्तित्वेन 'दोषात्' इत्यंशस्तु सूत्रत्वेन दर्शितः । तथापि 'अभिव्यक्तौ तु दोषात्' इत्यपि सूत्रपाठोऽत्र चिन्त्यः । उपस्कारे त्वत्र '[2]अभिव्यक्तौ दोषात्' इति पाठः । न्यायवार्तिकतात्पर्यटीकायां "कारणतो विकारादेः ।........आदिशब्देन 'सतः शब्दस्याभिव्यक्तौ दोषात्' इत्येवमादयो ग्राह्याः । दोषश्च दर्भेध्मादिवदुपयुक्तानामृचां निरिष्टिकत्वेन पुनरनुपयोगः । कार्यत्वे त्वन्यत्वे न निरिष्टिकत्वमित्यर्थः MS.[ १ । १ । २२ पृ० २७८ ]" इति वाचस्पतिमिश्रेणोक्तम् । अत्र कियानंशः वाचस्पतिमिश्रस्य सूत्रत्वेनाभिमत इति स्फुटं न ज्ञायत इति ध्येयम् ।—कार्याज्ञात् ३ । १५, अज्ञानाज्ञानाच्च ३ । १ । ६ PS. ।—अन्य एव हेतुरित्यनपदेशः PS. ३ । १ । ७ । इतः परम् 'अर्थान्तरं ह्यर्थान्तरस्यानपदेशः' [ ३ । १ । ८ ] इति सूत्रं PS. मि. उ. मध्ये दृश्यते । चन्द्रानन्दरचितवृत्तौ तु 'अन्य एव हेतुरित्यनपदेशः । ३ । १ । ७ । अन्यो [3]हेतुलक्षणबाह्य इत्यर्थः, तथाहि—इन्द्रियार्थप्रसिद्धिरिन्द्रियार्थधर्मत्वादात्मना असम्बन्धान्न तमनुमापयेत् अतोऽनपदेशः ।' इत्येव पाठ उपलभ्यते । अत्र चन्द्रानन्दरचितवृत्तेरादर्शद्वये 'तथाहि' इत्यतः पूर्वम् 'अर्थान्तरं ह्यर्थान्तरस्यानपदेशः' इति सूत्रं गलितम् आहोस्विच्चन्द्रानन्दस्य तदभिमतमेव नेति निश्चेतुं न पार्यते । वयं त्वत्र यथा चन्द्रानन्दवृत्तौ दृष्टं तथा सूत्रपाठं सूत्राङ्कांश्च निरदिशाम । PS मध्ये तु सूत्रमेतद् दृश्यत एव, अतः PS अनुसारेण 'अर्थान्तरं ह्यर्थान्तरस्या-

---

यावद्द्रव्यभावित्वान्न पृथिव्यादिगुणः शब्दः, इतश्च न स्पर्शवद्द्रव्यगुणः शब्दः, आश्रयादन्यत्रोपलब्धेः, अन्यत्र हि शङ्खमुखसंयोगोऽन्यत्र दिगन्तरेऽवस्थितैः श्रोतृभिरुपलभ्यते शब्दः, स्पर्शवद्गुणास्तु रूपादयोऽन्यत्राश्रयान्न गृह्यन्ते, तस्मान्न शब्दः स्पर्शवतां गुणः, बाह्येन्द्रियप्रत्यक्षत्वाच्च नात्ममनोदिक्कालानाम्, पारिशेष्यादाकाशगुणः लिङ्गमाकाशस्यमानुपलभ्यानस्येति ।"—तत्त्वार्थसूत्रसिद्धसेनीयवृत्तिः ५ । २४ ॥

१ "अचाक्षुषप्रत्यक्षगुणस्य सतोऽपवर्गः कर्मभिः साधर्म्यम्"—नयचक्रवृत्तिः पृ० ५५ पं० ११ । "अचाक्षुषप्रत्यक्ष गुणस्य सतोऽपवर्गः कर्मभिः साधर्म्यम्"—नयचक्रवृत्तिः पृ० ८७ पं० १४ । दृश्यतां न्यायागमानुसारिणीवृत्त्यलङ्कृतस्य नयचक्रस्य टिप्पणानि पृ० २० टि० 1 ॥ २ तुलना—"अभिव्यक्तौ चाभिभवात्"—न्यायसूत्रम् ३ । १ । ४२ ॥ ३ हेतुर्लक्षणबाह्य O ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नपदेशः ३ । १ । ८' इति सूत्रमत्र ज्ञेयम् । ततः परं 'संयोगि समवायि ......' इत्यादिसूत्रेष्वेकोऽङ्कः परिवर्धनीयः । प्रथमद्वितीयपरिशिष्टयोरपि तदनुसारेण संशोधनीयम् । चतुर्थे परिशिष्टेऽप्येवं सूत्रसंख्यायां PS अनुसारेण संशोधनं विधेयम् ।

प्रसिद्धिपूर्वकत्वादपदेशस्य ३ । १ । ९ PS. मि. उ. पाठ एव समीचीनो भाति । यत्तु भोटभाषानुवादानुसारेण प्रमाणसमुच्चयवृत्ति-विशालामलवत्योः 'प्रसिद्धपूर्वकत्वादपदेशस्य' इति पाठ इत्यस्माभिः पृ० २६ टि० ३ इत्यत्र निर्दिष्टं तद् न समीचीनम्, तत्रापि यथा PS. मध्ये तथैव पाठो भाति, दृश्यतां पृ० १८७ पं० २१, पृ० १९४ पं० ११-१४, पृ० १९५ पं० १७-२०, पृ० १९९ पं० ६, पृ० २०३ पं० २३-२७ ।—३ । २ । ३ सूत्रे 'मनः' PS मध्ये नास्ति ।—संस्काराभावे गुरुत्वात् पतनं च PS. ५ । १ । १८ ।—तदभावे संयोगाभावोऽप्रादुर्भावश्च स मोक्षः PS. ५ । २ । २० । अयं पाठः समीचीनो भाति । मि. वृत्तावयमेव पाठः । उ. मध्ये '......ऽप्रादुर्भावश्च मोक्षः' इति पाठः । सदकारणवत्तन्नित्यम् P. ४ । १ । १ । सदकारणवत्तन्नित्यम् PS. । सदकारणवन्नित्यम् O मि. उ. ।—[4]अनेकद्रव्येण द्रव्येण समवायाद् ............P. । अनेकद्रव्येण समवायाद् रूपविशेषाच्चोपलब्धिः । एतेन रसगन्धस्पर्शेषु ज्ञानं व्याख्यातम् PS. O. ४ । १ । ९-१० ।—[5]संख्याः.........रूपिद्रव्यसमवायाच्चाक्षुषाणि P. PS. ४ । १ । १२ । [6]संख्याः....रूपिसमवायाच्चाक्षुषाणि O. ।—[7]सर्वेन्द्रियं ज्ञानं PS. ४ । १ । १४ । मि. । उ. ।

---

